
श्रीः

गीर्वाणज्ञानेश्वरी



द्वितीयो भागः

अस्य

अनुवादकः प्रकाशकश्च

जतसंस्थानवासी खासनीस इत्युपाह्वः

श्रीमद्विष्णुशर्मतनयोऽनन्तशर्मा

बी. ए. एल् एल् बी, न्यायाधीशः

शाकः १८५३, ईसवीयाब्दः १९३१





पब्लिशर—अनंत विष्णु खासनीस न्यायाधीश, संस्थान जत.

प्रिन्टर—रामचंद्र येसू शेडगे. निर्णयसागर प्रेस,
घर नंबर २६-२८ कोलभाटलेन, मुंबई.

श्रीज्ञानेश्वरो विजयते



भवद्गिरां ज्ञानराज कृतो गीर्वाणभाषया ।
अनुवादो यथाप्रज्ञमर्प्यतेऽसौ भवत्करे ॥ १ ॥

सानुनयावेदनम्–

योगींद्रज्ञानदेवेन कृता भावार्थदीपिका ।
गीतार्थं विशदीकर्तुं जगदुद्धारहेतवे ॥ १ ॥
या वर्त्तते महाराष्ट्रभाषालङ्कारवद्भुवि ।
ज्ञानेश्वरीति विख्याता देववत्पूज्यतेऽखिलैः ॥ २ ॥
यस्या गाम्भीर्यतोऽर्थज्ञाः संप्रदायीकृतात्मसु ।
द्वित्रा वा पंचषा वापि दृश्यंते वसुधातले ॥ ३ ॥
यस्याः संसेवनात्साक्षान्मुकुंदः श्रीनिकेतनः ।
प्रयच्छति नृणां ज्ञानमिहामुत्र सुखास्पदम् ॥ ४ ॥
तस्या एवानुवादोऽयं कृतो गीर्वाणभाषया ।
वाग्गुंफेन ममानेन प्रीतो भूयाज्जनार्दनः ॥ ५ ॥
पुनामि वाणीं सेवेय सज्जनान् प्रीणये हरिम् ।
एतदर्थं कृतो यत्नो न ज्ञातृत्वप्रसिद्धये ॥ ६ ॥

किंचिन्निवेदनम्—

ज्ञानेशो भगवान्विष्णुः पांडुरंगश्च मूर्तिमान् ।
महाराष्ट्रः सतां श्रेष्ठो बुद्धिमत्सु प्रकाशकः ॥
गीतार्थामकरोट्टीकां सर्वेषामुत्तमोत्तमाम् ।
श्रीकृष्णभगवद्वक्त्रं यत्राह हृदयामृतम् ॥
श्रुतिस्मृती उभे नेत्रे विप्राणां परिकीर्तिते ।
एकया विकलः काणो द्वाभ्यामंधः प्रकीर्तितः ॥
श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं च वै स्मृतिः ।
जन्मना जायते शूद्रः संस्काराद्द्विज उच्यते ॥

द्विजविषये वेदाभ्यासो मुख्यः । तथाच ऋग्वेदसंहितायाम्–'यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति । यदीं शृणोत्यलकं शृणोति नहि प्रवेद सुकृतस्य पंथाम्' इति । तस्मात्स्वाध्यायोऽध्येतव्य इति । अध्येतारं पुरुषं तदीयप्रयासाभिज्ञानेन सखिव पालयतीति सचिविद्वेदः बहुद्रव्यप्रयासगम्यक्रतुफलस्याध्ययनमात्रेण संपादनं तत्पालनं तदपि आम्नायते । आ० गृ० सूत्रे–'य यं क्रतुमधीते तेन तेन हास्य क्रतुनेष्टं भवत्यग्नेर्वायोरादित्यस्य सायुज्यं गच्छती'ति । ईदृशं सखिविदं वेदरूपं सखायं । यः पुमानध्ययनमकृत्वा परित्यजति तस्य वाच्यपि भाग्यं नास्ति किमु वक्तव्यम्? तथैव—'देवाधीनं जगत्सर्वं मंत्राधीनं च दैवतम् । ते मन्त्रा ब्राह्मणाधीना ब्राह्मणो मम दैवतम्' इति वचनाद्ब्राह्मणा श्रेष्ठं प्रसिद्धम् । एवं च वेदविदो ब्राह्मणाः श्रेष्ठाः । तत्रापि मदनपारिजाते–'आननानितिस्तं हि सिद्धान्तानि विचारयेत् । केवलानि पदाधीते वेदघण्टो भवेद्द्विजः ॥'

धर्मार्थकाममोक्षसाधकोऽयं वैदिकः सनातनो धर्मः । तस्य हृदनं निहितं गीर्वाणभाषायाम् । प्राकृतजनानामुद्धारार्थं तदेव प्रकटीकृतं ज्ञानराजेन । तदेतस्य पृथिवीतलविराजितां प्राकृतजनानामुद्धारार्थं गीर्वाणया गिरा प्रकटीकृतं चेत्सकलाऽखिलभाषासु प्रकाशनाय सुलभीभवतीति विचार्य श्लोकोऽयं मया प्रयत्नः । अधिकारिण एव जानंति तन्मर्म । भगवत्प्रेरणयैव रचनायां हितार्थाय च सेयं भगवत्सेवाऽकारि मया यथामति । अस्य च प्राकृतदमरूपं निजगुरुस्थ विठ्ठल आण्णाचार्य वेलुस्त्रिभिः, तथा विद्याभूषणतांत्रेशास्त्रिभिः,

तथा साताराप्रांतस्थ भागवतोपाह्व**सखारामशास्त्रिभिः** कृतं तथापि मुद्रणावसरे ततोऽप्युर्वरितो भागो मुंबापुरस्थसुप्रसिद्धनिर्णयसागराख्यमुद्रणालयगतांकनीयविविधग्रंथशोधनाधिकृतैः **पणशीकरो**पाह्वविद्वद्वरश्रीमल्लक्ष्मणशर्मतनुजनुर्भि**र्वासुदेवशास्त्रिभि**ष्टिप्पण्यादिभि परिष्कृत्य महतायासेन परिशोधितोस्ति तेषां सर्वेषां सुबहूनुपकारानविशं स्मरामि ।

तथैव **श्रीकोटणीसमहाशयाः, उपासनीबावाः, नारायणमहाराजाः, सिद्धारूढाः, गुलाबदासवैष्णवमहाराजाः, अमळनेरकरदिवारकरीसांप्रदायिकाः** संतश्चास्मिन्नाशीर्वाददातारः । **जतसंस्थान-कुरुंदवाड-औंधादिसंस्थानिकमहाराजाः** प्रेम्णा साहाय्यकाः । **प्रो. रानडे** इत्यादयोऽर्वाचीनतत्त्वज्ञा अप्यलंतसाहाय्यका इत्यत्र केवलं स्मृताः संति । नात्र विशेषं ब्रूमः । एतत्संबंधेन यल्लेख्यं तद्ग्रंथसमाप्तौ सविस्तरं निवेदयिष्यते ।

ब्राह्मणानां कृपाप्रसादमंतरा न भवति कस्यापि कर्मणः साफल्यमिति श्रीमद्ज्ञानराजैः नवमेध्याये प्रपंचितं प्रसंगात्किंचित्प्रदर्श्यते—

सर्ववर्णेषु ये श्रेष्ठाः सर्वलोकाधिकारिणः ।
आकराः सर्वविद्यानां मूर्धन्या ब्राह्मणाः स्मृताः ॥ ४७५ ॥
ये भूचरा भूमिदेवास्तपोमूर्तय एव च ।
तीर्थानामपि माहात्म्यमुद्भूतं तेभ्य एव तु ॥ ४७६ ॥
संति येषु सदा वेदा वेदप्रावरणं च ये ।
कृपाशीर्वचनैर्येषां कल्याणं वर्धते सदा ॥ ४७७ ॥
यदास्थामृततोयेन वृद्धिः सत्कर्मणां भवेत् ।
येषां सदिच्छासामर्थ्यात्सत्यत्वं ह्यस्ति जीवितम् ॥ ४७८ ॥
येषां च वैदिकैः शब्दैरग्नेरायुष्यवर्धनम् ।
समुद्रेणात्मनस्तोयं येभ्यः प्रेमार्थमर्पितम् ॥ ४७९ ॥
मयाऽपसारिता लक्ष्मीः कौस्तुभोऽपि धृतः करे ।
येषां पादरजःप्रासौ हृदयं पुरतः कृतम् ॥ ४८० ॥
ब्राह्मणांघ्र्युषितं लक्ष्म धृतं वक्षःस्थले मया ।
गांभीर्यस्यैव रक्षार्थं पार्थान्यन्नास्ति कारणम् ॥ ४८१ ॥
कालाग्निरुद्रसदनं येषां क्रोधः प्रजायते ।
प्रसादेऽखिलसिद्धीनां लब्धाः स्युः सर्वसिद्धयः ॥ ४८२ ॥

एव हि ब्राह्मणा पूज्या स्वत सुकृतराशय ।
भजका याति मद्रूपमिति किं तत्समर्थनम् ॥ ४८३ ॥

तेषा प्रसादफलविषये दृष्टातस्तत्रैव—

विपदाहस्य शाति स्यादिति निश्चित्य सादरम् ।
शकरेण कलाघोपि ललाटे विधृतो विधु ॥ ४८६ ॥ तथा ॥

तेषु परमपूज्य वरेण्यो दिवाकरभट्ट, रामतीर्थनिवासी ८४ वर्षीयो विद्याज्ञानतपोवृद्ध साङ्गोपाङ्गषडङ्गवेदाभ्यायी वेदवेदातधर्मव्यवहारादिषु कुशल कर्मकाडज्ञानकाडचतुर ऋग्वेदातर्गताश्वलायनशाकलशाखाध्यायी योगी गायत्रीपुरश्चरण–श्रीदत्तोपासनाया महत्व स्मार्ताग्न्युपासनयास्तथा वेदविहितवर्णाश्रमधर्मतत्वप्रवृत्तिनिवृत्तिलक्षणसनातनधर्मस्य महत्व च समबोधयत् तत्फलं च न्यवेदयत् । तत्कृपया तदनुज्ञया ज्ञानेश्वर्या गीर्वाणानुवादमकरवम् ।

गीर्वाणज्ञानेश्वर्यां प्रथमाध्याये विज्ञप्ति —

अविहाय निज स्थान चद्रस्याभ्युदयात्सुखम् ।
अनुरागयुता भुक्ते स्फुट कुमुदिनी यथा ॥ ६० ॥
ये त्वर्जुनसमा पात्रतया येषा श्रवणयोग्यता ।
ते साधव कृपापूर्णा पिबन्तु रसमुत्तमम् ॥ ६२ ॥
गाम्भीर्यात्सुस्थिरा यस्य ह्यत करणवृत्तय ।
कुसमपत्रस्स एवास्य रहस्य वेत्ति तत्त्वत ॥ ६१ ॥
अगाध भवता चित्तमतो मे विनति प्रभो ।
निवेदन ते मिथ्रत्वात्पादवदनपूर्वकम् ॥ ६३ ॥
पितृमातृस्वभावोऽय सतोषो जायतेऽधिक ।
अपत्यस्य समाकर्ण्य वाणीमस्पष्टसुदराम् ॥ ६४ ॥
अंगीकृतोऽय युष्माभि सज्जनैरात्मसात्कृत ।
तस्मात्न्यून च क्षतव्य सहन प्रार्थना विना ॥ ६५ ॥
अवाच्यमित्यविज्ञाय धार्ष्ट्यं मे मनसा कृतम् ।
अतिक्रामति खद्योत किं भानु स्वेन तेजसा ॥ ६७ ॥
टिट्टिभि चुरुत्ते चञ्च्वा सागरस्य परिच्छदम् ।
तथैवाह प्रवृत्तोऽस्मि ह्येतद्ग्रन्थानुवादने ॥ ६८ ॥
आकाश परिमातु य प्रयतेत ततोऽधिक ।
भवेत्तथ यथाऽऽत्मीय तथा निर्धारण मम ॥ ६९ ॥

शंभुर्विचारयामास गीताया ह्यर्थगौरवम् ।
तदा सुविस्मिता गौरी प्रश्नमेनं चकार ह ॥ ७० ॥
तामुवाच हरो देवि स्वरूपं ते यथा नवम् ।
गीतातत्त्वं तथा ज्ञेयमपारं नित्यनूतनम् ॥ ७१ ॥
निद्रायां श्वासरूपेण जातो वेदार्थसागरः ।
सर्वेश्वरः स्वयं साक्षाद्वादीज्जागरेऽर्जुनम् ॥ ७२ ॥
तथाऽगाधमिदं यत्र वेदानां स्तंभिता मतिः ।
अल्पस्य मतिमंदस्य वर्णने का कथा मम ॥ ७३ ॥
अपारं तत्कथं पारं भवेत्तेजस्त्वमुज्ज्वलम् ।
गगनं मशकस्येव कथं मुष्टिगतं भवेत् ॥ ७४ ॥
श्रीगुरुः सानुकूलोऽत्र चाधारः केवलं मम ।
भक्तिमांश्च तदुक्त्यैव ज्ञानदेवो वदाम्यहम् ॥ ७५ ॥
अविवेकी च मूर्खोऽहं यद्यपि स्यां तथापि तु ।
साधूनां च कृपादीपः सोज्ज्वलोऽयं प्रकाशकः ॥ ७६ ॥
स्पर्शस्यैव हि सामर्थ्यं लोहः कनकतां भजेत् ।
अमृतस्यैव सा सिद्धिर्लभते जीवनं मृतः ॥ ७७ ॥
मूकं करोति वाचालं येन सिद्धा सरस्वती ।
अहो किमेतदाश्चर्यं वस्तुसामर्थ्यमीदृशम् ॥ ७८ ॥
माता कामदुघा यस्य तस्यातं किमु दुर्लभम् ।
तस्मादहं प्रवृत्तोऽस्मि चिकीर्षुर्ग्रंथसंग्रहम् ॥ ७९ ॥
न्यूनं संपूर्णतां यातु यत्किंचिदधिकं मतम् ।
तत्सर्वं त्यज्यतामेव एषा वो विनतिर्मम ॥ ८० ॥
दीयतामवधानं मे युष्मदुक्त्या वदाम्यहम् ।
सूत्राधीनं दारुमंत्रं चेष्टते तु यथा तथा ॥ ८१ ॥
सतामनुगृहीतोऽहं तदाज्ञाधारकः सदा ।
अलंकुर्वंतु ते सन्तो यथेष्टं मे विधीयताम् ॥ ८२ ॥
प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥
यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् ।
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥ यः कश्चित् ॥

गीर्वाणज्ञानेश्वरीप्रस्तावः—

श्रीज्ञानराजाय नमः

इह खल्वसारे संसारे सकलपुरुषार्थसाधनतया परमकल्याणसाधनस्य भगवद्विषयकज्ञानस्य संपादयित्री श्रीमद्भगवद्गीता समुल्लसतितराम् । श्रीमद्भगवदभिहितसर्वोपनिषत्प्रतिपाद्यार्थसारतया च सेन सर्वत्र विराजमाना प्रसिद्धिमुपगताऽभूत् । अस्याश्च वेदार्थोपबृंहितत्वेन भगवत्पूज्यपादश्रीमदाद्यशंकराचार्यप्रभृतिभिः प्राचीनैरर्वाचीनैश्चापि मधुसूदनसरस्वत्यादिभिर्महाविद्वद्भिर्बहूनि व्याख्यानानि विरचितानि समुपलभ्यन्ते । तेषां च भाष्यादीनां महाव्याख्यानानां दुरवगाहतया स्वल्पमतीनां संस्कृतभाषानभिज्ञानां महाराष्ट्रभाषापरिचितानां सुखबोधाय श्रीज्ञानेश्वरमहाराजैः साधुनवैर्भावार्थदीपिकानाम्नी सुविस्तृता टीका विनिर्मिता । सेयं भावार्थदीपिका संप्रति लोके **'ज्ञानेश्वरी'**-नाम्ना विराजते । यथा ज्ञानेश्वरमहाराजैः परमकारुणिकतया गीर्वाणभाषानभिज्ञानां स्वल्पमतीनां सकलपुरुषार्थसाधनभूतस्य भगवद्विषयकज्ञानस्य श्रीमद्भगवद्गीतामंदिरस्य गीर्वाणभाषामयस्य कपाटं महाराष्ट्रभाषाघटितस्य श्रीज्ञानेश्वरीग्रंथस्य कीलकेन समुद्घाटितं तथैव वामनपंडितप्रभृतिभिरनेकैः पंडितप्रकाण्डैर्यत्नाः कृताः । यथार्थदीपिकाद्यो ग्रंथाः तेषामायासान्स्फुटीकुर्वन्ति । यद्यप्येते सर्वे ग्रंथा आदरणीयाः प्रशंसनीया उपकारकाश्च वर्तंते तथापि ज्ञानेश्वरीग्रंथ एवैतावत्कालपर्यंतं सार्वभौमत्वेनेह वरीवर्ति ।

यद्यपि ज्ञानेश्वरी भगवद्गीतासूपनिषत्सु समस्तपदपदार्थनिरूपाय-

माणा ह्या निरवद्यरूपा नानालंकाररत्नविस्तारितरत्नाकरमाहात्म्या महाराष्ट्रभाषादेवताप्रासादशेखरीभूतास्ति । अहो ! या देवगृहे देवतापीठे विराजते ! यया 'ज्ञानदेवी' इति दुर्लभं पदं निजमाहात्म्येन संपादितं, धन्या सा ज्ञानेश्वरी । ननु भगवद्गीताभिप्रायद्योतकान् पांडित्यप्रचुरान्विद्यमानाननेकान्संस्कृतप्राकृतग्रंथास्तिरस्कृत्य केन हेतुनेयं ज्ञानेश्वरी वरीवर्ति ? । अहो नैतच्चित्रं, ज्ञानेश्वराणां भाषा न केवलं पांडित्यदर्शिका शुकवद्वैखरीवाणी । सा परा पश्यन्ती मध्यमा चैतत्क्रमेण समुल्लसतितराम् । हेम्नो मूल्यं सर्वे जानन्ति तस्य संग्रहमपि कुर्वंति किंतु संस्कारहीनः स्वर्णखंडो मूल्यत्वेनैव नृपशिरस्यारोहणकरणेऽसमर्थः तत्र स्वर्णकारस्य कौशलमेव समर्थं तथैव श्रीमद्भगवद्गीतायाः स्थितिः । ज्ञानेश्वरमहाराजैरात्मबुद्धिप्रभावेण श्रीमद्भगवद्गीतासुवर्णेष्टिकाया ज्ञानेश्वरीनामक उपमादृष्टांतरूपकादिनानारत्नांकितोऽतीव मनोज्ञोऽलंकारः समुत्पादितस्तेनैव सा गीता निजरूपांतरेण श्रीज्ञानेश्वरीमिषेण सर्वेषां कंठगताऽभूत् शिरस्यपि च बाभाति ।

अथ यदि ज्ञानेश्वरसाधुवरेण्यैरल्पमतीनां गीतार्थावबोधाय महाराष्ट्रीयवाण्या ज्ञानेश्वरी निबद्धा तर्हि स्थले स्थले वा काले काले वा भिद्यते भाषायाः स्वरूपम् । यदेयं ज्ञानेश्वरी निरमायि तदा ज्ञानेश्वरमहाराजैस्तदानींतनानां महाराष्ट्रभाषापरिचितानां सर्वेषां सुशिक्षितानामशिक्षितानामपि जनानां परिचितानां प्रसिद्धशब्दानामेव परिग्रहः कृतः । किंतु व्यतीतेन महता कालेन तदानींतनानामशिक्षितानामपि सुबोधाः शब्दा इदानींतनानां महाराष्ट्रभाषाकोविदानामपि दुर्बोधा अभूवन् । शब्दानां दुर्बोधतायाः प्रकटीकरणार्थं केचित् ज्ञानेश्वरीग्रंथस्थाः शब्दा उदाह्रियन्ते ।

आथि, नव्हाळी, अपाडें, सुवावें, धिंवसा, गिवसणें, थेंकुलें, कीर इत्यादयः सहस्रशः शब्दाः सम्प्रति महाराष्ट्रभाषाभिज्ञैरपि वेदमंत्र-वदुर्बोधाः समालक्ष्यंते । नैतदाश्चर्यं संस्कृतभाषाभिज्ञाना इदानींतनाना न्हॉं, न्हीं, न्हूं, न्हें, क्रैं इत्यादीना मंत्रबीजानामर्थो दुरधिगम एव । यतः कालभेदेन स्थानभेदेन वापि भाषा नामांतरं न प्राप्नोति तथापि भूयसा कालेन भिन्नस्वरूपमाधत्ते । स्थानातरेण विकृतिमायाति । अत्र प्रमाणम् । वेदमंत्र एव देवतास्थाने पुरा विराजमानोऽसुरशब्दः 'क्षीणे पुण्ये मर्त्यलोकं विशति' इति न्यायेन स्वस्थानात्प्रच्यावित. दैत्यपीठे च स्थापितः । पश्चादसुरस्थाने सुरशब्दः प्रतिष्ठा प्राप । एक एव शब्द-स्त्रिपु लिंगेपु वर्तते किमत्र कारण भिन्नस्थानपरिपाठानाम्? । एवं पदा-र्थाना नामभेदा अपि स्थानभिदा कालभिदा व्यक्तिभिदा गुणभेदेनो-च्चारणभेदेन वापि नानाविधा भवति । तेन योगिकयोगरूढादयो भेदाः समुत्पन्ना. । यथा—

वैदिकवाङ्मये शीर्षास्थाने शीर्खा इति उच्चारभेदस्योदाहरणं न तत्रार्थभेदः । करी द्विपो द्विरदः इत्यादयः शब्दा गुणभेदान् दर्शयन्ति । करतो, करलें इत्यादयः शब्दा व्यक्तिभेददर्शका एव । दूरशब्दस्यो-च्चारकरणेऽसमर्थो बालो 'बूर' इति वदति । पापाशब्दो बालकस्य मुखचुंबनप्रयोगे वर्तते । तथाच बालभाषाया पोलिकास्थानेपि प्रयुज्यते । अत्र पोलिकासदृशं मुखचुंबनस्य माधुर्यं व्यङ्ग्यार्थेन दर्शितं, नो चेत् पोलिकामुखचुंबनयो किं साधर्म्यं? । संसर्गदोषेणापि पवित्राः शब्दा वाच्यता यान्ति । यथा—"शप्पैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा" अत्र महाकविकालिदासेनाप्यादरितः शप्पशब्दो दुःसंगात् तिरस्कृतिपदमापन्न. । सुधारकशब्दस्यापि तथैव स्थितिः । सत्यशोधक-

संसर्गात् संप्रति सत्तशब्दस्य पदे पदे विडंबना दृश्यते । हा कष्टं !! वैदिकवाङ्मये विराजमान उपोदरशब्दस्तु विकृतरूपेण महाराष्ट्रभाषायां × दरीति रूपेण फाल्गुनोत्सवे नरीनर्ति !

खलु दुर्निवारा शब्दानामपक्रांतिः । परिवर्तनं च दुर्निवारम् । नात्र विदुषां विद्वत्ता, चतुराणां चतुरता, राज्ञां सत्ता च प्रतीकारकरणे समर्था । यतो मानवानामनुकरणशीलत्वं ज्ञानवैशिष्ट्यं च परिवर्तनकरण-समर्थं सार्वभौमत्वेन विराजते । मानवानां भाषा सर्वत्रैव व्यभिचरति न तया तिरश्चाम् ।

भवतु । भाषायाः स्वरूपं प्रतिशतकं भिन्नत्वमाप्नोति । ज्ञानेश्वरी-रचनाकालस्तु 'शके बाराशें बारोत्तरें । तैं टीका केली ज्ञानेश्वरें ।' इत्येवं तत्रैव स्फुटतरं दृश्यते तेनेतः संवत्सराणां पंचशताः पूर्वं विनिर्मितस्य ग्रंथस्य दुरवगाहताविषये किमाश्चर्यम् । पूर्वतनानां ये सुबोधा ग्रंथास्तेऽद्यतनानां दुर्बोधा जाताः, अद्यतनानां ये सुबोधास्ते पश्चात्तनानां दुर्बोधा भवंतीति नियमः । अतएव तत्तत्कालोचितभाषया टीकाग्रंथानामनुवादग्रंथानां च प्रयोजनमस्त्येव । संप्रति ज्ञानेश्वरीग्रंथस्य दुरधिगमतया महाराष्ट्रभाषाविद्भिरनेकैः प्रचलितमहाराष्ट्रभाषया अनुवादाः कृताः । किंतु ये गुणा ज्ञानेश्वर्यां दरीदृश्यंते ते व्याख्यानग्रंथे यथावदानेतुं कर्तारो न शक्ताः । यदि शब्दस्यार्थः कथंचिदवगतस्तथापि तस्येतिहासो नावगतश्चेत् तर्हि कथं जानंति शब्दपंडिता ग्रंथकारस्य हृदयम् ? अत्रोदाहरणं—

महाराष्ट्रभाषायां 'गडबडगुंडा' शब्दः सर्वेषां परिचितोऽस्ति । विधिहीनं कथंचिदपि त्वरया यत्कर्म क्रियते तत्र 'गडबडगुंडा' शब्दः प्रवर्तते । किंतु 'गडबडगुंडा' शब्दस्य विधि–हीनत्वे किं प्रमाणम् ?

निर्लोक्यतामस्येतिहास. । मानभावपंथाना पुरोहितो विवाहकाले वधूवरो पृथक् पृथक् शाययित्वा वरं प्रत्युपदिशति—'श्रीकृष्णस्य गडबडगुंडा आगत इत्युच्चार्यालोडनक्रिया कुरु' इति । वरमिति प्रतिवचनेन वरस्तथा कुरुते। 'गडबडगुंडा आगत' इति वरमुखाद्वारंवारं श्रुत्वा वधूरप्यागतस्त्वागच्छेत्विस्यनुज्ञा दत्ते पश्चाद्वधूवरौ संगच्छेते। सार्थं नाम 'गडबडगुंडेति' विधिना । तात्पर्यं ज्ञानेश्वर्या अनुवादकाना कार्यं न सुलभम्। ज्ञानेश्वरीसंप्रदायपरंपराप्राप्तज्ञानिन एवाऽनुवादकरणे समर्था नेतरे इति मतमस्माकम् ।

यद्यपि ज्ञानेश्वर्या· प्रचलितभाषानुवादकैर्महाराष्ट्रीया उपकृतास्तथापि तेषा कृतिर्महाराष्ट्रभाषानभिज्ञाना कन्नडतेलगुतामीलगुर्जरवंगालादिभाषाविदां नोपकारकरणे समर्था । प्रतिभाषाया ज्ञानेश्वर्या अनुवादकरणं त्वशक्यं । कोऽत्रोपायो येन सकलोपनिषत्सारभूता भगवद्गीताया गूढार्थप्रतिपादिका दृष्टांतादिनानालंकारैः समलंकृता ज्ञानेश्वरी स्वकीयानां परकीयाना च जगतीतलवासिना नानाभाषाभिज्ञाना भगवद्गीतागूढार्थं दर्शयिष्यति मोक्षमार्गं चोपदेक्ष्यति । एक एवात्रोपायः संभवति गीर्वाणभाषया ज्ञानेश्वर्या अनुवादः कर्तव्यस्तेन तेषा परेषा चापि लाभः । अथ केचिद्वदिष्यन्ति गीर्वाणभाषा तावन्मृतेति कस्तर्हि तया भाषयाऽनुवादकरणेन लाभः ? । खलु गीर्वाणवाणी मृतेति ये मन्यंते तेषा जडाना प्रज्ञैव मृतेति सत्यम् । अहो यया सुरलोकेऽमरेः सहामृतं पीत्वाऽमृतत्वं संपादित सा कथं मरिष्यति ? । यावद्वेदाः प्रवर्तंते तावद्विप्रमुखे सापि वरीवर्तते इति सिद्धांतः ।

अथ ज्ञानेश्वर्या गीर्वाणभाषानुवादः सर्वेषां लाभप्रदो भवति तेषां परकार्यं घायति इति सत्यं किंतु तस्य करणे कः समर्थ. । परंतु

कात्र चिन्ता ? । भगवत्कृपया किमशक्यम् । मूकं करोति वाचालमीदृशी भगवच्छक्तिः । अहो भाग्येन मया सेश्वरीशक्तिरच प्रत्यक्षीकृता । जतपुरनिवासिना खासनीसोपाह्वेनानंतनाम्ना विष्णुशर्मतनुजनुषा न्यायाधीशपदसमलंकृतेन ज्ञानेश्वर्याः प्रतिपद्यं गीर्वाणभाषया समलंकृतमिति दृष्टिपथमापतितम् । ईश्वरानुग्रहादृिना नैतत्संभवति ।

अहो दशसहस्रसंख्याकसंस्कृतपद्यमयी रचना भगवत्कृपया विना कथं संपादयति पामरो मानवः । खलु भूषणमिदं खासनीसोपाह्वानामनंतशर्मणाम् । स्तुत्योऽयं प्रयत्नः । सत्येयं भगवत्सेवा । सदुपयोगोऽयं विद्यायाः । उचितोऽयं व्यवसाय इति मन्ये ।

दशसहस्रसंस्कृतपद्ययुता निर्मितापि ज्ञानेश्वरीयं द्रव्याभावेनैतावत्कालपर्यंतं मुद्रणसंस्कारेण न संस्कृता किंतु यथावत्स्वरूपा स्वस्थाने पेटिकायां स्थितेति दृश्यते ।

लेखकस्य सरलमतित्वमपि मुद्रणसंस्कारविलंबने कारणमभूत् । प्रसंगतया तस्य निदर्शनमपि नाप्रासंगिकम् । गीर्वाणज्ञानेश्वरीयं खासनीसमहोदयैः पुण्यपत्तनस्थ ओकोपाह्वमहादेवशर्मणः साहाय्येन मुद्रयितव्येति मनसि निधाय तैः सह समयः कृतः । तेन च संवत्सरपर्यंतमियं हस्तलिखिता ज्ञानेश्वरी ओकमहाशयानां हस्ते निरूढा । संशोधनवितरणमपि खासनीसमहोदयैर्दत्तं ओकमहाशयैरपि गृहीतम् । संवत्सरान्ते ओकमहोदयैरभिनवा स्वनिर्मिता षडध्यायपर्यंता संस्कृतपद्यमयी ज्ञानेश्वरी मुद्रिता । कृतसमया चेयं गीर्वाणज्ञानेश्वरी गृहीतेन वितरणेन सह तैः प्रेषिता स्वस्थाने । अस्य ग्रंथस्य मुद्रणसंस्कारस्य विलंबने इदं प्रधानं कारणम् । भवतु इयं गीर्वाणज्ञानेश्वरी नास्माभिः

साकल्येन विलोकिता परं तस्या यावान्भागो दृष्टिगोचरोऽभूत्तावता भागेनैवास्य ग्रंथस्य सुबोधत्वं, सरलत्वं, सरसत्वं, मूलपद्यार्थानुसारित्वं च दृष्ट्वा पंडितानामादरायायं ग्रंथोऽर्हतीति निःशंकं ब्रूमः । अस्य ग्रंथस्य सुबोधकत्वप्रदर्शनार्थं कानिचित्पद्यान्युदाह्रियन्ते ।

मूळ—तरी स्वाधिकाराचेनि मार्गे । आलें जें मानिलें आंगें ।
पतिव्रतेचेनि परिष्वंगें। प्रियातें जैसें ॥ अ. १८ ओ. ५८६

अनुवादः—स्वाधिकारेण संप्राप्तं यत्तत्कर्म प्रियं यथा ।
पतिव्रतापरिष्वंगः प्रियाय भवति प्रियः ॥

मूळ—सांवळ्या आंगा चंदन । प्रमदालोचनां अंजन ।
तैसें अधिकारासी मंडण । नित्यपणें जें॥ अ. १८ ओं. ५८७

अनुवादः—चंदनं श्यामकाये वा प्रमदादृशि कज्जलम् ।
यथा तथाधिकारस्य नित्यं यन्मंडनं भवेत् ॥

मूळ—तें नित्यकर्म भलें । होय नैमित्तिकीं सावाइलें ।
सोनयासी जोडलें । सौरम्य जैसें ॥ अ. १८ ओ. ५८८

अनुवादः—तदेव नित्यं निर्दोषं साह्यं नैमित्तिकं पुनः ।
सुगंधयुक्तसौवर्णं समं वाभाति तत्तदा ॥

मूळ—आणी आंगा जीवाचि संपत्ती । वेंचूनि करी बाळाची पाळती । परी जातें उबगणें हे स्थिती। न पाहे माय ॥
अ. १८ ओ. ५८९

अनुवादः—वित्तक्षयो जीवनाशः कायक्लेशो न गण्यते ।
बाला सुतपने रक्षा परं नोद्विजते कदा ॥

मूलं–समर्थाचिये पंक्तिभोजनें । तळिल्या वरिल्या एकचि पक्वान्नें ।
तेंवि श्रवणें अर्थें पठणें । मोक्षुचि लाभे ॥ अ. १८ ओ. ४८

हांजी संन्यासु आणि त्यागु । इयां दोहीं एक अर्थी लागु ।
जैसा संघातु आणि संघु । संघातेंचि बोलिजे ॥ अ. १८ ओ. ८७

अनुवादः–समं समर्थपंक्तिस्थोच्चावचानां हि भोजनम् ।
तथा श्रवणार्थपठनैस्त्रिभिर्मोक्षः फलं समम् ॥

संन्यासश्च तथा त्यागो द्वावप्येकार्थवाचकौ ।
यथा संघश्च संघातः कोऽर्थभेदस्तयोः प्रभो ! ॥

भवतु । एतावन्त्येव पद्यानि स्थालीपुलाकन्यायेन धीमतां वाचकानां चेतसि ग्रंथस्य सुबोधत्वे विश्वासमुत्पादयिष्यंतीत्याशास्ते—

विद्वद्वशंवदः

विद्याभूषणस्तांवेशास्त्री ।

श्रीज्ञानराजाय नमः

गीर्वाणज्ञानेश्वरी

द्वितीयो भागः

सप्तमोऽध्यायः

मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥ १ ॥
ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः ।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते ॥ २ ॥

अस्मिन्नध्याये करुणानिधिर्भगवान् यद्योगजन्यं ज्ञानं तदेव स्फुटीकुरुते विज्ञानमिति ज्ञेयम् ।

अनंतो भगवान्पार्थमुवाच श्रूयतामिति ।
इदानीं योगसंपन्नः संजातस्त्वमसि ध्रुवम् ॥ १ ॥
एवं वेत्सि समग्रं मां स्वहस्ततलरत्नवत् ।
विज्ञानसहितं ज्ञानं तेऽहं वक्ष्याम्यशेषतः ॥ २ ॥
विज्ञानेनात्र किं कार्यं मनसा मन्यसे यदि ।
प्रपंचाख्यं तदेवादौ ज्ञातव्यमिति मे मतम् ॥ ३ ॥
ततो ज्ञानोदये बुद्धि-दृष्टयश्चञ्चला अपि ।
भवंति कुंठिताः सम्यङ् नावस्तीरस्थिता इव ॥ ४ ॥
तथा न यत्राविशति मतिः स्याच्च पराङ्मुखी ।
विचारणा भवेत्तर्को नोत्कंठां यत्र धारयेत् ॥ ५ ॥
ज्ञानं तदेव जानीहि कौंतेयान्यत्प्रपंचकम् ।
विज्ञानाख्ये तदज्ञानं प्रपंचे सत्यधीस्तथा ॥ ६ ॥

संहरेत्सर्वमज्ञानं विज्ञानं चाखिलं दहेत् ।
ज्ञानं च स्वस्वरूपस्य केवलं चोद्भवेत्तदा ॥ ७ ॥
येन वक्तुर्निरुद्धा गीः श्रोतुश्च श्रवणं तथा ।
अयं स्थूलश्च सूक्ष्मोऽयं नेति भेदोऽवशिष्यते ॥ ८ ॥
एवं रहस्यं गूढं यत्करिष्ये तत्प्रकाशितम् ।
यतः स्वल्पेनापि येन पूर्णं स्यान्मनसेप्सितम् ॥ ९ ॥

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥ ३ ॥

मनुष्याणां सहस्रेषु ज्ञानेच्छुर्विरलो जनः ।
जिज्ञासुष्वपि कश्चिन्मां विरलो वेत्ति तत्त्वतः ॥ १० ॥
जनाकीर्णे त्रिभुवने शोधयित्वा स्थले स्थले ।
शूरांश्च लक्षशः सेनासंघं कुर्याद्यथोचितम् ॥ ११ ॥
रणे सह्याच्छस्त्रघातान् शरीरे तेषु यो नरः ।
जयश्रीपीठ आरूढो ह्येक एव स दैवभाक् ॥ १२ ॥
आस्थानद्या महापूरे विशन्ति नरकोटयः ।
कश्चित्तेषामात्मतीरं प्राप्नोति विरलः सुधीः ॥ १३ ॥
तस्मान्नैतद्धि सुलभं वक्तुं कष्टतरं महत् ।
यदस्ति तद्वदिष्येऽहमथ त्वं प्रस्तुतं शृणु ॥ १४ ॥

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ४ ॥

महत्तत्त्वादिकं सर्वं मन्मायामवधारय ।
यथा धनंजय छाया निजांगप्रतिबिंबिता ॥ १५ ॥
मायां तु प्रकृतिं विद्याद्विधा सा त्वष्टधा स्मृता ।
यया संपद्यते लोकत्रयमेतद्विदांकुरु ॥ १६ ॥
कथं भिन्नाऽष्टधा माया यदीत्थं शंकसे हृदि ।
शृणु त्वं सावधानेन मदुक्तं व्याकृतं वचः ॥ १७ ॥

आपो भूमिर्मनो वायुरग्निः खं बुद्धिरेव च ।
अहंकारश्चेति भिन्ना स्मृता प्रकृतिरष्टधा ॥ १८ ॥

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥ ५ ॥

साम्यावस्था च याऽष्टानां पार्थ सा प्रकृतिर्मम ।
परमा जीवभूतेति नाम्ना चेयं व्यवस्थिता ॥ १९ ॥
सैषा जडाञ्जीवयति चैतन्यं चेतयत्यपि ।
मनसा मानयित्री च शोकमोहादिकस्य तु ॥ २० ॥
ज्ञानं हि यस्याः सान्निध्याद्बुद्धेरंगे प्रजायते ।
अहंकारस्य कौशल्याज्जगद्धारयते च या ॥ २१ ॥

एतद्योनीनि भूतानि सर्वाणीत्युपधारय ।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ ६ ॥

प्रकृतिश्च यदा सूक्ष्मा स्थूलप्रकृतिमाश्रयेत् ।
तदैवोद्घाट्यते प्राणिटंकशाला सुविस्तृता ॥ २२ ॥
मूल्यत्वेन न भिद्यन्ते चतुर्धा जारजादयः ।
भेदास्त्वाकारमात्रेण स्वेच्छया ते प्रकीर्तिताः ॥ २३ ॥
कौतुकं पश्य भाण्डारं प्राणिमुद्राप्रपूरितम् ।
चतुरशीतिर्लक्षाणि भितिरन्या ह्यसंख्यकाः ॥ २४ ॥
पतन्ति सततं तस्मिन् जीवमुद्रा ह्यनेकशः ।
समृद्धा लेखनं तासां प्रकृतिः कुरुते स्वयम् ॥ २५ ॥
उत्पादितानि भूतानि संस्कृतानि मुहुर्मुहुः ।
कर्माकर्मव्यवस्थायाः प्रवृत्तिं दर्शयत्यपि ॥ २६ ॥
अस्तिवदं रूपकं वच्मि स्पष्टं शृणु यथातथम् ।
करोति प्रकृतिस्तावद्विस्तारं नामरूपयोः ॥ २७ ॥
प्रकृतिः सा तु मय्येव मिथ्याभूता हि भासते ।
स्फुरतो जगतो मत्तो ह्यादिमध्यावसानकाः ॥ २८ ॥

मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ ७ ॥

इदं मृगजलं रश्मिरूपाकारेण भासते ।
तन्मूलान्वेषणे तच्च भानुरूपेण तिष्ठति ॥ २९ ॥
जानीहि प्रकृतेः सृष्टिं किरीटिंस्त्वं तथैव हि ।
कृते तदुपसंहारे तिष्ठाम्येको हि केवलम् ॥ ३० ॥
एवं दृष्टमदृष्टं च तन्मय्येव भवत्यहो ।
अहं च धारये विश्वं सूत्रं मणिगणानिव ॥ ३१ ॥
यथा सुवर्णमणयो हेमसूत्रेण गुम्फिताः ।
मयैव धार्यते तद्वत्सबाह्याभ्यन्तरं जगत् ॥ ३२ ॥

रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः ।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥ ८ ॥
पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥ ९ ॥

रसोऽस्मि तस्मादुदके स्पर्शश्च पवने तथा ।
अहमस्मीति जानीहि प्रकाशः शशिसूर्ययोः ॥ ३३ ॥
तथा नैसर्गिकः शुद्धः पृथिव्यां गन्ध एव च ।
शब्दश्च गगने चास्मि वेदेषु प्रणवस्तथा ॥ ३४ ॥
नरत्वं नृष्वहङ्कारोऽहंभावेषु तथैव च ।
पुरुषे पौरुषं यत्तु प्रोक्तं तदहमेव च ॥ ३५ ॥
मद्धामकवचं तेजोरूपं धत्ते धनंजयः ।
तच्चापसार्य मद्रूपं पश्यसि त्वं धनंजय ॥ ३६ ॥
नानायोनिषु जातानि भूतानि विविधानि च ।
स्वस्वभक्ष्येण जीवन्ति वर्तन्ते भुवनत्रये ॥ ३७ ॥

१ अग्नि॰.

केचिद्वातभुजः केचित्सन्ति जीवास्तृणाशनाः ।
केचिदन्नेन जीवंति केचित्तु जलपानतः ॥ ३८ ॥
यदन्नं यस्य भूतस्य दृश्यते च पृथक् पृथक् ।
तत्तत्सर्वमहं विद्धि तन्नैक्यं तत्त्वतः स्फुटम् ॥ ३९ ॥

बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् ।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥ १० ॥

बलं बलवतां चाहं कामरागविवर्जितम् ।
धर्माऽविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥ ११ ॥

अंकुरोऽक्षरबीजस्य वर्धते गगनोपमः ।
उत्पत्तिकाले व्याप्नोति प्रणवस्याक्षरत्रयम् ॥ ४० ॥
साकारं दृश्यते यावद्भिर्थं तावत्तदाकृतिः ।
बीजं प्रलयकाले तु निराकारं गमिष्यति ॥ ४१ ॥
अनादि चैवं सहजं विश्वबीजमिदं महत् ।
इदं करतले तेऽद्य प्रददामीह केवलम् ॥ ४२ ॥
मदर्पितं यदा बीजं संपदयसि विवेकतः ।
तदा तस्योपयोगं हि सम्यग्जानासि पाण्डव ॥ ४३ ॥
किमप्रासङ्गिकैर्वाक्यैरथ संक्षेपतो ब्रुवे ।
तपस्विषु तपो यत्तन्मद्रूपं विद्धि सात्विकम् ॥ ४४ ॥
गाढं बलं बलवतामहमस्मि तथैव च ।
बुद्धिर्बुद्धिमतामस्मि विद्धीत्थं त्वं धनंजय ॥ ४५ ॥
भूतेषु दृश्यते कामः सोऽहं कृष्णः सनातनः ।
येन धर्मः सुविपुलो भवेदर्थप्रदायकः ॥ ४६ ॥
विकारविस्तरात्काम इन्द्रियार्थान्ददाति सः ।
किन्त्विन्द्रियाणि गच्छेयुर्धर्मस्यैकपथा यथा ॥ ४७ ॥
निषेधस्य दुरध्वानं त्यक्त्वा विधिपथा चरेत् ।
तदा विधिप्रदीपोऽपि भवेत्तस्य पुरःसरः ॥ ४८ ॥

काम एवंप्रकारेण वर्तते तेन धर्मभाक् ।
मोक्षतीर्थेन संसारान्मुक्तो भवति मानवः ॥ ४९ ॥
सृष्टेर्लतां वर्धयति स वेद-स्तुति-मण्डपे ।
मोक्षं स्पृशन्ति पर्णानि तस्याः कर्मफलानि च ॥ ५० ॥
नियताचारकंदर्पो भूतानां बीजरूपकः ।
स एव योगिनामस्मि विद्धि बीजप्रदः पिता ॥ ५१ ॥
किमेकैकविधानेन वस्तुजातं किलाखिलम् ।
मत्त एव समुत्पन्नं विश्वे विस्तारितं च यत् ॥ ५२ ॥

ये चैव सात्त्विका भावा राजसास्तामसाश्च ये ।
मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥ १२ ॥

सात्विका राजसाश्चैव भावा ये तामसास्तथा ।
मत्त एव समुत्पन्नास्ते सर्वे विद्धि पाण्डव ॥ ५३ ॥
यदि ते मयि तिष्ठन्ति नाहं तिष्ठामि तेषु वै ।
मज्जेत्स्वप्नह्रदे सुप्तो जागृतो नैव मज्जति ॥ ५४ ॥
घनीभूतरसेनैव घटितः कणबीजकः ।
तस्माच्चैवांकुरोत्पत्तिरंकुरात्काष्ठसंभवः ॥ ५५ ॥
बीजे काष्ठगुणाः सन्ति काष्ठे बीजगुणा न ते ।
तथा विकारा वर्तंते मयि वर्ते न तेष्वहम् ॥ ५६ ॥
गगनेऽभ्रसमुत्पत्तिर्नाभ्रे गगनसंभवः ।
अभ्रादुत्पद्यते वारि वारिण्यभ्रं न दृश्यते ॥ ५७ ॥
जलात्संजायते विद्युत्सर्वलोकप्रकाशिनी ।
जलवेगसमुत्पन्ना तस्यां किं वर्तन्ते जलम् ॥ ५८ ॥
धूमस्योत्पत्तिरनलात् किं धूमे पावको वसेत् ।
तथा यो मद्विकारः स नाहं यद्विकारवान् ॥ ५९ ॥

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥ १३ ॥

जलोत्पन्नं हि शैवालं जलस्याच्छादकं भवेत् ।
नभोत्थानि चाऽभ्राणि छादयन्ति नभस्तलम् ॥ ६० ॥
स्वप्नोऽलीकः किन्तु सुप्तस्तं सत्यत्वेन पश्यति ।
सुप्तोऽस्मीति स्मृतिरपि नैव स्मारयति क्वचित् ॥ ६१ ॥
अस्त्विदं चाथ दृष्टान्तः पटलं नेत्रसंभवम् ।
द्रष्टृत्वं नेत्रयोस्तच्च गिलत्येव न किं पुनः ॥ ६२ ॥
तथा त्रिगुणसंयुक्ता मच्छाया मयि विम्बिता ।
सा छादयति मामेव यथा जवनिका तथा ॥ ६३ ॥
अतो भूतानि गच्छन्ति न मां मत्संभवान्यपि ।
जलत्वं न प्रपद्यन्ते यथा मुक्ता जलोद्भवाः ॥ ६४ ॥
घटो मृण्मय आमश्चेन्मृत्त्वं प्राप्नोति सत्वरम् ।
स पचानलसंयोगान्मृद्भिन्नो भवति स्वयम् ॥ ६५ ॥
ममैवांशो भूतजातमखिलं किं तु मायया ।
सर्वं जीवदशां प्राप निसर्गान्मां स्थितं यत ॥ ६६ ॥
अतस्ते मत्पुत्रपौत्राः सन्तो जानन्ति मां न ते ।
अहंममधिया भ्रान्ता विषयान्धा यतः सदा ॥ ६७ ॥

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ १४ ॥

महत्तत्त्वादिरूपेण या माया पार्थ वर्तते ।
कथं यास्यसि तां तीर्त्वा तद्रूपं शृणु सत्तम ॥ ६८ ॥

मायावर्णनम्—

इयं माया मदिच्छा प्रवाचलसमुद्भवा ।
संकल्पाम्बु प्रवहती या महाभूतबुद्बुदा ॥ ६९ ॥
सर्वापः सृष्टिविस्तारो वेगः कालगतिस्तथा ।
तटे प्रवृत्तिनिवृत्त्योर्मज्ज्य पतति सान्तरे ॥ ७० ॥
गुणत्रयत्वरेण मोहपूरगमाकुला ।
आहत्य नगरे याति यमस्य नियमस्य च ॥ ७१ ॥

मत्सरभ्रमणैर्युक्ता द्वेषावर्तसमाकुला ।
प्रमादादिमहामीनसंपन्ना सा तरंगिणी ॥ ७२ ॥
कर्माकर्ममहापूरा प्रपंचघरणैर्युता ।
व्याप्ता चावकरैराढ्या तटिनी सुखदुःखयोः ॥ ७३ ॥
द्वीपमत्र स्थितं कामवीचयस्ताडयन्ति वै ।
यत्रास्ति विपुलो जीवफेनो मायाभिधास्ति सा ॥ ७४ ॥
अहंकारौघसंजात-मदत्रय-तरंगिणी ।
तथा विषयवीचीनां कल्लोलैः सा समाकुला ॥ ७५ ॥
उदयस्य तथास्तस्य जन्ममृत्य्वोः समुद्भवाः ।
उत्पद्यन्ते विलीयन्ते बुद्बुदाः पांचभौतिकाः ॥ ७६ ॥
संमोहविभ्रमौ मत्स्यावत्तो धैर्यामिषं हि तौ ।
अज्ञानबृहदावर्ता भ्रमन्ति भयदायकाः ॥ ७७ ॥
भ्रमपङ्कजले चैवमास्थापंके निमज्जिताः ।
रजोगुणस्य कल्लोलैः स्वर्गं गर्जन्ति पामराः ॥ ७८ ॥
तमोवारिबृहत्पाता दृढे सत्त्वे पतन्ति वै ।
यत्रेदृशी दुस्तरेयं मायानिर्झरिणी स्मृता ॥ ७९ ॥
पुनर्जन्मप्रवाहेण सत्यलोकस्थिता गडाः ।
आयाताद्गद्गडायन्ते ब्रह्माण्डस्था दृषद्गणाः ॥ ८० ॥
महावेगप्रवाहेऽस्या न कस्यापि पदं स्थितम् ।
दृष्टं नाद्यापि कस्तर्हि मायापूरं तरिष्यति ॥ ८१ ॥
ये कार्यास्तरणोपायास्ते हि गच्छन्त्यपायताम् ।
आश्चर्यं पश्य पार्थ त्वं शृणु चेदं वचो मम ॥ ८२ ॥
स्वयं बुद्धिबलेनैव गतानां नास्ति दर्शनम् ।
मज्जितास्ते ज्ञानगर्वाज्ज्ञानस्यैव ह्रदे बत ॥ ८३ ॥
वेदालाबुतरिस्था ये सर्वेऽहंभावमाश्रिताः ।
ते गता मदमीनस्य मुखे दैवहताः किल ॥ ८४ ॥
यौवनस्य बलेनैव धृत्वा मन्मथकच्छपम् ।

१ अत्र मूले तमसः शीघ्रगामित्वं सत्त्वस्य मन्दत्वं ज्ञानेश्वरीटीप्पणीकारो मन्यते तदसाधु.

गच्छन्तो विषयैर्नक्रैश्चूर्णितास्तेऽल्पबुद्धयः ॥ ८५ ॥
वार्धक्याख्यतरंगेषु मतिभ्रंशस्य जालकम् ।
कवलीकुरुते शश्वत्पलितं तानितस्ततः ॥ ८६ ॥
दुःखाचलतटात्केचित्क्रोधावर्ते पतंति तान् ।
आपद्गृध्राश्चंचुघातैस्ताडयन्ति समुत्थितान् ॥ ८७ ॥
दुःखपंकेन लिप्तास्ते पश्चान्मरणवालुकाम् ।
विशन्त्येवं वृथा सर्वे गतास्ते कामकिंकराः ॥ ८८ ॥
यज्ञक्रियाख्यमंजूषां बध्वा स्वजठरे गताः ।
ते दिव्यसुखशैलस्य कन्दरे पतिताः स्वयम् ॥ ८९ ॥
कर्मबाहुषु विश्वस्तास्तत्तु मोक्षार्थिनोऽपतन् ।
अटन्ति मूढास्ते सर्वे मार्गे विधिनिषेधयोः ॥ ९० ॥
विवेककर्णधारेण रहिताः कुण्ठिता यदि ।
वैराग्यतरणिर्नैव कोऽत्र तारयितुं क्षमः ॥ ९१ ॥
तस्माद्दृढबलेनैव मायागङ्गां तराम्यहम् ।
इति मूर्खाद्विना कोऽत्र वदेत्पार्थ विचारवान् ॥ ९२ ॥
पथ्येऽसति गदो नश्येत्साधुर्दुष्टमतिर्भवेत् ।
रागी भवेत्त्यक्तरागस्तर्हि मायानदीं तरेत् ॥ ९३ ॥
तस्कराय सभा रोचेत् किं वा मीनो गलं गिलेत् ।
भवेत्पिशाचोऽपि भीतस्तर्हि मायानदीं तरेत् ॥ ९४ ॥
मृगपोतो वागुरां वै छिन्द्यान्मेरुं च लंघयेत् ।
पिपीलिका तर्हि पश्येज्जीवो मायानदीतटम् ॥ ९५ ॥
अतः पार्थ जयेत्कांतां सकामो न यथा तथा ।
जीवोऽपि न तरेत्कश्चिदिमां मायामयीं नदीम् ॥ ९६ ॥
तथापि मां गतास्तीर्त्वा लीलया तान् शृणुष्व भोः ।
अनन्याश्चिन्तयन्तो मां दृढवैराग्यसंश्रिताः ॥ ९७ ॥
नाविकः सद्गुरुर्येषां तरिरात्मनिवेदनम् ।
ब्रह्मादिकृदृष्टचरितं ते तीर्त्वा मायानदीं गताः ॥ ९८ ॥

---

१ अरिष्टे–सुखम्.

त्यक्त्वाहङ्कारभारं ते विकल्पपवनात्तथा ।
वारिप्रवाहात्संरक्ष्य तीर्त्वाऽगच्छन् विरागिणः ॥ ९९
आत्मबोधतरिर्यैषामैक्यधीर्नाविकस्तथा ।
गता निवृत्तिकूलं ते सुखेनैव मनीषिणः ॥ १०० ॥
उपरत्याख्यबाहुभ्यां सोऽहंभावबलेन च ।
तरन्ति मायां गच्छन्ति मुक्तिमप्यपराजिताः ॥ १०१ ॥
मामेवमभजन्भक्तास्तीर्त्वा मायां गता हि ते ।
किन्त्वेवं विरला दृष्टा मद्भक्तेषु धनंजय ॥ १०२ ॥

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
माययापहृतज्ञाना आसुरं भावमाश्रिताः ॥ १५ ।
चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ १६

अहङ्कारपिशाचेन ग्रस्ता जीवा अनेकशः ।
गतास्त आत्मबोधस्य सर्वथैवातिविस्मृतिम् ॥ १०३ ॥
तदा नियमवस्त्रं ते विस्मृत्याधोगतित्रपाम् ।
त्यक्त्वा वेदोक्तकर्माणि नैव कुर्वन्ति निस्त्रपाः ॥ १०४ ॥
यदर्थमागता देहग्रामं तान्पश्य पाण्डव ।
तत्सर्वं विस्मृताः सर्वे भूत्वोन्मत्ता भवन्ति च ॥ १०५ ॥
इन्द्रियग्राममार्गेषु षड्विकारसमन्विताः ।
अहंममेति जल्पन्तो नृत्यन्ति च गतत्रपाः ॥ १०६ ॥
आधिव्याधिकशाघातान्न स्मरन्त्यविवेकिनः ।
किमत्र कारणं मायाप्रासादन्यच्च चास्ति भोः ॥ १०७ ॥
ते नानुयन्ति तस्मान्मां भजन्त्यन्ये चतुर्विधाः ।
यैरेवात्महितं सम्यक्कृतं संवर्धितं[1] च तत् ॥ १०८ ॥
तेषां वै प्रथमश्चार्तो जिज्ञासुस्तु द्वितीयकः ।
अर्थार्थी च तृतीयः स्याज्ज्ञानी स्याच्च चतुर्थकः ॥ १०९ ॥

---

1 टिप्पणीमनुलक्ष्य 'संवर्धकं' इत्यपि युज्येत.

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥ १७ ॥

तत्रार्तो ह्यार्तिनाशाय जिज्ञासुर्ज्ञानहेतुना ।
अर्थार्थी धनलाभाय भजन्ते मां सहेतुकाः ॥ ११० ॥
चतुर्थोऽहेतुको ज्ञानी भजते मामनन्यभाक् ।
अतएव स मद्भक्त एक एव ब्रवीमि ते ॥ १११ ॥
ज्ञानी ज्ञानप्रकाशेन भेदाभेदतमो हरेत् ।
पश्चान्मद्रूपतां गच्छेद्विभक्तो न भवेत्कदा ॥ ११२ ॥
स्फटिकेषु जलाभासस्तथैवान्येषु भासते ।
सामरस्यं तथा ज्ञानी नास्त्यालोचय कौतुकम् ॥ ११३ ॥
गगनेऽपि स्थितो वातो वातत्वं नैव मुञ्चति ।
तथा मद्रूपभक्तोऽपि भक्तत्वं नैव मुञ्चति ॥ ११४ ॥
चालितस्तालवृन्तेन वायुर्भिन्नो नभादिति ।
भाति शान्ते स्थिते वाते नभ एव यथा तथा ॥ ११५ ॥
शारीरकर्मभिर्लोकैर्भक्त इत्यवगम्यते ।
अन्तःप्रतीतिधर्मेण सोऽहंरूपोऽस्ति केवलम् ॥ ११६ ॥
आत्माहमहमेवात्मेत्युदिते ज्ञानभास्करे ।
इति जानात्यतो ह्यात्तं जाने सोऽहमेव च ॥ ११७ ॥
जीवात्परं हृदात्मानं ज्ञात्वा यो वर्तते सदा ।
स कथं देहभेदेन मत्तो भिन्नत्वमाप्नुयात् ॥ ११८ ॥

उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥१८॥

ये सकामास्तेऽपि भक्ता मत्प्रिया एव सर्वदा ।
परं मदीयोऽयमिति प्रीत्याऽहं ज्ञानिनं ब्रुवे ॥ ११९ ॥
यद्येदं दुग्धकामो हि पाशबद्धां करोति गाम् ।
विना रज्जुं सैव वत्सं क्षीरं पाययति स्वयम् ॥ १२० ॥
चारेण. भक्तस. प्राणैर्नात्यन्तमतुः परं कश्चित् ।

सर्वत्र मातृभावो हि धेनौ वत्सस्य दृश्यते ॥ १२१ ॥
अतोऽनन्यां चिन्तयन्तं वत्सं प्रीतिकरा भवेत् ।
धेनुस्तथैव मत्प्रीतिर्ज्ञानिन्याह रमापतिः ॥ १२२ ॥
पुरा ये कथिता भक्तास्तेऽपि मान्या धनंजय ।
किं तु मान्यतरस्तेभ्यो ज्ञानी तत्कारणं शृणु ॥ १२३ ॥
ज्ञानोदये समुद्भूते संसारं विस्मरत्यसौ ।
यथा समुद्रमापन्ना सरित्पश्चान्न गच्छति ॥ १२४ ॥
आत्मप्रतीतिराख्याता गङ्गांतःकरणोद्भवा ।
मामेव सागरं प्राप्ता यस्य सोऽहं ब्रुवे किमु ॥ १२५ ॥
एवं हि विश्रुतो ज्ञानी चैतन्यं मम केवलम् ।
न वक्तव्यमिदं किन्तु प्रसङ्गादुदितं मया ॥ १२६ ॥

बहूनां जन्मनामंते ज्ञानवान्मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥ १९ ॥

कामादिव्यालसंयुक्तात्सान्द्राद्विषयकाननात् ।
आगतः स बहिर्भूमिं स्थितः सद्वासनामयीम् ॥ १२७ ॥
ततो दुष्कर्मपन्थानं कुटिलं सत्समागमैः ।
त्यक्त्वा वीर स सत्कर्मपंथानं सरलं व्रजेत् ॥ १२८ ॥
एवं जन्मशतं भक्तिमार्गेण प्रचरन्नसौ ।
पादत्राणं विनाऽऽशायाः पान्थः किं गणयेत्फलम् ॥ १२९ ॥
गच्छन् शारीरिकेऽज्ञाने निशि यो निरुपाधिकः ।
तस्य कर्मक्षयो भूत्वा ज्ञानदीप्त्या भवत्युषः ॥ १३० ॥
तस्मिन् गुरुकृपारूपे प्रभाते ज्ञानरश्मयः ।
पतन्ति कोमलाः पश्चात्साम्यर्द्धेर्दर्शनं भवेत् ॥ १३१ ॥
साम्यदृष्ट्या युतो यत्र यत्र गन्तुं स चेच्छति ।
तत्र तत्रैव मां पश्येत्स्वस्थे सत्यपि तत्तथा ॥ १३२ ॥
जलमग्ने घटे तस्य जलमन्तर्बहिर्यथा ।
तथैव मद्विना नान्यत्तस्य किञ्चिद्धि वर्तते ॥ १३३ ॥
स तथैव ममांतस्थस्तस्य चान्तर्बहिस्त्वहम् ।

न शक्यं वचसा वक्तुमवाच्यत्वाद्यथार्थतः ॥ १३४ ॥
अतो ब्रवीम्यहं तेन ज्ञानागारं स पश्यति ।
तथैव चरतस्तस्य विश्वं भाति स्वमात्मकम् ॥ १३५ ॥
समस्तं वासुदेवेति मनस्येषा च भावना ।
एवं प्रतीतियुक्तस्तु ज्ञानी भक्ततमो मतः ॥ १३६ ॥
यस्य स्वानुभवागारे ग्रस्तं स्याच्च चराचरम् ।
धनुर्धर भवन्नेवं स महात्मा सुदुर्लभः ॥ १३७ ॥
किरीटिन्यहवश्चात्र भजन्ते भोगहेतुतः ।
आशातिमिरदृष्ट्या च विषयान्धा भवन्ति हि ॥ १३८ ॥

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः ।
तं तं नियममास्थाय प्रकृत्या नियताः स्वया ॥ २० ॥

फलाशा यस्य हृदये चास्ते कामस्य संचरः ।
तयोरेव हि संसर्गाज्ज्ञानदीपः प्रणश्यति ॥ १३९ ॥
एवमन्तर्बहिश्चान्धा न मां पश्यन्ति पाण्डव ।
समीपस्थमपि त्यक्त्वा भजन्त्यन्यतरं च ते ॥ १४० ॥
आदौ प्रकृत्या ह्यवशा भोगैर्दीनास्ततः कृताः ।
तल्लोलुपाश्च ते सर्वे भजन्ति पश्य कौतुकम् ॥ १४१ ॥
तेषां नियमबुद्धिः का कथं वा ह्युपचारकाः ।
किंवा विहितकृत्यस्य ह्यर्पणं किं यथाविधि ॥ १४२ ॥

यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।
तस्य तस्याऽचलां श्रद्धां तामेव विदधाम्यहम् ॥ २१ ॥

योऽप्यन्यदेवताभक्तो भजते देवतान्तरम् ।
तथा तद्भजकानां वै कामपूरयितास्म्यहम् ॥ १४३ ॥
देवो देव्यप्यहमिति ते विस्मृत्याऽविवेकिनः ।
तत्र तत्र पृथग्भावं धारयन्त्येव ते तथा ॥ १४४ ॥

---

१ कुर्वीत इति ज्ञेयं.

स तया श्रद्धया युक्तस्तस्याराधनमीहते ।
लभते च ततः कामान्मयैव विहितान्हि तान् ॥ २२ ॥

तया च श्रद्धया युक्तास्तदाराधनतत्पराः ।
उचितं कर्म कुर्वन्ति सिद्धिप्राप्त्यवधौ हि ते ॥ १४५ ॥
एवं यद्यद्भावयन्ति फलं तत्तल्लभन्ति ते ।
किन्तु तत्सकलं मत्तो विद्धि प्राप्नोति निश्चितम् ॥ १४६ ॥

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ।
देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि ॥ २३ ॥

आशापाशान्न मुञ्चंति न मां जानन्ति पामराः ।
आशावद्धा अंतवच्च फलमेव लभन्ति ते ॥ १४७ ॥
बहुनात्र किमुक्तेन तद्धि संसारसाधनम् ।
भजनं फलभोगश्च क्षणिकं स्वप्नवद्भवेत् ॥ १४८ ॥
इदमस्तु ममाभीष्टं यजते यो हि देवताम् ।
तद्देवतां समापन्नो भवेद्वै तदुपासकः ॥ १४९ ॥
एवं तनुमनःप्राणैर्ये मन्मार्गानुसारिणः ।
ते हि देहस्य निर्वाणे मद्रूपाश्च भवंति हि ॥ १५० ॥

अव्यक्तं व्यक्तिमापन्नं मन्यंते मामबुद्धयः ।
परं भावमजानंतो ममाव्ययमनुत्तमम् ॥ २४ ॥

अकुर्वाणा निजहितं ते निमज्जंति मानवाः ।
सल्पेपि सहसा मूढाः करस्थितजले यथा ॥ १५१ ॥
सुधासिंधुनिमग्नस्य किमर्थं मुखमीलनम् ।
किमर्थं पूतिगंधस्य चिंतनं पल्वलोदकम् ॥ १५२ ॥
सुधामग्नस्य मरणं युक्तं किं स्याद्धनंजय ।
भूत्वा सुधामयस्तत्र वासोऽयुक्तो भवेत्किमु ॥ १५३ ॥
फलाशापंजरं त्यक्त्वा स्वामी स्याच्च चिदंबरे ।
प्रतीतिरूपपक्षाभ्यां किं न युक्तं धनुर्धर ॥ १५४ ॥

यन्नोन्नतिप्रभावेण सुखवृद्धिर्भवेत्सदा ।
स्वेच्छया सुखसंचारो यत्र कुत्र भविष्यति ॥ १५५ ॥
किमर्थमुपमाशून्ये मापनं वा निराकृतौ ।
आकारभावनाऽव्यक्ते युक्ता किं व्यक्तभावना ॥ १५६ ॥
किंत्वेते नहि रोचंते शब्दाः कल्याणदायकाः ।
तेभ्यो नरेभ्यो जानीहि पार्थ ये सिद्धिसेचकाः ॥ १५७ ॥

नाहं प्रकाशः सर्वस्य योगमायासमावृतः ।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥ २५ ॥

योगमायाख्यपटलादंधाः समभवन्खलु ।
तस्माद्देहबलेनैव न मां पश्यंति ते कदा ॥ १५८ ॥
मायां विना वस्तुजातं यत्र कुत्रापि नास्ति वै ।
यथा क्षारजलाद्भिन्नं लवणं नास्ति तत्तथा ॥ १५९ ॥
न वायुः स्पर्शते कं वाऽवकाशो व्याप्नुते न किम् ।
अस्त्विदं चैक एवाहमस्मि विश्वं समग्रकम् ॥ १६० ॥

वेदाहं समतीतानि वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि मां तु वेद न कश्चन ॥ २६ ॥

अतीतान्यत्र भूतानि मन्मयान्येव तानि च ।
वर्तमानानि सर्वाणि तान्यप्यस्म्यहमेव च ॥ १६१ ॥
भविष्याणि च भूतानि मत्तः परतराणि न ।
वस्तुतो न भवेत्किंचिच्छब्दानां क्रीडनं हि तत् ॥ १६२ ॥
यथा रज्जुमये सर्पे कृष्णवर्णादिकल्पना ।
तथा भूतेषु मिथ्यात्वात्कल्पनापि निरर्थका ॥ १६३ ॥
एवं सर्वप्रनुस्यूते मयि भूतेषु पाण्डव ।
संसारश्चैव भूतानां तम्यान्यत्कारणं भवेत् ॥ १६४ ॥
यत्किंचिद्विषये तस्मिन्कथ्यते श्रूयतामिदम् ।
देहस्य चाहंकारस्य सख्यत्वं दृढतां गतम् ॥ १६५ ॥

इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत ।
सर्वभूतानि संमोहं सर्गे यान्ति परंतप ॥ २७ ॥

तत्सङ्गात्कन्यका जाता येच्छानाम्नी सुकामिनी ।
साऽवृणोत्तरुणी द्वेषं स्वयं कामविमोहिता ॥ १६६ ॥
सुखदुःखयमौ पुत्रौ द्वंद्वमोहावसूत सा ।
हार्देन चाऽवर्धयत्तावहंकारपितामहः ॥ १६७ ॥
यमलौ धृतिहीनौ ताविंद्रियाणां च विग्रहे ।
अशक्तौ तौ तुंदिलत्वमिच्छादुग्धेन गच्छतः ॥ १६८ ॥
असंतोषाख्यमदिरामत्तो भूत्वा धनुर्धर ।
सक्तो विषयगर्तेषु विकृतिं नैव गच्छति ॥ १६९ ॥
भावशुद्धिसुमार्गेषु विकल्पाख्यस्तु कंटकान् ।
प्रसार्य पश्चाद्दुर्मार्गानन्विष्यति धनंजय ॥ १७० ॥
ततो भ्रांतानि भूतानि संसाराख्याटवीमगुः ।
महादुःखप्रहारांश्च सहंते तानि नित्यशः ॥ १७१ ॥

येषां त्वंतगतं पापं जनानां पुण्यकर्मणाम् ।
ते द्वंद्वमोहनिर्मुक्ता भजंते मां दृढव्रताः ॥ २८ ॥

एवं दृष्ट्वा विकल्पाख्यान्निष्फलांस्तीव्रकंटकान् ।
न गृह्णंति विकल्पं तं स्वमतिभ्रमकारकम् ॥ १७२ ॥
एकनिष्ठापदाघातैर्ये विकल्पाख्यकंटकान् ।
चूर्णीकुर्वंति ते मुक्ताः पापारण्याद्भवंति वै ॥ १७३ ॥
ततस्ते पुण्यमार्गेण मामागच्छंति सत्वरम् ।
कामादिपिशुनास्तेषां मार्गादपसरंति च ॥ १७४ ॥

जरामरणमोक्षाय मामाश्रित्य यतंति ये ।
ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम् ॥ २९ ॥

भवेद्धि कुंठिता येन जन्ममृत्युपरंपरा ।
रतिरेवंविधे यत्ने येषां समुपजायते ॥ १७५ ॥

यतः कालेन फलदो भवेद्ब्रह्मप्रदायकः ।
यथा पक्वफलं कालाद्रसपूर्णं भविष्यति ॥ १७६ ॥
तदाऽध्यात्मविपाकेन कृतकृत्यो भविष्यति ।
अलं हि कर्मणां कामो विरामो मनसस्तथा ॥ १७७ ॥
एवमध्यात्मलाभो हि भवेत्तस्य धनंजय ।
विधिश्च केवलं तावदहं तस्य समुद्यमे ॥ १७८ ॥
साम्यस्य वर्धनादैक्यसंपत्तस्य निवर्धते ।
तेन भेदाख्यदैन्यस्य स्मृतिरेव न विद्यते ॥ १७९ ॥

साधिभूताधिदैवं मां साधियज्ञं च ये विदुः ।
प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः ॥ ३० ॥

येऽस्पृशन्साधिभूतं मां साकारमधिदैवतम् ।
धृत्वा प्रतीतिहस्तेन ते धन्या भुवि मानवाः ॥ १८० ॥
अधियज्ञोऽहमेवेति दृष्ट्वा ये सततं विदुः ।
नियोगे ते तु देहस्य दुःखहीना भवन्त्युत ॥ १८१ ॥
आयुःसूत्रस्यांतकाले भूतानां भोगसंक्षयम् ।
दृष्ट्वा को न भवेत्खिन्नो युगांतं तं वदेच्च कः ॥ १८२ ॥
दृढीभूता ममांगे तु कति सन्ति न वर्ण्यते ।
प्राणप्रयाणकालेऽपि त्यजंति न च मां हि ते ॥ १८३ ॥
अवश्यं तदिदं विद्धि सन्ति ये निपुणा मयि ।
युक्तांतःकरणास्ते च योगिनः कीर्तिता इति ॥ १८४ ॥
तदैव शब्दकुपिता सावधानांजलिस्तया ।
अर्जुनस्य तदा चित्तमन्यथासीत्पराङ्गस्थितम् ॥ १८५ ॥
ब्रह्मवाक्यफलान्यत्र नानार्थरसयंति च ।
भावपरिमलाढ्यानि सर्वतः प्रसृतान्यलम् ॥ १८६ ॥
मंदानिलः कृपारूपः सहजः कृष्णवृक्षतः ।
वचनाख्यफलं नीत्वा ह्यर्जुनश्रवणेऽर्पितम् ॥ १८७ ॥
फलानि तानि वेदांतमयानि ब्रह्मसागरात् ।

१ पूर्वप्रतिपादितश्लोकस्यार्थे चित्तमासीदिति च ज्ञेयम्

उद्धृत्य परमानंदसितायुक्तकृतानि वै ॥ १८८ ॥
मधुराणां निर्मलानां फलानां रसकांक्षया ।
पार्थो विसयपीयूपपानेऽभूदतितत्परः ॥ १८९ ॥
सुखसंपद्युतस्तेन स्वर्गीयं सुखमल्पकम् ।
जगद्वदः समुल्लासात्कल्पितं हृदयांतरे ॥ १९० ॥
एवं बाह्यांगसंगेन सुखं विस्तरतामगात् ।
तदा रसस्वादनार्थं जिह्वा सोत्कंठिताऽभवत् ॥ १९१ ॥
अनुमानकराग्रेण धृत्वा वाक्यफलानि च ।
स प्रतीतिमुखस्यांतः सन्नियोक्तुमकल्पयत् ॥ १९२ ॥
विचाररसनाऽभक्ष्यान् हेतुदंतैरचूर्णितान् ।
इति जानन्सुभद्रायाः पतिस्तान्नैव चुंबति ॥ १९३ ॥
पश्चात्स चकितः प्राह जले तारागणा इव ।
अक्षराणां च सौंदर्याद्वंचितोऽस्मि कथं त्विति ॥ १९४ ॥
एतत्पदं न सत्यं हि गगनस्थं यथाक्षरम् ।
मज्जनोन्मज्जने तत्र व्यर्थ एव परिश्रमः ॥ १९५ ॥
यद्यहं ग्रहणेऽशक्तस्तेषामास्वादनं कुतः ।
इति विस्मयमापन्नः पार्थः कृष्णं व्यलोकयत् ॥ १९६ ॥
एवं विनयसंयुक्तः सुभटो देवमब्रवीत् ।
चित्रं सत्यपदास्वादो न कथं सेवितो नरैः ॥ १९७ ॥
नानाप्रमेयतात्पर्यमवधानं विना कथम् ।
केवलं श्रवणादेव तद्वाणीगोचरं भवेत् ॥ १९८ ॥
नैव साधारणं वाक्यमस्ति विस्मयकारकम् ।
दृष्ट्वा तस्याक्षरं चैव विस्मयो विस्मितो भवेत् ॥ १९९ ॥
कर्णद्वारगवाक्षेण तव भाषणरश्मयः ।
विशंति यावत्तावन्मे निरुद्धं मन एव हि ॥ २०० ॥
तदर्थं ज्ञातुमिच्छामि कालोऽतीतो हि भाषणे ।
न सहे देव तस्मात्त्वं सत्वरं कथय स्वयम् ॥ २०१ ॥
धृत्वा पूर्वप्रत्ययं च पराभिप्रायमेव च ।
तन्मध्ये पृष्टवान्पार्थोऽदर्शयन्स्वात्मकामनाम् ॥ २०२ ॥

प्रश्नस्य कीदृशी रीतिर्न सीमोल्लंघनं कृतम् ।
कृष्णस्य हृदये प्रीतिः परिष्वंगोत्सुकाऽभवत् ॥ २०३ ॥
प्रष्टव्यो विनयेनैव गुरुः शिष्येण धीमता ।
पार्थ एव विजानाति शिष्यधर्मस्थितो हि सः ॥ २०४ ॥
इदानीं प्रश्नकरणं सर्वज्ञश्रीहरेर्वचः ।
एतत्सर्वं संजयश्च प्रेम्णैव कथयिष्यति ॥ २०५ ॥

इतः मराठीभाषाप्रशस्तिः

भाषा यदि प्राकृता स्यात्तर्हि सा सरलास्ति वै ।
शाकाऽर्थग्रहणे दृष्टिर्भवेत्कर्णस्य का कथा ॥ २०६ ॥
यदि नास्वादितो ह्यर्थः सरसो बुद्धिजिह्वया ।
तथाप्यक्षरसौंदर्यं स्वगयत्येव निश्चितम् ॥ २०७ ॥
मालतीकलिकागंधो घ्राणे परिमलप्रदः ।
तथापि बाह्यसौंदर्यं न किं नेत्रसुखप्रदम् ॥ २०८ ॥
सौंदर्याद्देशभाषाया इंद्रियाणि नृपोचितान् ।
भुक्त्वा भोगान् गमिष्यंति सिद्धांतनगरं ततः ॥ २०९ ॥
श्रोतव्यं भाषणं तच्च येनालं भाषणं भवेत् ।
निवृत्तिदासः प्रोवाच ज्ञानदेव इति स्वयम् ॥ २१० ॥

इति श्रीज्ञानेश्वरविरचितायां भावार्थदीपिकायां अनंतनिरूपणे
सप्तमोऽध्यायः ॥ ७ ॥

गीर्वाणज्ञानेश्वरी

अष्टमोऽध्यायः

अर्जुन उवाच

किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम ।
अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥ १ ॥

अनुवादः

ततोऽर्जुनोऽब्रवीदेवमवधारय मद्वचः ।
यन्मया पृच्छयते तच्च विस्तरेण निरूप्यताम् ॥ १ ॥
तद्ब्रह्म कीदृशं प्रोक्तं कर्म किंनामकं तथा ।
अथ चाध्यात्म किं प्रोक्तमिहलोके च केशव ॥ २ ॥
अधिभूतं किमु प्रोक्तं किमत्रास्त्यधिदैवतम् ।
जानामि च यथा सम्यक् तथा मां त्वं निवेदय ॥ ३ ॥

अर्जुन उवाच

अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन ।
प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥ २ ॥

अधियज्ञश्च कः प्रोक्तो देहेऽस्मिन्वर्तते कथम् ।
नचैतदनुमानेन भूतानां दृष्टिगोचरम् ॥ ४ ॥
जितान्तःकरणैर्देहप्रयाणे च नृभिस्तथा ।
त्वं ज्ञेयोऽसि कथं देव शार्ङ्गपाणिन्वदस्व मे ॥ ५ ॥
दिव्यचिंतामणिगृहे यदि शेते स दैववान् ।
स्वप्नेऽपि जल्पितं तस्य नहि व्यर्थं भविष्यति ॥ ६ ॥
तथैवार्जुनवाक्यं तु श्रुत्वा देवोऽब्रवीत्तदा ।
पार्थाऽवधारय क्षिप्रं यश्च प्रश्नस्त्वया कृतः ॥ ७ ॥

वद्धः कल्पतरोर्मूले कामधेनोर्हि वत्सकः।
पार्थश्चेदत्र किं चित्रं काङ्क्षितं सिद्धिमाप्नुयात् ॥ ८ ॥
कृष्णः क्रोधेन यं हन्ति स याति ब्रह्मतां पराम्।
कृपयोपदिशेच्चर्हि स कथं ब्रह्म नाप्नुयात् ॥ ९ ॥
स्वयं कृष्णमये जाते कृष्णश्चांतर्भवेत्स्वयम्।
तस्यांगणे कल्पिताश्च सिद्धयः सन्ति संयुताः ॥ १० ॥
एवं हि यत्परं प्रेम निःसीमं विजयेऽस्ति वै।
तस्मात्तस्यैव कामस्तु सफलः सर्वशो भवेत् ॥ ११ ॥
ज्ञात्वेति तत्पुरः पार्थः पृच्छति स मनोगतम्।
सुधाप्रपूरितं पात्रं स्थापयामास माधवः ॥ १२ ॥
स्तन्योत्सुकं यदापत्यं मातैवावैत्ति तत्त्वतः।
किं तत् शब्देन तां वक्ति यदा स्तन्यं ददाति सा ॥ १३ ॥
तस्मात्कृपालुता शिष्ये गुरोश्चित्रं न तत्र हि।
अस्त्विदं श्रूयतां सर्वं यद्देवः प्रत्यभाषत ॥ १४ ॥

अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते।
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ॥ ३ ॥

ततः सर्वेश्वरः प्राह देहे छिद्रमये च यत्।
ओतप्रोतं स्थितमपि न नश्यति कदाचन ॥ १५ ॥
प्रष्टव्यं यदि तत्सूक्ष्मं तर्हि शून्यसमं भवेत्।
स्वभावेन न शून्यं तत्सूक्ष्मत्वाद्गगनाद्गलेत् ॥ १६ ॥
विज्ञानपेशिकाया यन्न पतत्येव चालितम्।
यदेवं विरलं चास्ति परब्रह्म हि तत्स्मृतम् ॥ १७ ॥
नैव जानाति तद्धर्मं साकारं जन्मनामपि।
आकारलोपे जातेऽपि लीयते न कदापि हि ॥ १८ ॥
यद्ब्रह्मनित्यता चास्ति सहजैवं स्थितिः स्वतः।
सुभद्रायाः पते नाम नूनमध्यात्मसंज्ञकम् ॥ १९ ॥
निर्मले गगने चापि न जाने सहसा कथम्।

उद्भवन्ति घनाश्चैव नानावर्णयुता यथा ॥ २० ॥
तथा ह्यमूर्तरूपेऽस्मिन्विशुद्धे महदादिकाः ।
अहंकारादिकैर्भेदैराकारान्धारयन्ति ते ॥ २१ ॥
निर्विकल्पसमक्षेत्रे सत्संकल्पांकुरोद्भवः ।
तस्माद्भवंति विपुलाः शिला ब्रह्माण्डगोलकाः ॥ २२ ॥
ब्रह्मबीजमयाः सर्वे दृश्यन्ते रूपधारिणः ।
तत्रस्थजीवसंघस्येयत्ता कर्तुं न शक्यते ॥ २३ ॥
ब्रह्मांडगोलकस्यांशाश्चोद्भवन्ति ह्यनेकशः ।
समर्था ह्यादिसंकल्पाः कुर्वन्ति सृष्टिवर्धनम् ॥ २४ ॥
ब्रह्मणोऽन्यन्नैव वस्तु यत्र कुत्रापि दृश्यते ।
अनेकत्वेन तत्पूरसदृशं प्रतिभासते ॥ २५ ॥
साम्याद्वैषम्यतो वापि संभवन्ति चराचराः ।
भिन्नप्रसवयोनीनां दृश्यन्ते लक्षशः पृथक् ॥ २६ ॥
मर्यादा क्षुद्रजीवानां नास्ति किंतु विचारतः ।
सर्वेषां कारणं माया नान्यत्किमपि दृश्यते ॥ २७ ॥
ततोऽदृश्यं कर्ममूलं चांते नास्त्येव कारणम् ।
कारणेन विना कार्यं वृद्धिमायाति केवलम् ॥ २८ ॥
एवं कर्तुर्विनाऽव्यक्ते ह्याकारो दृष्टिगोचरः ।
व्यापारो जायते यस्मात्स भवेत्कर्मसंज्ञकः ॥ २९ ॥

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम् ।
अधियज्ञोऽहमेवात्र देहे देहभृतां वर ॥ ४ ॥

अधिभूतं च यत्प्रोक्तं तत्संक्षेपाद्वदामि ते ।
यद्वदभ्रं समुत्पन्नं लयमायाति नित्यशः ॥ ३० ॥
अस्तित्वं च तथा भाति क्षणमात्रेण नश्यति ।
पंचीकृतानि भूतानि जनयंति समेत्य च ॥ ३१ ॥
भूतानामाश्रयेणास्ते भूतसंगेन भासते ।
तल्लये भ्रंशते यच्च नामरूपात्मकं त्विदम् ॥ ३२ ॥

अधिभूतमिति प्रोक्तं जीवं वेदाऽधिदैवतम् ।
भुंक्ते भोगान्प्रकृतिजान्स विद्यात्समुपार्जितः ॥ ३३ ॥
यश्चक्षुश्चेतनायाश्चाध्यक्षश्चेन्द्रियदेशके ।
संकल्पाख्यविहंगस्य देहांते वृक्षरूपकः ॥ ३४ ॥
यश्चान्यः परमात्मैव युतोऽहंकारनिद्रया ।
तस्मात्स्वप्नस्थवत्तोषः खेदो वा तस्य जायते ॥ ३५ ॥
यत्तु जीवेतिनाम्नैव स्वभावेनोदितं भुवि ।
पंचायतनमुख्यं च तत्प्राहुरधिदैवतम् ॥ ३६ ॥
अतः शरीरग्रामे यः शारीरोपाधिशामकः ।
सोऽधियज्ञ इति प्रोक्तस्तं मां विद्धि धनंजय ॥ ३७ ॥
अधिदैवाधिभूताख्यं समस्तमहमेव हि ।
उत्तमं हेम संसर्गाच्छ्यामिकां लभते न किम् ॥ ३८ ॥
नो जहात्युत्तमत्वं तन्न याति श्यामिकामपि ।
यावच्च तस्य संयोगो हीनत्वं तावदस्ति वै ॥ ३९ ॥
तथैव ह्यधिभूतादि त्वविद्यापल्लवैः किल ।
यावत्प्रच्छादितं तावत्पृथग्भासो भवेत्सदा ॥ ४० ॥
नष्टे ह्यविद्यापटले भेदभावो न विद्यते ।
ऐक्यं कथं विना द्वैताद्भवत्यत्र धनंजय ॥ ४१ ॥
केशोपरि स्थापितस्य स्फटिकस्य शिलातलम् ।
चक्षुषा शतशो भिन्नं दृश्यते तत्पुनर्यदि ॥ ४२ ॥
दूरीकृतेषु केशेषु भिन्नत्वं कुत्र वा गतम् ।
केनचित्साधितं स्यात्किं वद संधिरसादिभिः ॥ ४३ ॥
अखंडमेव तत्किंतु संगाद्भेदत्वमागतम् ।
तत्संगे तु परावृत्ते पूर्ववत्स्याद्यथास्थितम् ॥ ४४ ॥
तथाऽहंभावनाशे तदैक्यमस्त्येव मूलतः ।
तदेव पश्य सत्यं हि सोऽधियज्ञः स चास्म्यहम् ॥ ४५ ॥
पश्य ब्रूमो वयं तुभ्यं यज्ञः कर्मसमुद्भवः ।
इत्येवं कथितं सोऽयमधियज्ञोऽस्ति पांडव ॥ ४६ ॥

सोऽयं सकलजीवानां विश्रामः सुखशेवधिः ।
कथयामि स्वरूपं तद्विशदीकृत्य पांडव ॥ ४७ ॥
वैराग्येंधनपूर्णेऽथ प्रदीप्ते चेंद्रियानले ।
विषयाख्यद्रव्यरूपामाहुतिं च ददत्यहो ॥ ४८ ॥
वज्रासनाख्यभूमिं तु संशोध्याधारमुद्रया ।
शरीरमंडपे कुर्यादृद्रिकारचनामथ ॥ ४९ ॥
संयमाख्याग्निकुंडेषु द्रव्याण्यपीन्द्रियाणि तु ।
योगमंत्रसमुद्धोषैर्यजंते च निरंतरम् ॥ ५० ॥
संयमः प्राणमनसां ततो हवनसंपदः ।
ज्ञानानलं तोषयंति निर्धूमं संभ्रमात्ततः ॥ ५१ ॥
एवं हि सकलं यज्ञे ह्यर्पयेद्विषयादिकम् ।
ज्ञाने ज्ञेयत्वमापन्ने शेषं ब्रह्मैव तिष्ठति ॥ ५२ ॥
नाम चास्याधियज्ञाख्यं सर्वज्ञो ह्युक्तवान्यदा ।
तदार्जुनोऽप्यतिप्राज्ञः प्राप्तव्यमगमत्ततः ॥ ५३ ॥
एवं ज्ञात्वाऽब्रवीद्देवस्त्वया सम्यगिदं श्रुतम् ।
इति कृष्णवचः श्रुत्वा पार्थोऽभूद्धर्षितस्तदा ॥ ५४ ॥
बालके तृप्तिमापन्ने तन्माता तुष्यते यथा ।
शिष्यस्य लौकिकेनापि यथा तुष्यति वा गुरुः ॥ ५५ ॥
ततः सात्विकभावाश्च कृष्णांगेष्वर्जुनात्पुरा ।
उत्पन्नाः किंतु भगवान्बुद्धिमाच्छादयत्तदा ॥ ५६ ॥
सुखे पूर्णत्वमापन्ने शांते वाऽमृतसागरे ।
सारल्यं वर्तते तद्वद्भगवानप्यभाषत ॥ ५७ ॥
स प्राह शृण्वतां श्रेष्ठ शृणु तत्त्वं धनंजय ।
ज्ञानेन दह्यते माया ततो ज्ञानं दहत्यपि ॥ ५८ ॥

अंतकाले च मामेव स्मरन्मुक्त्वा कलेवरम् ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥ ५ ॥

इदानीमेव यः प्रोक्तोऽधियज्ञश्च त्वया श्रुतः ।
प्राणांतसमये तं मां पूर्वमेव स्मरंति ये ॥ ५९ ॥

देहं मिथ्येति ते मत्वा स्वस्वरूपं ययुस्तदा।
यथा मठस्थं गगनमाकाशं व्याप्य तिष्ठति ॥ ६० ॥
गर्भागारे प्रतीत्याख्ये यत्रास्ते निश्चयस्थलम्।
तत्रस्थस्य बहिर्भावसरणं न भवेत्ततः ॥ ६१ ॥
सबाह्याभ्यंतरं चैक्यं भूत्वा मद्रूपतां गतः।
तस्य देहस्य पतनं न तत्सरणकारणम् ॥ ६२ ॥
यस्य वै स्थितिकालेऽपि नित्यत्वं मनुते न यः।
कथं स दुःखं तत्पाते प्राप्नोति ब्रह्मतां गतः ॥ ६३ ॥
पूर्णानंदाब्धिनिर्धूतो ह्यैक्यभावमुपागतः।
स्थापितोऽनुभवो यस्य हृदये स चलेत्कथम् ॥ ६४ ॥
घटोऽगाधे जले मग्नः सबाह्यांतर्जलावृतः।
भिन्ने तस्मिन्दैवगत्या तज्जलं भिद्यते नु किम् ॥ ६५ ॥
सर्पस्य कचवत्यागात्सर्पनाशो भवेत्किमु।
चर्मत्यागाग्निदाघेऽपि का हानिर्देहिनोऽपि च ॥ ६६ ॥
तथा मिथ्याशरीरेऽस्मिन्यातं ब्रह्मैव विद्यते।
बुद्धिर्भवेद्ब्रह्मरूपा तर्हि किं मरणाद्भयम् ॥ ६७ ॥
अंतकाले च मां तस्माज्ज्ञानन्देहं त्यजेद्य यः।
स तु मद्रूपतां याति ह्यन्तःस्मरणमात्रतः ॥ ६८ ॥
'अंते मतिः सैव गतिः' सामान्यो नियमोऽस्ति हि।
यं स्मरेदंतकाले यत्तद्रूपः स भविष्यति ॥ ६९ ॥
यथा भयाकुलो जीवो वायुवेगेन धावति।
वेगात्पथि स्थिते कूपे धावमानः पतत्यसौ ॥ ७० ॥
न क्षमः पतनात्पूर्वं वेगस्याऽऽकलनाय सः।
अतः कूपे स पतति नैव केनापि पातितः ॥ ७१ ॥
मृत्योश्चावसरे तस्माद्यस्तु यज्जीवसंमुखे।
सन्तिष्ठति स तद्रूपं जीवो याति नचान्यतः ॥ ७२ ॥
मानवा जागृतौ यद्यत्पश्यंति चिंतयंति च।
तत्तत्स्वप्नेऽपि पश्यंति दृष्टिसंमीलिता अपि ॥ ७३ ॥

यं यं वापि स्मरन्भावं त्यजत्यंते कलेवरम् ।
तं तमेवैति कौंतेय सदा तद्भावभावितः ॥ ६ ॥

प्राणप्रयाणसमयात्पूर्वं जीवस्य या रुचिः ।
सैवांतकाले वृद्धित्वं यात्यत्र संशयो नहि ॥ ७४ ॥

तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च ।
मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ॥ ७ ॥

तस्माच्च मरणे यस्य विषयो रोचते हि यः ।
स तां गतिमवाप्नोति तस्मान्मत्स्मरणं कुरु ॥ ७५ ॥
चक्षुषा यत्प्रेक्षणीयं श्राव्यं श्रोत्रेण चैव यत् ।
मनसा भावनीयं च वाच्यं हि वचसा तु यत् ॥ ७६ ॥
सवाह्याभ्यंतरं सर्वमहमेवेति भावना ।
एवं पश्यन्सर्वकाले स्वभावादहमेव सः ॥ ७७ ॥
यदा सर्वत्र मद्रूपं पश्यसि त्वं तदा खलु ।
न नश्यसि गते देहे तर्हि युध्यस्व भारत ॥ ७८ ॥
मनो बुद्धिं च नूनं त्वं मद्रूपेऽर्पयसे यदि ।
मामेवैष्यसि तह्येव प्रतिज्ञापूर्वकं ब्रुवे ॥ ७९ ॥
कथं भवेदिदमिति संदेहो जायते यदि ।
आदौ भव कृताभ्यासो न चेत्कोपं ततः कुरु ॥ ८० ॥

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना ।
परमं पुरुषं दिव्यं याति पार्थानुचिंतयन् ॥ ८ ॥

एवमभ्यासयोगेन चित्तं तस्मिन्दृढीकुरु ।
पद्योपायवलैनैव पंगुर्लंघति पर्वतम् ॥ ८१ ॥
निरंतरतदभ्यासाच्चित्ते परमपूरुषम् ।
निधाय कुरु कर्तव्यं देहस्तिष्ठतु नश्यतु ॥ ८२ ॥
नानागतिसमापन्नं चित्तमात्मनि चेद्रतम् ।

तदा को नु स्मरेद्देहं तिष्ठंतं गतमेव वा ॥ ८३ ॥
सरिदोघश्च घोषेण युतः सिंधुजलं मिलन् ।
पश्चात्किं वर्तते वेत्तुं किं परावर्तते स वै ॥ ८४ ॥
नदीजलं सिंधुरूपं तथा चित्तं सुखात्मकम् ।
भवेच्च तदनुप्राप्य सर्वदुःखतिरस्कृतम् ॥ ८५ ॥

कविं पुराणमनुशासितारम्
अणोरणीयांसमनुस्मरेद्यः ।
सर्वस्य धातारमचिंत्यरूपं
आदित्यवर्णं तमसः परस्तात् ॥ ९ ॥
प्रयाणकाले मनसाऽचलेन
भक्त्या युक्तो योगबलेन चैव ।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्
स तं परं पुरुषमुपैति दिव्यम् ॥ १० ॥
यदक्षरं वेदविदो वदंति
विशंति यद्यतयो वीतरागाः ।
यदिच्छंतो ब्रह्मचर्यं चरन्ति
तत्ते पदं संग्रहेण प्रवक्ष्ये ॥ ११ ॥

निराकारा स्थितिर्यस्य न च जन्म मृतिस्तथा ।
व्यापकत्वेन यस्सर्वं सततं चानुपश्यति ॥ ८६ ॥
पुराणं गगनाद्यच्च यदणीयो ह्यणोरपि ।
यत्संनिधानाद्विश्वस्य व्यापाराः प्रभवन्ति च ॥ ८७ ॥
यस्माच्च जायते सर्वं येन धार्यते जगत् ।
न यत्तर्केण तर्क्येत यतोऽचिन्त्यं हि केवलम् ॥ ८८ ॥
नात्त्यग्निं कीटको, ध्वांतं प्रकाशो नैव गच्छति ।
तथाऽज्ञानं शरीरस्य नेक्ष्यते चर्मचक्षुपा ॥ ८९ ॥

निर्मलं सूर्यकिरणराशिवद्भासते च यत् ।
प्रकाशदं ज्ञानिनां यदस्तो यस्य न विद्यते ॥ ९० ॥
प्रयाणकाले संप्राप्ते जानन्ब्रह्माव्ययं स्फुटम् ।
स्थिरीभूतेन चित्तेन संसरन्वर्तते च यः ॥ ९१ ॥
पद्मासनं विरच्याथ चोत्तराभिमुखो बहिः ।
उपविश्य सुखं जीवे धारयेत्क्रमयोगतः ॥ ९२ ॥
अंतर्मुखो मनोधर्मैः स्वरूपप्राप्तिहार्दतः ।
ससंभ्रमः परंब्रह्म मीलितुं च त्वरान्वितः ॥ ९३ ॥
संपादितेन योगेन मध्यमामध्यमार्गतः ।
ब्रह्मरंध्रं समागन्तुमग्निस्थानाच्च निर्गतः ॥ ९४ ॥
यन्मनःप्राणयोरैक्यं भासते तन्निरर्थकम् ।
प्राणस्य लय आकाशे चित्तस्य न तथा भवेत् ॥ ९५ ॥
मनःस्थैर्येण बद्धस्तु भक्तिभावनया युतः ।
योगशक्त्या समायुक्तः सज्जीभूतोऽनुतिष्ठति ॥ ९६ ॥
योगी स चित्तप्राणौ तु भ्रूमध्ये संनियम्य च ।
तयोर्लयं प्रकुरुते घंटायां तद्ध्वनिर्यथा ॥ ९७ ॥
घटाच्छादितदीपस्य निर्याणं वेत्ति नो घटः ।
तथा प्राणप्रयाणं हि न स वेत्ति कदाचन ॥ ९८ ॥
स केवलं परं ब्रह्म किं वा परमपूरुषः ।
नाम्ना प्रथितमद्धाम साक्षात्प्राप्नोत्यसंशयम् ॥ ९९ ॥
ज्ञानस्य ये पराकाष्ठा ज्ञानस्य निधयोऽपि ये ।
ते चापि ज्ञानिनः सर्वे वदंत्यपि तदक्षरम् ॥ १०० ॥
प्रचंडवातवेगेन गगनं किं नु भिद्यते ।
वातस्य पुरतः स्थातुं तच्छक्तं न पयोधरः ॥ १०१ ॥
तथैव ज्ञानिना ज्ञातं यज्ज्ञानं तच्च नश्वरम् ।
ज्ञेयातीतं च यज्ज्ञानं सहजं हि तदक्षरम् ॥ १०२ ॥
तस्मात्परा वेदविदो यद्वदंत्यक्षरं हि तत् ।

सुषुम्नानाडी.

परमात्मस्वरूपं तद्यद्यास्ते प्रकृतेः परम् ॥ १०३ ॥
विषयाणां विषं त्यक्त्वा संयम्यैवेंद्रियाणि ये ।
उदासीनाः सदाऽऽसीना देहवृक्षतले नराः ॥ १०४ ॥
विरक्ताः पुरुषाश्चैवं निष्कामाश्च निरंतरम् ।
सर्वदा यदभिप्रेतं यस्य मार्गं विचिन्वते ॥ १०५ ॥
ब्रह्मचर्यादिकष्टान्ये यत्प्रेम्णा गणयंति नो ।
चेतसा निष्ठुरीभूय कुर्वतींद्रियनिग्रहम् ॥ १०६ ॥
एवं पदमिदं सम्यगगाधं दुर्लभं तथा ।
वेदोऽपि यत्स्वरूपं न शक्तो वर्णयितुं किल ॥ १०७ ॥
गच्छंति येऽक्षरे मग्ना देहपातात्तदक्षरम् ।
पुनरेव प्रवक्ष्यामि कथं गच्छंति तच्छृणु ॥ १०८ ॥
तदार्जुनोऽवदद्देव ! पृच्छासीच्च ममापि सा ।
त्वं हि चिंतामणिः साक्षात्कृपया वद सत्वरम् ॥ १०९ ॥
सुलभत्वेन वक्तव्यमित्युक्ते विश्वदीपकः ।
जानामि तुभ्यं संक्षेपाद्ब्रवीमीत्यब्रवीद्वचः ॥ ११० ॥
मनोवृत्तिगणा बाह्ये संचरंति स्वभावतः ।
तान्निरुध्य स्थापय त्वं हृदयाख्ये महाह्रदे ॥ १११ ॥

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च ।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥ १२ ॥

यदाऽऽवृतानींद्रियाणां कपाटानि भवंति हि ।
तदा मनो निरुद्धं स्याद्धृदये निर्विकल्पकम् ॥ ११२ ॥
हस्तपादविहीनो यो न गच्छति गृहाद्बहिः ।
तथैव चित्तं हृदये तिष्ठत्यश्मसमं स्थिरम् ॥ ११३ ॥
शांते चित्तेऽर्जुन प्राणायामेनोंकारतां व्रजेत् ।
प्राणानिलं क्रमेणैव ब्रह्मरंध्रं समानयेत् ॥ ११४ ॥
यावन्मात्रात्रयं चार्धमात्रे हि लयतां व्रजेत् ।
तावद्धारणसामर्थ्यात्प्राणं तत्र स्थिरीकुरु ॥ ११५ ॥

ब्रह्माकाशे स्थिरीभूते प्राणे सति धनंजय ।
ततः स लग्नश्चोंकारबिंबे विलसति स्वयम् ॥ ११६ ॥

ॐमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥ १३ ॥

ओंकारस्मरणं गच्छेदलंभावं ततस्तदा ।
प्राणस्यापि भवेदंतस्तिष्ठेद्ब्रह्म सनातनम् ॥ ११७ ॥
तस्मात्प्रणवनामकं ब्रह्मैकाक्षरमद्वयम् ।
मम स्वरूपं परमं यदेवानुस्मरंति च ॥ ११८ ॥
एवं त्यजति यो देहं निश्चयेन स याति माम् ।
यत्प्राप्तेः परतो लाभो नास्ति तस्यान्य एव च ॥ ११९ ॥
यदि त्वं शंकसे पार्थ कथमेतद्भवेदिति ।
अंतकाले च स्मरणं दुर्लभं चैव सर्वथा ॥ १२० ॥
इंद्रियाणां संकटे तु जीवितांते ह्युपस्थिते ।
सबाह्याभ्यंतरे पश्यन्मृत्युचिह्नोदयं स्फुटम् ॥ १२१ ॥
कथमुत्थापनं कार्यं निरोधो वा कथं भवेत् ।
मनसा च भवेत्तत्र कथं वा प्रणवस्मृतिः ॥ १२२ ॥
इत्येवं संशयग्रस्तं मनो मा कुरु सर्वथा ।
यतो मद्भक्तियुक्तानां संकटे सेवकोऽस्म्यहम् ॥ १२३ ॥

अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥ १४ ॥
मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवंति महात्मानः संसिद्धिं परमां गताः ॥ १५ ॥

प्रवृत्तिं निगडीकृत्य विषयेभ्यस्तिलांजलिम् ।
दत्वा मां च हृदि स्थाप्य भुंजते ये सुखं सदा ॥ १२४ ॥
ते तद्योगसमाधानं विस्मरंति क्षुधादिकम् ।
तदा नेत्रादींद्रियाणां वराकाणां तु का कथा ॥ १२५ ॥

एवं निरंतरं युक्तश्चैकत्वेन मयि स्थिताः ।
अंतःकरणवृत्त्या च मद्रूपा मामुपासिताः ॥ १२६ ॥
स्मरंति तेंऽतकाले मां तर्हि तेषु कृपा मम ।
इति चेन्नित्ययुक्तानां पूर्वोपास्तिर्वृथा भवेत् ॥ १२७ ॥
आपत्सु दीनो यः कश्चिद्यदि मां शरणं व्रजेत् ।
तर्हि तस्यावने दक्षो नाहं किं वा व्रजेय किम् ॥ १२८ ॥
यदीदृशं स्वभक्तेषु कुर्या प्रेम न चेत्कथम् ।
भक्तिं कुर्वन्ति, सततं किमर्थं भक्तिलोलुपाः ॥ १२९ ॥
यस्मिन्काले मत्स्मरणं तस्मिन्काले कृपा मम ।
कथं तेषां भक्तिभारं सोढुं संशक्नुयामहम् ॥ १३० ॥
ऋणीभूत्वा स्वभक्तानामानृण्यार्थमहं सदा ।
अंतकालागमे तेषां परिचर्यां करोमि वै ॥ १३१ ॥
देहक्लेशकरो वातो भक्तं माबाधतादिति ।
करोम्यहं ह्यात्मबोधपंजरस्थं निरंतरम् ॥ १३२ ॥
तदूर्ध्वं स्मरणाख्यां मे छायां च करवाण्यहम् ।
स्थिरबुद्धिं च तं नित्यं मद्रूपत्वं नयामि च ॥ १३३ ॥
देहांते संकटं तस्मान्नास्ति भक्तस्य मे कदा ।
सम्यक् स्वात्मनि तं तूर्णं सुखेनैव नयाम्यहम् ॥ १३४ ॥
त्यक्त्वात्मनश्चावरणं मिथ्याहंकारमृत्तिकाम् ।
मार्जयित्वा स्वस्वरूपं नयामि शुभवासनम् ॥ १३५ ॥
स्वदेहे प्रेमभक्तस्य नास्ति सामान्यलोकवत् ।
तस्मात्तत्त्यागमात्रेण वियोगो नैव भासते ॥ १३६ ॥
देहांतसमये तस्य प्राप्तिर्मम भवेदिति ।
इच्छापि न प्रभवति पूर्वं मद्रूपलाभतः ॥ १३७ ॥
शरीरसलिले चात्मसत्ता छायेव वर्तते ।
चंद्रिका नैव चंद्रः स्यात्सत्ता चंद्रस्य चंद्रिका ॥ १३८ ॥
एवं हि नित्ययुक्तानां सततं सुलभोऽस्म्यहम् ।
देहांते निश्चितं तस्मायांति मद्रूपतां हि ते ॥ १३९ ॥
तापत्रयादिकुंडं तत्क्लेशरूपतरोर्वनम् ।

शरीरं मृत्युकाकाय बलिरूपेण दीयते ॥ १४० ॥
यद्दोहनं च दैन्यस्य महाभयविवर्धनम् ।
सर्वदुःखसमाक्रांतमस्ति सत्यं कलेवरम् ॥ १४१ ॥
यन्मूलं दुर्गतीनां च कुमार्गफलरूपकम् ।
स्वरूपं केवलं यच्च व्यामोहस्य तु वर्तते ॥ १४२ ॥
संसारस्यासनं यच्च विकारोद्यानमेव च ।
भाजनं सर्वरोगाणां सत्यमेतत्कलेवरम् ॥ १४३ ॥
कालस्योच्छिष्टमन्नं यदाशापाशोस्ति केवलम् ।
जन्ममृत्युजीवनादि वर्तते यत्स्वभावतः ॥ १४४ ॥
भ्रांतिभिः पूर्णमेवं यद्विकल्परसनिर्मितम् ।
बहुनात्र किमुक्तेन वृश्चिकागारमेव यत् ॥ १४५ ॥
व्याघ्राणां क्षेत्रभूतं यत्तथा पण्यांगनासुहृत् ।
यंत्रं विषयविज्ञानस्येदं विद्धि कलेवरम् ॥ १४६ ॥
कृत्यायाश्च दयास्थानं तथा शीतविषोदकम् ।
विश्वासभवनं कूटतस्कराणां निरंतरम् ॥ १४७ ॥
यत्कुष्ठिनः परिष्वंगः कृष्णसर्पस्य मार्दवम् ।
गानं व्याधस्य सुरसं तालरागसमायुतम् ॥ १४८ ॥
आतिथ्यं वैरिणो यच्च यद्दुर्जनसमादरः ।
बहुनात्र किमुक्तेन यच्चास्तेऽनर्थसागरः ॥ १४९ ॥
यच्च स्वप्नगतस्वप्नो वनं मृगजलाशयम् ।
यद्धूम्ररजसा युक्तं गगनं वै कलेवरम् ॥ १५० ॥
एतादृशं शरीरं यत्सर्वानर्थकरं खलु ।
न तेषां लभते पार्थ ये मद्रूपे स्थिताः सदा ॥ १५१ ॥

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौंतेय पुनर्जन्म न विद्यते ॥ १६ ॥

ब्रह्माणं गर्वयुक्तं च पुनरावर्तनं कदा ।
न मुञ्चति, गतायुश्च वेत्ति दुःखं न जाठरम् ॥ १५२ ॥

प्रबुद्धः को नु मज्जेत दृष्टस्वप्नमहाह्रदे ।
संसारेण न लिप्यंते तथा मद्रूपतां गताः ॥ १५३ ॥
यच्छिरो भुवनानां च, यच्चिरस्थायिनोऽग्रगम् ।
यद्ब्रह्मभुवनं चास्ते त्रैलोक्याचलमस्तकम् ॥ १५४ ॥
आयुष्यममरेंद्रस्य न यस्य प्रहरो भवेत् ।
चतुर्दशानामिंद्राणां क्षयो भवति यद्दिने ॥ १५५ ॥

सहस्रयुगपर्यंतमहर्यद्ब्रह्मणो विदुः ।
रात्रिं युगसहस्रां तां तेऽहोरात्रविदो जनाः ॥ १७ ॥

चतुर्युगसहस्रं तु ब्रह्मणो दिनमुच्यते ।
तावत्येव निशा तस्येत्यहोरात्रविनिर्णयः ॥ १५६ ॥
कालप्रमाणं यत्रैवं मनुष्याः संति तत्र ये ।
पश्यंति ते दीर्घकालं स्वर्गस्थाश्चिरजीविनः ॥ १५७ ॥
सुरेंद्रस्यापि यत्रायुः क्षणिकं तत्र का कथा ।
देवानां देवतानां वा यक्षादीनां धनंजय ॥ १५८ ॥
ब्रह्मणः प्रहरानष्टौ प्रेक्षते यः स्वचक्षुषा ।
अहोरात्रविदं तं च प्रवदंति जना भुवि ॥ १५९ ॥

अव्यक्ताद्व्यक्तयः सर्वाः प्रभवंत्यहरागमे ।
रात्र्यागमे प्रलीयंते तत्रैवाव्यक्तसंज्ञके ॥ १८ ॥

भूतग्रामः स एवाऽयं भूत्वा भूत्वा प्रलीयते ।
रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥ १९ ॥

उदये ब्रह्मणो लोके स्यात्साकारमिदं जगत् ।
तस्य स्थितेरभिप्रायो व्यक्तीकर्तुं न शक्यते ॥ १६० ॥
चतुर्थे प्रहरे पूर्णे विश्वाकारोऽपि शुष्यति ।
तस्योपसि पुनस्तच्च विश्वं भवति पूर्ववत् ॥ १६१ ॥
शरत्कालागमे मेघा लीयंते गगने पुनः ।

ग्रीष्मांते च समुत्पन्नाः प्रवर्षंति यथा तथा ॥ १६२ ॥
तथा ब्रह्मदिनस्यादौ भूतसृष्टेश्च मेलनम् ।
चतुर्युगसहस्रांतं तत्तत्रैव तिष्ठति ॥ १६३ ॥
रात्रेश्चावसरे विश्वमव्यक्ते संप्रलीयते ।
तथा युगसहस्रांते प्रभवे रच्यते पुनः ॥ १६४ ॥
एतद्वर्णनहेतुस्तु जगदुत्पत्तिसंयमौ ।
विधातुं सत्यलोकस्याप्यहोरात्रमलं भवेत् ॥ १६५ ॥
यः सृष्टिबीजभांडारं दीर्घायुश्च परंतप ।
तस्यापि पुनरावृत्तिगणना नहि शक्यते ॥ १६६ ॥
एवं त्रैलोक्यसृष्टिर्हि सत्यलोकस्य विस्तरः ।
दिनोदये तस्य भवेदेवं नित्यं धनुर्धर ॥ १६७ ॥
पुना राज्यागमे तच्च ह्यव्यक्ते संप्रलीयते ।
स्वभावात्साम्यतां याति यथास्थानं मदाज्ञया ॥ १६८ ॥
वृक्षत्वं हि यथा बीजे, मेघानां गगने लयः ।
अनेकत्वं समाविष्टं यत्र सा साम्यता स्मृता ॥ १६९ ॥

परस्तस्मात्तु भावोऽन्यो व्यक्तोऽव्यक्तात्सनातनः ।
यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥ २० ॥

साम्ये विषमता नास्ति तस्माद्भूतं न तत्खलु ।
घृते दध्नि च दुग्धस्य नाम रूपं न दृश्यते ॥ १७० ॥
जगत्त्वं जगतो भ्रष्टं तथाऽऽकारस्य लोपतः ।
यत्र जातं तत्र गतं तत्रास्ति च यथातथम् ॥ १७१ ॥
निराकारतयाऽव्यक्तं व्यक्तं चाकारतः स्मृतम् ।
एकेन सूचितं चैकं वस्तुतस्तद्वयं नहि ॥ १७२ ॥
रजतस्य रसादेव भवेत्कठिनवीटिका ।
तस्या भवंत्यलंकारा न तत्र वीटिकारसौ ॥ १७३ ॥
रूप्ये यथा वीटिकात्वमलंकारत्वमेव च ।
तथैव व्यक्ताव्यक्तत्वं भासते ब्रह्मणि स्फुटम् ॥ १७४ ॥
अव्यक्तं नैव वा व्यक्तमनित्यं नित्यमेव च ।

तयोरनादिसिद्धं हि परं ब्रह्म सनातनम् ॥ १७५ ॥
यस्माद्विश्वमिदं जातं विश्वचत्तन्न नश्यति ।
यथाऽक्षराणां नाशेऽपि नैवार्थो हि प्रणश्यति ॥ १७६ ॥
तरंगोद्भवनाशेऽपि ह्यखंडमुदकं यथा ।
तथैव भूतनाशेऽपि परंब्रह्माऽविनाशि तु ॥ १७७ ॥
अलंकारे द्रवीभूते कनकं नैव नश्यति ।
तथा कलेवरे नष्टे भाति ब्रह्मामरं सदा ॥ १७८ ॥

अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्तंते तद्धाम परमं मम ॥ २१ ॥

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यस्यांतःस्थानि भूतानि येन सर्वमिदं ततम् ॥ २२ ॥

तस्याऽव्यक्ताभिधानेन गौरवं न भवेत्किल ।
यतो यन्मनसा बुद्ध्या प्राप्यं वै नास्ति सर्वशः ॥ १७९ ॥
यस्मिन्साकारतां याते निराकारो न लुप्यते ।
यस्य साकारलोपेन नित्यता न विघट्यते ॥ १८० ॥
ततोऽक्षरमिति प्रोक्ते सद्यो बोधस्तु जायते ।
यस्मात्परं हि न प्रेक्ष्यं तद्धाम परमा गतिः ॥ १८१ ॥
व्याप्य देहपुरे सुप्तमिव तत्रैव तिष्ठति ।
व्यापारं नैव कुरुते तथा कारयतीत्यपि ॥ १८२ ॥
किंतु शारीरचेष्टासु काचिच्चेष्टा न तिष्ठति ।
दशेन्द्रियाणां व्यापारः सोत्साहेन प्रवर्तते ॥ १८३ ॥
मनश्चतुष्पथे पश्य रम्यो विषयहाटकः ।
तत्र लाभश्च हानिश्च बाधेते चांशतो मनः ॥ १८४ ॥
सुखेन सुप्ते नृपतौ व्यापारो नैव तिष्ठति ।
तस्य राज्ये प्रकुर्वंति व्यापारं हि प्रजाजनाः ॥ १८५ ॥
बुद्धिधर्मा मनोधर्मा इंद्रियाणां क्रियास्तथा ।
तथैव प्राणवातस्य सर्वाश्च स्फुरणक्रियाः ॥ १८६ ॥

इमे च सर्वे व्यापारा भवंति कारकाद्विना ।
यथा सूर्यप्रकाशेन लोकोऽयं वर्तते तथा ॥ १८७ ॥
तद्वदर्जुन देहेऽस्मिन्स्वस्थोऽयं देहभूभुजः ।
तस्मात्पुरुष एवेति तं वदंति जनाः सदा ॥ १८८ ॥
पतिव्रतायां प्रकृतावेकपत्नीव्रते स्थितः ।
तस्माच्च कारणादेनं पुरुषं प्रवदंति हि ॥ १८९ ॥
वेदा विविच्यमानाश्च न यस्य प्रांगणं गताः ।
यस्मिन्रूपे च गमनमेकभागे स्थितं खलु ॥ १९० ॥
ज्ञात्वा योगीश्वराश्चैवं यद्वदंति परात्परम् ।
यच्चाऽनन्यगतीनां हि गृहं मृगयते स्वयम् ॥ १९१ ॥
तन्वा वाचाऽथ चित्तेन न जानंति परां कथाम् ।
सुक्षेत्रमेकनिष्ठायास्तेषामेव फलप्रदम् ॥ १९२ ॥
त्रैलोक्यमखिलं हीदं भगवद्रूपमेव तत् ।
एवं भावोऽस्त्यास्तिकानां पार्थ तेषां स चाश्रमः ॥ १९३ ॥
निर्गर्वाणां वैभवं यन्निस्पृहाणां सुखस्थलम् ।
गुणातीतस्य यज्ज्ञानं तथैव च परंतप ॥ १९४ ॥
संतोषिणां च यद्भोग्यं निश्चितानां प्रसूतिभूः ।
भक्तानां सुलभो मार्गो मोक्षग्रामप्रदर्शकः ॥ १९५ ॥
एकैकं किमु वक्तव्यं व्यर्थं बहु धनंजय ।
यत्र गत्वा नरो याति तद्रूपत्वं हि केवलम् ॥ १९६ ॥
पुरःस्थिते दिवानाथे तमो याति प्रकाशताम् ।
यथा चोष्णोदकं याति हिमत्वं हिमसंगतः ॥ १९७ ॥
तथैव पांडवाऽज्ञानं तत्कार्यं च जगद्यदा ।
परमार्थपुरं याति तदा मोक्षः स्वयं भवेत् ॥ १९८ ॥
यथेंधनं वह्निदग्धमग्निरूपेण भासते ।
पश्चाद्विभजने नैव काष्ठत्वेन कदाचन ॥ १९९ ॥
इक्षूद्भवा शर्करा वा नैवेक्षुत्वं पुनर्नयेत् ।
मतिमान्कोऽपि शास्त्रज्ञो मांत्रिको वा धनुर्धर ॥ २०० ॥
किंवा स्पर्शमणिस्पर्शाल्लोहं कनकतां व्रजेत् ।

नतु तत्कनकं लोहं भविष्यति पुनः क्वचित् ॥ २०१ ॥
दुग्धोद्भवं घृतं पश्चाद्दुग्धत्वं नैव गच्छति ।
तथा मद्रूपतां प्राप्ते पुनरावर्तनं नहि ॥ २०२ ॥
तन्निजं परमं धाम सत्यमस्ति ममैव तु ।
इदमंतर्गतं गुह्यं तवास्ति विशदं कृतम् ॥ २०३ ॥
देहत्यागे कृते योगी यां गतिं पार्थ गच्छति ।
तामेवाथ प्रवक्ष्यामि यथा ज्ञातुं सुखावहम् ॥ २०४ ॥

यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः ।
प्रयाता यांति तं कालं वक्ष्यामि भरतर्षभ ॥ २३ ॥

त्यजत्यकाले यो योगी नश्वरं हि कलेवरम् ।
पुनरावर्तनं तस्य देहस्य च भवेत्किल ॥ २०५ ॥
योग्यकाले त्यजन्देहं ब्रह्मीभवति तत्क्षणात् ।
अकाले मरणं चैव पुनः संसारकारणम् ॥ २०६ ॥
सायुज्यं च पुनर्जन्म कालाधीनं हि केवलम् ।
अतः कालस्वरूपं ते प्रसंगेन वदाम्यथ ॥ २०७ ॥
समीपे मरणे याते पार्थ त्यक्त्वा कलेवरम् ।
पंचभूतानि गच्छंति स्वस्वमार्गेण सत्वरम् ॥ २०८ ॥
एवं प्रयाणकालेऽपि बुद्धिर्न भ्रमतामियात् ।
स्मृतिश्चांधा न भवति मनसो मरणं नहि ॥ २०९ ॥
अयं हि चेतनावर्गो मरणेऽपि प्रकाशते ।
अनुभूतब्रह्मभावैर्विकृतिं याति न क्वचित् ॥ २१० ॥
चिद्रूपस्यांतपर्यंतमिन्द्रियाणां सहायता ।
जठराग्निप्रकाशेन सर्वमेतद्भविष्यति ॥ २११ ॥
पश्य दीपस्तु वातेन वेगकेन निमील्यते ।
तत्काले विद्यमानायां दृष्टौ किं दर्शनं भवेत् ॥ २१२ ॥
तथा देहांतकाले तु वातवृद्ध्या कफोद्भवः ।
भूत्वा शरीरं व्याप्नोति जठराग्निश्च शाम्यति ॥ २१३ ॥
तदा प्राणस्य प्राणत्वं बुद्धिश्च पंगुला भवेत् ।

तत्र देहे विना ह्यग्निं चेतना नैव तिष्ठति ॥ २१४ ॥
जठराग्नौ गते देहो न देहः किंतु कर्दमः ।
गाढे तमसि जीवोऽयं यत्र कुत्रापि गच्छति ॥ २१५ ॥
एवं हि पूर्वस्मरणं तस्मिन्नवसरे कुतः ।
तथा देहपरित्यागे स्वरूपं विंदते नु किम् ? ॥ २१६ ॥
तत्र देहः श्लेष्मरूपपंके मग्नो भवेद्यदा ।
पूर्वापरं च स्मरणं स लभेत तदा कथम् ॥ २१७ ॥
तस्मात्पूर्वकृताभ्यासो मृत्योः पूर्वं प्रणश्यति ।
यथा पूर्वं वस्तुलाभाद्दीपो निर्वाणतां व्रजेत् ॥ २१८ ॥
एवं ज्ञानस्य मूलं वै कारणं जठरानलः ।
प्रयाणसमये त्वग्नेर्बलं संपूर्णसाधकम् ॥ २१९ ॥

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छंति ब्रह्म ब्रह्मविदो जनाः ॥ २४ ॥

अंतरे जाठरं तेजो वहिश्चाप्युत्तरायणे ।
मासानां शुक्लपक्षश्च दिवसो मरणे शुभः ॥ २२० ॥
एवमादि शुभे योगे निरता ब्रह्मवादिनः ।
परित्यजंति स्वं देहं ब्रह्मभूता भवंति ते ॥ २२१ ॥
कालस्य देवताशक्तिरीदृशी महती खलु ।
मोक्षग्रामस्य मार्गोऽयं शुभकालः प्रकीर्तितः ॥ २२२ ॥
मोक्षसोपानकस्याद्यं पदं वै जाठरोऽनलः ।
तेजस्तथादितः शुक्लपक्ष एवोत्तरोत्तरम् ॥ २२३ ॥
औत्तरायणिको मासः सोपानस्यांतिमं पदम् ।
सायुज्यसिद्धिसदनं येन यांति च योगिनः ॥ २२४ ॥
इमं त्वमुत्तमं कालं विद्धि यस्यार्चिरादिकम् ।
मार्गं वदंति, वक्ष्येऽहं ते कालं मुक्तिदो न यः ॥ २२५ ॥

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चांद्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥ २५ ॥

प्रयाणसमये वातश्लेष्मादेर्वर्धनादिह ।
व्यामोंतःकरणे घोरे तमस्यांध्यमुपैति च ॥ २२६ ॥
सर्वेंद्रियगतिस्तत्र कुंठिता च स्मृतिर्भवेत् ।
भ्रमे मग्ना, प्रमत्तं च मनः प्राणो विमुह्यति ॥ २२७ ॥
अग्नेरग्नित्वलोपेन ततो धूमः प्रसर्पति ।
शारीरचेतनाऽऽच्छन्ना भवत्येव शरीरिणः ॥ २२८ ॥
यथा ह्याच्छादिते चंद्रे निविडेन घनेन च ।
सजलेन तदा भाति न प्रकाशो न वा तमः ॥ २२९ ॥
तदा मृत्युर्न जीवित्वं स्तब्धीभूत्वैव केवलम् ।
आयुर्दायस्यावसानान्मृत्युमार्गं समीक्षते ॥ २३० ॥
मनो बुद्धिश्चेंद्रियाणि धूमव्याकुलितेषु च ।
आजन्मकृतलाभश्च सर्वं तेषां विनश्यति ॥ २३१ ॥
गते हस्तागते कालात्पुनर्लाभस्य का कथा ।
एवं हि जायते तस्मिन्प्रयाणसमये दशा ॥ २३२ ॥
देहस्यांतःस्थितिश्चैवं कृष्णा रात्रिस्तथा बहिः ।
दक्षिणायनगो मास एवं काल उपस्थितः ॥ २३३ ॥
पुनर्जन्मप्रदा ह्येवं कुयोगा यत्र मीलिताः ।
मोक्षस्य तत्र वार्तापि कथं स्याच्छ्रुतिगोचरा ॥ २३४ ॥
य एवमशुभे काले त्यजेद्योगी कलेवरम् ।
चंद्रलोकं प्राप्य पश्चात्पुनरावृत्तिमर्हति ॥ २३५ ॥
अकाल इति यः प्रोक्तो मार्गोऽयं धूमसंज्ञकः ।
पुनरावृत्तिनगरं देहिनं नयतीति च ॥ २३६ ॥
द्वितीयोऽथार्चिरादिस्तु मार्गः सुलभ उत्तमः ।
पुण्यरूजनसंपन्नो निवृत्त्याख्यपुरं गतः ॥ २३७ ॥

शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।
एकया यात्यनावृत्तिमन्ययाऽऽवर्तते पुनः ॥ २६ ॥

एवं मार्गौ ह्यनादी द्वौ तत्रैकः सरलस्तथा ।
अन्यो वक्रश्च सुभट दर्शितस्त्वां समासतः ॥ २३८ ॥

मार्गामार्गादिकं पद्येः सत्यमिथ्यादिकं तथा ।
हिताहिते च जानीहि सहितायैव केवलम् ॥ २३९ ॥
शुभ्रां नौकां पुरः पश्यन्नदेऽगाधे पतेत्तु कः ।
सुपन्थानं विजानंश्च कुमार्गं को नु गच्छति ॥ २४० ॥
विषा-मृतगुणज्ञानी सुधां त्यक्तुं किमिच्छति ।
किं वा ज्ञात्वा सुपंथानं विपथं को नु गच्छति ॥ २४१ ॥
तस्मात्परीक्षयेदादौ सत्यासत्ये विशेषतः ।
एवं परीक्ष्याऽवसरे संकटे न पतेत्कदा ॥ २४२ ॥
नित्यं देहांतकालेऽयं मार्गश्चिताप्रदोऽस्ति वै ।
यतस्तेन विना योगाभ्यासो व्यर्थं गमिष्यति ॥ २४३ ॥
च्युतो मार्गादर्चिराख्यात्पतन्धूमपथे स तु ।
बद्धः संसारपाशेन भ्रमन्नेव हि वर्तते ॥ २४४ ॥
दृष्ट्वैवं परमं कष्टं तस्मान्मुक्तिः कथं भवेत् ।
तस्माद्वौ योगमार्गौ ते मया सम्यङ् निवेदितौ ॥ २४५ ॥
गच्छंतयेकेन ब्रह्मत्वं पुनरावृत्तिरेकतः ।
दैवगत्या तु देहान्ते यो यं प्राप्तो भवेत्स तु ॥ २४६ ॥

नैते सृती पार्थ जानन्योगी मुह्यति कश्चन ।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥ २७ ॥

कदा किं वा भवेदस्य निश्चयं कः करिष्यति ।
तस्मात्सन्मार्गमातिष्ठन्सततं मोक्षभाग्भवेत् ॥ २४७ ॥
अस्तु गच्छतु वा देहः केवलं वस्तु चास्म्यहम् ।
रज्ज्वां सर्पत्वभासश्च रज्जुज्ञाने निवर्तते ॥ २४८ ॥
तरंगा मयि तिष्ठंतीत्येवं किं मन्यते जलम् ।
जलमेव तरंगास्ते तरंगा जलमेव च ॥ २४९ ॥
तरंगोत्पत्तिलोपाभ्यां जन्मनाशौ जलस्य न ।
तथा देही देहयोगात्सदेहं वस्तु केवलम् ॥ २५० ॥
ब्रह्मज्ञाने शरीरस्य न नामाप्यवशिष्यते ।
तदा केन च कालेन लयः कस्य भविष्यति ॥ २५१ ॥

किमर्थं शोधयेन्मार्गं केन कस्मात्कथं त्वियात् ।
देशकालादि सर्वं चेत्स्वयमेवास्ति तत्त्वतः ॥ २५२ ॥
घटभेदे घटाकाशं यदि मार्गो लभेद्दजुः ।
याति तर्हि महाकाशं किं न याति तदन्यथा ॥ २५३ ॥
पश्येद् घटनाशेन घटाकाशः प्रणश्यति ।
गगनं तु यथावत्स्याद्घटोत्पत्तेः पुरापि तत् ॥ २५४ ॥
एवं सुबोधे पूर्णे तु मार्गामार्गादि संकटम् ।
सोऽहमित्यनुभूत्या वै योगिनां न भवेत्कदा ॥ २५५ ॥
अतस्त्वमपि योगेन युक्तो भव धनुर्धर ।
सर्वकाले हि साम्यं तु सहजं तेन गच्छति ॥ २५६ ॥
कुत्रापि च कदाप्येवं देहस्तिष्ठतु गच्छतु ।
अबंधो नित्यभूतश्च ब्रह्मभावो न हीयते ॥ २५७ ॥
न जायते स कल्पादौ कल्पांते न विनश्यति ।
स्वर्गसंसारयोर्मध्ये मोहेनापि न मुह्यति ॥ २५८ ॥
एतद्बोधेन युक्तो यो भवेत्तेनैति तत्फलम् ।
लोपाच्च सर्वभोगानां निजरूपं प्रयाति सः ॥ २५९ ॥
भुंजतींद्रादयो देवाः सर्वशःश्रेष्ठभोगिनः ।
तत्सुखं त्याज्यमेवेति तुच्छीकुर्वंति पांडव ॥ २६० ॥

वेदेषु यज्ञेषु तपःसु चैव
दानेषु यत्पुण्यफलं प्रदिष्टम् ।
अत्येति तत्सर्वमिदं विदित्वा
योगी परं स्थानमुपैति चाद्यम् ॥ २८ ॥

कृतं वेदस्याध्ययनं सुपक्वा यज्ञभूरभूत् ।
संपादितं च सर्वस्वं तपोदानादिकं खलु ॥ २६१ ॥
पुण्यास्योपवनं तच्च व्याप्तं फलभरेण हि ।
निर्मलं तत्परं ब्रह्म नच तेन समं भवेत् ॥ २६२ ॥
नित्यानंदाख्यमानेन तोलितं यद्भवेल्लघु ।

नौपम्यं यत्सुखप्राप्तौ वेदयज्ञादि गच्छति ॥ २६३ ॥
न जुगुप्स्यं समाप्यं न भोक्तुरिच्छाप्रपूरकम् ।
यन्महान्सुखलाभोऽपि कनीयान्ब्रह्मणः सुखात् ॥ २६४ ॥
एवं दृष्टं सुखं सर्वं मृत्यूर्ध्वं प्राप्यते च यत् ।
कृते शतमखे चापि साम्यं नैति कदाचन ॥ २६५ ॥
अलौकिकं सुखं दिव्यदृष्ट्या पश्यंति योगिनः ।
मन्यंते तद्ब्रह्मसुखात्क्षुद्रात्क्षुद्रतरं तु तत् ॥ २६६ ॥
ये स्वर्गसुखसोपाने पदं दत्वा प्रयांति ते ।
परब्रह्मपदं यान्ति ज्ञानिनो नेतरे तथा ॥ २६७ ॥
चराचरैकभाग्यं यद्ब्रह्मेशाराधनं मतम् ।
भोग्यं भोगधनं चापि योगिनां यदिदं स्मृतम् ॥ २६८ ॥
या कला सकलानां च परमानंदपुत्तिका ।
जीवानां जीवनं विश्वस्थितानां प्राणिनां च यत् ॥ २६९ ॥
सर्वज्ञानप्रवाहो यः कृष्णः स्वकुलदीपकः ।
एवं धनंजयं मित्रं कथयामास कौरव ॥ २७० ॥
कुरुक्षेत्रस्य वृत्तांतं राजानं संजयोऽब्रवीत् ।
तामेव श्रूयतां वार्तां ज्ञानदेवोऽवदत्पुरः ॥ २७१ ॥

इति श्रीज्ञानेश्वरविरचितायां भावार्थदीपिकायां अनंतनिरूपणे अष्टमोऽध्यायः ॥ ८ ॥

श्लो० २८ ओ० २७१

गीर्वाणज्ञानेश्वरी



नवमोऽध्यायः

श्रूयतामवधानेनाऽखिलसौख्यस्य पात्रता ।
लभ्यते श्रूयतां स्पष्टं तत्प्रतिज्ञोत्तरं मम ॥ १ ॥
न करोमि प्रौढिवादं सर्वज्ञानां सभास्वहम् ।
दीयतामवधानं मे विज्ञप्तिश्चास्ति बालवत् ॥ २ ॥
भवंत एव श्रीमंतो यदि मातृगृहा मम ।
बालकस्येव लालित्यात्स्यान्मनोरथपूरणम् ॥ ३ ॥
भवत्प्रसन्नताद्दृष्टिभूतोद्यानस्य संपदः ।
दृष्ट्वैव शीतलां छायां विश्रांतोऽहं सुखं शये ॥ ४ ॥
सौख्यामृतह्रदा यूयं यच्मीच्छानुगुणं ततः ।
बिभेमि यदि सख्याय क नु मे शांतता भवेत् ॥ ५ ॥
यथा बालकवाक्येनाऽस्पष्टेनापि पदक्रमैः ।
कौतूहलं विपर्यस्तैर्माता प्राप्नोति सर्वदा ॥ ६ ॥
तथैव वत्सलत्वेन सतां प्रीतिः कथं भवेत् ।
इति पूर्णेच्छयैवात्र युष्मत्स्नेहं वृणोम्यहम् ॥ ७ ॥
तदते सर्वविज्ञाग्रे वक्तुं का योग्यता मम ।
मूढः सारस्वताभ्यासी समर्थः स्यां कथं नु भोः ॥ ८ ॥
सुमहानपि खद्योतः किमु तेजोनिधिं जयेत् ।
कथं योग्यः पाकरसो वर्तुं पीयूषभाजने ॥ ९ ॥
हिमांशोर्वीजनं, गानाचार्ये संगीतडंबरः ।
भूषणं भूषणानां च न कदापि क्षमं भवेत् ॥ १० ॥
ब्रूत किंचान्यतो गन्धं जिघ्रेत्परिमलः स्वयम् ।
सागरः स्नाति वा कूपे, नभो व्याप्तुं किमर्हति ॥ ११
भवद्विधानां विदुषां तृप्त्यर्हा वक्तृता क मे ।
संतृप्येताऽवधानेन यया सदसि मानसम् ॥ १२ ॥

विश्वप्रकाशकं भानुं चर्या नीराजयते न किम् ।
अपांपतिं चांजलिनाऽप्यर्घ्यं नो दीयते किमु ॥ १३ ॥
दीनोऽप्यहं पूजयेय यूयं शंकरमूर्तयः ।
सशब्दनिर्गुंडीपुत्रैः स्वीकुरुध्वं ममार्चनम् ॥ १४ ॥
बालकस्तु पितुः पात्रे भुंजन्भोजयते च तम् ।
पिताप्यानंदतस्तस्य संमुखं कुरुते मुखम् ॥ १५ ॥
तथाहं भवतामग्रे करोमि स्वैरवल्गनम् ।
तेनैव तुष्यथ मुदा प्रेम्णो धर्मः स एव हि ॥ १६ ॥
यस्माद्भवंतो निर्व्याजं मयि प्रेम्णैव मोहिताः ।
तस्मान्मत्कृतसख्येन न वो भारो भविष्यति ॥ १७ ॥
मातुर्वत्सस्य संसर्गात्स्तन्यं प्रस्रूयतेऽधिकम् ।
यथा च प्रेयसो रोषात्प्रेम द्विगुणतामियात् ॥ १८ ॥
सुष्ठं भवत्कृपालुत्वं श्रुत्वा मे बालभाषणम् ।
प्रबोधितमिति ज्ञात्वा स्नेहादुक्तं किमप्यहो ॥ १९ ॥
रुद्धा किं पाच्यते ज्योत्स्ना, वायुर्वहति वेरितः ।
आच्छाद्यते वा गगनं केन वस्त्रादिना बृहत् ॥ २० ॥
यथा जलस्य स्रवणं, नवनीतस्य मंथनम् ।
तथा मदीयं व्याख्यानं लज्जामेति सतां पुरः ॥ २१ ॥
अस्त्विदं यत्र वेदोऽपि सुखं स्वपिति कुंठितः ।
तं गीतार्थं प्राकृतेन वक्तुं शक्नोम्यहं कथम् ॥ २२ ॥
एवं सत्यपि मे बुद्धिः पुरस्थैकाशयान्विता ।
जाताऽतो धैर्यमास्थाय युष्मत्प्रेमकृते ब्रुवे ॥ २३ ॥
चंद्रादप्यधिकं शांतं, जीवनं चामृतादपि ।
मय्यस्तु प्रेम भवतां पूर्णः स्यान्मे मनोरथः ॥ २४ ॥
भवत्कृपादृग्विवर्षे स्याद्बुद्धिः सकलार्थदा ।
औदासीन्ये स्वयं शुष्येद्रूढो ज्ञानांकुरोऽपि मे ॥ २५ ॥
यस्मद्वक्तृत्वविस्तारेऽवधानं पोषकं च वः ।
तथाऽक्षरप्रमेयाणां विकासो भविता स्वयम् ॥ २६ ॥
शब्दार्थेदर्थमारूढा विविधार्थोद्भवस्ततः ।

भक्तिरूपा पुष्पवृष्टिर्वुद्धौ स्यात्प्रेमवर्धनी ॥ २७ ॥
कथासुगंधपवने वाति सिद्धांतमेघराट् ।
वक्तुर्हृदि वहेदंबु रसभंगोऽन्यथा भवेत् ॥ २८ ॥
यच्चंद्रकांतो द्रवति चंद्रस्यैव प्रभावतः ।
तथैव वक्तुर्वक्तृत्वं श्रोत्रधीनमसंशयम् ॥ २९ ॥
न तंदुलाः प्रार्थयंति भोक्तृन्स्वस्वादुताकृते ।
नहि चित्राण्यर्थयंति सूत्रधारं स्वनर्तने ॥ ३० ॥
स नर्तयति यत्तानि स्वकौशल्यप्रसिद्धये ।
तस्मान्न मे खटाटोपकारणं प्रार्थनादितः ॥ ३१ ॥
श्रुत्वेदं गुरुणाप्युक्तमलं प्रास्ताविकेन ते ।
यत्तु नारायणेनोक्तं तद्यथावद्वदाधुना ॥ ३२ ॥
तुष्यन्निवृत्तिदासोऽपि तथेति प्रोक्तवान्वचः ।
श्रीकृष्णोऽकथयद्यत्तत्कथयाम्यवधार्यताम् ॥ ३३ ॥

श्रीभगवानुवाच—

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १ ॥

श्रूयतां पार्थ बीजं यत्कथयामि तवाग्रतः ।
ममांतःकरणस्थं तदपि गूढं वदामि ते ॥ ३४ ॥
इदं जीवगतं गुह्यं किंवा प्रस्फोट्यते त्वया ।
इति शंकां स्वभावेन हृदि कल्पयसे यदि ॥ ३५ ॥
तर्हि प्राज्ञ शृणुष्वेह त्वमास्था मूर्तिमत्यसि ।
तस्मान्न हि मदुक्तस्य त्वमवज्ञां करिष्यसि ॥ ३६ ॥
अतः सुगूढमत्यंतमवाच्यं च प्रकाश्यते ।
किंत्वसद्भूद्गतं तेऽद्य हृदये विशतादिति ॥ ३७ ॥
दुग्धमास्ते स्तने गूढं स्तनो वेत्ति न तद्रसम् ।
तथाप्यनन्यवत्साय माता पाययति स्वयम् ॥ ३८ ॥
गृहस्थितं धान्यबीजमुप्तं भूमावितस्ततः ।

तन्नष्टं भ्रष्टमिति वा वक्तुं योग्यं न कस्यचित् ॥ ३९ ॥
अतः शुद्धमतिर्धीमाननन्यगतिरेव च ।
अनिंदकश्च यस्तस्मै वाच्यं हृद्गतमप्यलम् ॥ ४० ॥
प्रकृते सद्गुणाढ्यश्च त्वां विना कोऽस्ति मेऽधिकः ।
तस्माद्गूढमपि ते नाऽपिधातुमिहोत्सहे ॥ ४१ ॥
शश्वदेवं प्रकथनं स्यात्तव त्रासदायकम् ।
ब्रह्मज्ञानमतस्तेऽद्य सप्रपंचं वदाम्यहम् ॥ ४२ ॥
सत्यमिथ्यामिश्रणेऽपि परीक्ष्यैव परीक्षकाः ।
तयोरसत्यं संत्यज्य संगृह्णंति सदैव हि ॥ ४३ ॥
राजहंसो यथा नीरं क्षीरं च कुरुते पृथक् ।
तथा ज्ञानं च विज्ञानं विभज्य कथयामि ते ॥ ४४ ॥
यथा वा शूर्पधारायां पतितं धान्यमंततः ।
तुसं गच्छति वातेन शुद्धं तदवशिष्यते ॥ ४५ ॥
तथा ज्ञानोदये जाते संसारो नाशमृच्छति ।
दुष्प्राप्यं समवाप्नोति मोक्षैश्वर्यं न संशयः ॥ ४६ ॥

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥ २ ॥

सद्विद्यायाः पदं यच्च गुर्वाचार्यपदास्पदम् ।
गुह्यानामपि यद्गुह्यं पवित्राणां प्रभुश्च यत् ॥ ४७ ॥
सद्धर्मस्य निजं धाम सूत्तमेपूत्तमं तथा ।
यत्प्राप्तौ सहसा न स्यात्पुनर्जननसंभवः ॥ ४८ ॥
गुरोर्मुखान्निःसृतं सद्धृदि शिष्यस्य भासते ।
सुगूढं हृदयस्थं हि प्रत्यक्षं स्यात्स्वरूपतः ॥ ४९ ॥
तथाहि सुखसोपानारोहणं च प्रतीयते ।
यद्दृष्ट्वा जीवशिवयोरैक्यं स्यादप्रयत्नतः ॥ ५० ॥
तथापि ज्ञानसीमायां प्राप्ते चित्ते सुखोदयः ।
एवं परब्रह्मरूपज्ञानं सुलभमेव तत् ॥ ५१ ॥

संत्यन्येऽपि गुणाश्चास्याऽनुभूतं नोनतामियात् ।
न च क्षयमवाप्नोति नैव जीर्णत्वमृच्छति ॥ ५२ ॥
एवंगुणं चेत्तद्वस्तु लोकादुर्वरितं कथम् ।
इति त्वं तार्किकोऽपीह शंकां मा कुरु पांडव ॥ ५३ ॥
ये चैकोत्तरवृद्ध्यर्थं प्रयतंते दिवानिशम् ।
ते पतंति कथं त्यक्त्वा द्रव्यं प्रज्वलितेऽनले ॥ ५४ ॥
पवित्रं परमं रम्यं सुखोपायो यतो भवेत् ।
अत्यंतं सुखदं धर्म्यं समीपे स्वस्य तिष्ठति ॥ ५५ ॥
एवं चेत्सुलभं लोकग्रहादुर्वरितं कथम् ।
इति शंकास्थलेऽप्यत्र न शंकेथास्त्वमण्वपि ॥ ५६ ॥

अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप ।
अप्राप्य मां निवर्तंते मृत्युसंसारवर्त्मनि ॥ ३ ॥

पवित्रं मधुरं दुग्धं संस्थितं यत्त्वचोंऽततः ।
तं त्यक्त्वा रक्तपः प्राणी न रक्तं किमु सेवते ॥ ५७ ॥
दर्दुरः पद्मकंदश्च सदैवैकत्र तिष्ठतः ।
पद्ममास्वाद्यते भृंगैः पंकमेवात्ति दर्दुरः ॥ ५८ ॥
दुर्दैवस्य गृहे गूढं धनमास्ते सहस्रशः ।
स च तस्योपरिस्थोऽपि क्लिश्नात्येव क्षुपोपितः ॥ ५९ ॥
तथा निधानं सौख्यानां सदैव हृदयस्थितम् ।
विहाय मां सुखाराममज्ञास्तु विषये रताः ॥ ६० ॥
दृष्ट्वा मृगजलं सद्यस्त्यजत्याननगां सुधाम् ।
अथवा शुक्तिकालाभादुज्झेत्स्पर्शमणिं गलात् ॥ ६१ ॥
तथाऽहंममताग्रस्ता दुर्बला यांति मां न ते ।
जन्ममृत्यूभयतटमग्ना मज्जंत्यहर्निशम् ॥ ६२ ॥
नित्यदाहं तथैवास्मि सन्मुखो भानुमानिव ।
क्वचिदस्ति क्वचिन्नेति विपर्यासो न चास्ति मे ॥ ६३ ॥

मया ततमिदं विश्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥ ४ ॥

मम स्वरूपविस्तारो जगदेतच्चराचरम् ।
यथा दुग्धं दधि भवेत्परिणामेन केवलम् ॥ ६४ ॥
बीजानि तरुतां यांति, हेमाऽलंकारतामपि ।
तथा ममैव विस्तारश्चराचरमिदं जगत् ॥ ६५ ॥
यन्निराकारमेवेदं विश्वाकारेण विस्तृतम् ।
निर्गुणात्सगुणत्वेन त्रैलोक्यं निर्मितं मया ॥ ६६ ॥
महदादीनि देहांतं भूतजातान्यशेषतः ।
प्रतिबिंबितानि मयि जले फेनोपमानि हि ॥ ६७ ॥
निरीक्षिते तु फेनांतर्न जलं पार्थ दृश्यते ।
स्वप्ने दृष्टाः पदार्थास्तु जागरे यांति संक्षयम् ॥ ६८ ॥
तथैवेमानि भूतानि मयि भांति न तेष्वहम् ।
अस्योपपत्तिस्ते सम्यक्पूर्वमेव प्रपंचिता ॥ ६९ ॥
अस्त्विदं पूर्वमेवोक्तं नार्थश्चर्वितचर्वणे ।
त्वद्दृष्टिः पार्थ मद्रूपे भूयात्स्थिरतरा सदा ॥ ७० ॥

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ।
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥ ५ ॥

यदि पश्यसि मद्रूपं यथावत्कल्पनामृते ।
तर्हि मिथ्येति बुद्धिः स्यात्ततः सर्वगतोऽस्म्यहम् ॥ ७१ ॥
संकल्पात्तमये बुद्धिनेत्रमांद्ये ह्युपस्थिते ।
मत्तो भिन्नानि भूतानि भांति मद्रूसतावपि ॥ ७२ ॥
लीने संकल्पसंध्यांश्येऽवशिष्टः केवलोऽस्म्यहम् ।
नष्टे यद्वद्भ्रांतिसर्पे पुष्पहारोऽवशिष्यते ॥ ७३ ॥
कश्चिन्न, मृद्घटादीनां स्यान्न भूमेः समुद्भवः ।
किंतु चक्रादिसाह्येन कुलालः प्रकरोति तान् ॥ ७४ ॥

अथवा सागरे नास्ते तरंगाणां खनिः कचित् ।
वायोरास्फालनवशादुत्पद्यंते जलोर्मयः ॥ ७५ ॥
किंच कार्पासराशौ किं गूढाऽऽस्ते वस्त्रपेटिका ।
परिधातुर्दशा नूनं कार्पासो वस्त्रतां गतः ॥ ७६ ॥
हेम्नोऽलंकारभावेऽपि हेमत्वं नैव नश्यति ।
तथापि भूपाधर्तॄणामस्त्यलंकारभावना ॥ ७७ ॥
प्रतिध्वनिर्ध्वनेरेवाऽऽदर्शेऽपि प्रतिबिंबकम् ।
तत्किं तस्मात्समुत्पन्नं स्वतो वा ब्रूहि तत्त्वतः ॥ ७८ ॥
एवं शुद्धे मत्स्वरूपे यो भूतानि प्रकल्पते ।
तस्य स्वीयविकल्पेन भूतानां तत्र भावना ॥ ७९ ॥
विकल्पात्मकमायाया लोपे भूतक्षयो भवेत् ।
ततोऽवशिष्टं निर्लेपं पार्थ रूपं ममाखिलम् ॥ ८० ॥
कृते स्वांगभ्रामणेऽपि भ्रमंतो भांति पर्वताः ।
तथा ब्रह्मस्वरूपेऽपि कल्प्यते भूतभावना ॥ ८१ ॥
त्यक्ते विकल्पे भूतानि मयि भूतेष्वहंदृशिः ।
नोदेति यद्वत्स्वप्नेऽपि कल्पनाया निरासतः ॥ ८२ ॥
एकोऽस्मि भूतधर्ताऽहमथवा भूतवासनः ।
संकल्पसन्निपातेन तदिदं जल्पनं भवेत् ॥ ८३ ॥
प्रियोत्तम शृणु ततो यद्विश्वव्यापकोऽस्म्यहम् ।
आश्रयो भूतजातानां कल्पनाविषयः सदा ॥ ८४ ॥
रश्म्याधारान्मृगजलाभासो मिथ्यापि भासते ।
एवं मय्यपि भूतानि कल्पयंति च तेषु माम् ॥ ८५ ॥
जानंति मां सृष्टिकरं जीवाभिन्नोऽस्मि वस्तुतः ।
यथा प्रकाशो भानुश्च ह्येकत्वेनैव वर्तते ॥ ८६ ॥
एवमैश्वर्ययोगो मे ज्ञातश्चेत्तद्वदस्व माम् ।
किमु द्वैतस्य संबंधो लेशतोऽप्यस्ति वास्तवे ॥ ८७ ॥
मत्तस्तथैव भूतानि सत्यं संति न वै पृथक् ।
भूतभिन्नं वितिष्ठंतं बुध्यस्व न कदापि माम् ॥ ८८ ॥

यथाऽऽकाशस्थितो नित्यं वायुः सर्वत्रगो महान् ।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥ ६ ॥

विस्तीर्णं गगनं यावत्तावानस्ति समीरणः ।
चलनाद्दृश्यते भिन्नो वस्तुतश्चैक एव हि ॥ ८९ ॥
तथैवेदं भूतजातं कल्पितं मयि भासते ।
कल्पनायामपेतायामहमस्म्यद्वयः सदा ॥ ९० ॥
तस्माद्भूतानि जातानि नष्टानीत्यस्ति कल्पना ।
तस्या नाशे तु सर्वाणि विलीयंते तया सह ॥ ९१ ॥
विनष्टे कल्पनामूलाज्ञाने लोपस्तयोः सह ।
स्यादथैश्वर्ययोगं मे शृणुष्वाऽवहितः पुरः ॥ ९२ ॥
प्रतीतिबोधजलधौ तरंगोऽसि त्वमेव हि ।
चराचरे जगत्यस्मिंस्त्वमेव व्याप्य तिष्ठसि ॥ ९३ ॥
पार्थं पप्रच्छ भगवान्बुद्धमेवं किमु त्वया ।
द्वैतस्वप्नो मृषेत्येवं यथावज्ज्ञातवानसि ॥ ९४ ॥
तथापि पार्थ बुद्धेस्ते कल्पनारूपनिद्रया ।
अद्वैतबोधो नष्टः स्याद्द्वैतस्वप्ने भ्रमिष्यसि ॥ ९५ ॥
तन्निद्रामार्गभंगेन शुद्धज्ञान्यसि तत्त्वतः ।
एवं भावे वच्मि वर्मे शृणुष्वावहितोऽधुना ॥ ९६ ॥
धनुर्धर शृणुष्वेदं धैर्यवांस्त्वं धनंजय ।
उत्पत्तिस्थितिनाशादि कार्यं माया करोत्यलम् ॥ ९७ ॥

सर्वभूतानि कौंतेय प्रकृतिं यांति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥ ७ ॥

यामाहुः प्रकृतिं सा हि द्विविधोक्ता तवाग्रतः ।
तामष्टधा वदंत्येके द्वितीया जीवरूपिणी ॥ ९८ ॥
मायास्वरूपविस्तारः पूर्वमेव श्रुतस्त्वया ।
किमर्थं कथनं तस्याः करवाणि मुहुर्मुहुः ॥ ९९ ॥
महाकल्पांतसमये सर्वभूतानि चैक्यताम् ।

मम प्रकृतिरूपेऽस्मिन्नव्यक्ते यांति सर्वतः ॥ १०० ॥
ग्रीष्मस्यात्युष्णतापेन सर्वीजानि तृणान्यपि ।
भवंति भूमौ लीनानि संभवंति पुनस्तथा ॥ १०१ ॥
वर्षाकालीनमेघस्य साटोपः शरदागमे ।
सर्वतोऽपि लयं याति मेघस्तु गगनांतरम् ॥ १०२ ॥
किंवाऽऽकाशावकाशेऽपि लयं याति समीरणः ।
निर्वाते च तरंगाणां जले लोपोऽपि जायते ॥ १०३ ॥
किंवा जागृतिवेलायां स्वप्नो मनसि लीयते ।
प्राकृतं प्रकृतौ तद्वत्कल्पांतेऽथ विलीयते ॥ १०४ ॥
कल्पादौ तु पुनश्चाहं सृजामीति जनश्रुतिः ।
एतस्मिन्विषये सम्यगुपपत्तिं वदामि ते ॥ १०५ ॥

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ ८ ॥

पार्थमामेव मन्मायां स्वभावात्स्वीकरोम्यहम् ।
उपादानतया वस्त्रनिर्माणे तंतवो यथा ॥ १०६ ॥
वेम्ना तद्वयनोद्योगे स्याच्चतुष्कांकितः पटः ।
तद्वत्पंचमहाभूताकारा माया प्रकाशते ॥ १०७ ॥
यथा दुग्धं स्वभावेन दधित्वं याति तंचनात् ।
तथा माया सृष्टियोगात्सृष्टिरूपैव जायते ॥ १०८ ॥
यथा जलेन बीजानां भवेच्छायादिविस्तरः ।
तथैव सृष्टिविस्तारो जातो मत्सन्निधानतः ॥ १०९ ॥
राज्ञा नगरनिर्माणं कृत तत्सत्यमेव हि ।
परं किं तस्य निर्माणे राज्ञो हस्तादिपीडनम् ॥ ११० ॥
यश्च व्याप्रियते स्वप्ने जागरेऽपि स एव हि ।
मम प्रकृत्यधिष्ठानं तद्वज्जानीहि तत्त्वतः ॥ १११ ॥
स्वप्नाच्च जागरे यातुः किं भवेत्पादवेदना ।
स्वप्नेऽपि तिष्ठतः किं वा प्रवासो भवति क्वचित् ॥ ११

एतद्विवरणस्यायमाशयः सृष्टिसर्जने ।
नहि कश्चिन्ममायासः प्रायशो भवति क्वचित् ॥ ११३ ॥
राजाधीनाः प्रजाः स्वार्थे व्यापारं तन्वते सदा ।
तद्वन्मदीयः संबंधो मायैव कुरुतेऽखिलम् ॥ ११४ ॥
पूर्णचंद्रोदये जाते वृद्धिं प्राप्नोति सागरः ।
तत्र प्रयासश्चंद्रस्य पार्थ किं स्यान्मनागपि ॥ ११५ ॥
अयस्कांतस्य सान्निध्याद्यल्लोहं भ्राम्यति स्वतः ।
तत्रायासश्चुंबकस्य न मनागपि विद्यते ॥ ११६ ॥
अनेन विस्तरेणालं, मायां स्वीकरवै यदा ।
तदा चराचरस्यास्य विस्तारो भवति क्षणात् ॥ ११७ ॥
भूतग्रामः स एवायं पांडव प्रकृतेर्वशे ।
आस्ते, बीजप्ररोहादौ समर्था भूमिरेव हि ॥ ११८ ॥
किंवा बाल्यादिवयसः कारणं देहसंगमः ।
मेघोद्भवस्तथाऽऽकाशे वर्षर्तुस्तत्र कारणम् ॥ ११९ ॥
स्वप्नस्य कारणं निद्रा, पांडव प्रकृतिस्तथा ।
अशेषप्राणिसंघस्य सैवास्ते मुख्यकारणम् ॥ १२० ॥
स्थावरं जंगमं चैव स्थूलं सूक्ष्मं तथैव च ।
किं बहूक्त्याऽस्य विश्वस्य प्रकृतिर्मूलकारणम् ॥ १२१ ॥
तस्मादियं भूतसृष्टिर्निर्मितायाश्च पालनम् ।
सर्वथेदं द्वयमपि नूनं नैवास्ति मद्वशे ॥ १२२ ॥
जले विलसति ज्योत्स्ना तत्र चंद्रः करोति किम् ।
तथैवैतानि कर्माणि मत्तस्तिष्ठंति दूरतः ॥ १२३ ॥

न च मां तानि कर्माणि निबध्नंति धनंजय ।
उदासीनवदासीनमसक्तं तेषु कर्मसु ॥ ९ ॥

सिंधौ रुद्धो महापूरो न सिंधुं बाधितुं क्षमः ।
कर्मणामहमाधारो बध्नीयुस्तानि मां कथम् ॥ १२४ ॥
कथं नु धूम्रकल्लोलो वातं रोद्धुं क्षमो भवेत् ।
सूर्यबिंबेऽधकारस्य प्रवेशः स्यात्कदि क्वचित् ॥ १२५ ॥

तुदंति किमु वा धाराः पर्जन्यस्य नगोदरम् ।
तथैव कर्मणां बाधा न मां भवति पांडव ॥ १२६ ॥
प्रकृतेः कार्यविस्तारेऽप्यस्म्यहं मुख्यकारणम् ।
तथापि तत्रोदासीनः कारयामि करोमि न ॥ १२७ ॥
गृहे प्रतिष्ठितो दीपो न कारयति कस्यचित् ।
करोति न करोतीति लोकान्नालोचयत्यपि ॥ १२८ ॥
स केवलं साक्षिभूतो गृहकृत्येषु सर्वदा ।
एवं प्राणिषु संतिष्ठन्नुदासीनोऽस्मि तत्कृतौ ॥ १२९ ॥
अभिप्रायोऽयमेव त्वां किं वक्तव्यं मुहुर्मुहुः ।
तत्सुभद्रापते विद्धि यदेतावत्प्रपंचितम् ॥ १३० ॥

मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनाऽनेन कौंतेय जगद्विपरिवर्तते ॥ १० ॥

समस्तसृष्टिकार्याणां कारणं सविता यथा ।
जगतः प्रभवे हेतुर्मुख्यः पंडुसुताऽस्म्यहम् ॥ १३१ ॥
स्वीकरोमि यदा मायां तदा सा सूयते जगत् ।
अतो जानंति सर्वेऽपि मां विश्वोत्पत्तिकारणम् ॥ १३२ ॥
मत्तो भूतानि जायंते वसामि न च तेष्वहम् ।
पश्य ज्ञानप्रकाशेन पार्थ मे योगमैश्वरम् ॥ १३३ ॥
मयि तिष्ठंति भूतानि नैवाहं तेष्ववस्थितः ।
उक्तं पूर्वमिदं वर्म न विसर कदार्जुन ॥ १३४ ॥
तदिदं गूढतत्त्वं मे दर्शितं विशदं हि ते ।
आवृत्येंद्रियजान्भोगानंतश्चानुभवं भज ॥ १३५ ॥
यावन्नेदं हस्तगतं तावत्पार्थ न लभ्यते ।
यत्सत्यरूपलाभोऽपि तुषांतर्वर्तिधान्यवत् ॥ १३६ ॥
अनुमानयत्नेनैव ग्रातं ब्रह्मेति मन्यते ।
तद्वृथा, सिंचनं भूमेर्न स्यान्मृगजलाम्भसा ॥ १३७ ॥
जले प्रसारिते जाले भासतेऽब्जोऽपि जालगः ।
तीरे स्थित्वाऽऽलोचने तु सच्छं बिंबं प्रदृश्यते ॥ १३८ ॥

ब्रुवतेऽनुभवस्यापि वाचालत्वेन ये कथाः ।
तेषां परीक्षासमयेऽनुभवो निष्फलो भवेत् ॥ १३९ ॥

अवजानंति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानंतो मम भूतमहेश्वरम् ॥ ११ ॥

दुःखरूपाद्भवाद्भीतो मल्लाभं त्वं यदीच्छसि ।
तर्हीमामुपपत्तिं द्राक्चित्ते धारय संततम् ॥ १४० ॥
कामलार्दितनेत्रस्तु पीतां पश्यति चंद्रिकाम् ।
तद्वद्भवंति मूढास्तु मद्रूपे दोषदृष्टयः ॥ १४१ ॥
ज्वरेण मुखवैरस्ये दुग्धं स्याद्विषवत्कटु ।
एवं निर्दोषमद्रूपे दोषं पश्यंत्यहो नराः ॥ १४२ ॥
तस्मात्पार्थ मुहुर्वच्मि प्रोक्तं तत्त्वं न विस्मर ।
पश्यसि स्थूलदृष्ट्या चेत्सर्वो यत्नोऽपि निष्फलः ॥ १४३ ॥
पश्यंतः स्थूलदृष्ट्या मां न जानंति यथार्थतः ।
स्वप्ने पीतामृताः कापि नाऽमराः संभवंति ते ॥ १४४ ॥
स्थूलदृष्ट्याल्पमतयो ब्रुवते विप्र इत्यपि ।
तेषां स्थूलाज्ञानमेव भवति प्रतिबंधकम् ॥ १४५ ॥
जले ज्योत्स्नां समालोक्य हंसा मुक्ताफलोत्सुकाः ।
त्यक्त्वाऽऽकाशं यतंतश्च स्वघातं कुर्वते यथा ॥ १४६ ॥
गंगां मुक्त्वा मृगजले धावतां किं फलं भवेत् ।
कल्पद्रुमुज्झ्य बब्बूलं को वार्थः सेवतां तथा ॥ १४७ ॥
नीलरत्नमयं हारं मत्वा हस्ते धृतः फणी ।
किं वा मत्वा नीलमालां गृहीतोऽजगरः करे ॥ १४८ ॥
यद्वा निधानं विज्ञाय खदिरांगारधारणम् ।
प्रतिबिंबं जले दृष्ट्वा कूपे पतति केसरी ॥ १४९ ॥
मत्वा मामपि साकारं वर्तंते दृढभावतः ।
ते चंद्रबुद्ध्या जलगां तच्छायां धर्तुमुद्यताः ॥ १५० ॥
किंवा यः कांजिकं पीत्वा तत्रेच्छति सुधागुणम् ।

एवं तेषां दृढो भावः सर्वथा व्यर्थ एव हि ॥ १५१ ॥
नश्वरं स्थूलरूपं मे मन्वते येऽविनाशिनम् ।
मां भजंति च भावेन कथं तान्प्राप्नुयामहम् ॥ १५२ ॥
अब्धेः पश्चात्तटे गंतुं पूर्वमार्गावलंबनम् ।
को वा कणाँल्लभेज्जातु प्रसभं तुषकण्डनात् ॥ १५३ ॥
तद्वज्ज्ञात्वा स्थूलरूपं शुद्धरूपं लभेन्न सः ।
पार्थ यायात्फेनपायी जलपानफलं किमु ॥ १५४ ॥
तस्मान्मुग्धमनोधर्मैर्बुद्ध्वा साकारमेव माम् ।
जन्ममृत्य्वादिकर्माणि मय्यध्यस्यंति तद्वृथा ॥ १५५ ॥
अनामानं यथा नाम क्रियाहीनमपि क्रियाम् ।
विदेहं देहधर्माश्चाऽऽरोपयंति मृषैव हि ॥ १५६ ॥
आकारशून्ये चाकारो ह्युपचारोऽनुपाधिके ।
विधिहीने कल्पयन्ति व्यवहारादिकं मयि ॥ १५७ ॥
वर्णहीने तथा वर्णं गुणातीते गुणानपि ।
हस्तहीने तथा हस्तौ पादहीनेंऽघ्रियुग्मकम् ॥ १५८ ॥
अमेयस्यापि मे मानं, स्थानं सर्वगतस्य च ।
गाढनिद्राप्रसुप्तस्य वनश्यालोचनादिवत् ॥ १५९ ॥
कर्णौ श्रोत्रविहीनस्य ह्यचक्षुष्कस्य लोचने ।
गात्रं वर्ष्मविहीनस्य रूपहीनस्य रूपकम् ॥ १६० ॥
अव्यक्तं ब्रुवते व्यक्तमिच्छाहीनं स्पृहायुतम् ।
अतृप्तत्वं स्वतस्तृप्तेऽप्यन्यथा भावयंति हि ॥ १६१ ॥
अनावृते चावरणं भूषाहीनेऽपि भूषणम् ।
कारणानां कारणं च मन्यंते मामतंद्रितम् ॥ १६२ ॥
निराकारस्य मूर्तिं च स्वयंभोः स्थापनं तथा ।
सर्वगस्यापि कुर्वंति ह्यावाहनविसर्जने ॥ १६३ ॥
सिद्धैकरूपके बाल्यं तारुण्यं वृद्धतामपि ।
अवस्थाभेदसंबंधं मय्येवारोपयंत्यहो ॥ १६४ ॥
अद्वैतेऽपि मयि द्वैतमकर्तरि च कर्तृताम् ।

अभोक्तरि च भोक्तृत्वं यथेच्छं प्रवदंत्यपि ॥ १६५ ॥
कुलहीने कुलारोपं शाश्वते मृतिकल्पनम् ।
सर्वहृत्स्थे कल्पयंति शत्रुमित्रादिभावनाम् ॥ १६६ ॥
एवं स्वानंदाभिरामेऽप्यनेकसुखकामिताम् ।
अखिलव्यापकं चापि ब्रुवते चैकदेशिकम् ॥ १६७ ॥
तथैव सर्वात्मानं मां क्वचिदेकस्य वैरिणम् ।
अन्यस्य मित्रमिति च वृथा जल्पंत्यनेकधा ॥ १६८ ॥
किं बहुतया मानवानां क्षुद्रान्धर्मानिनेकशः ।
मय्यर्पयंति मौढ्येन विपरीतधियस्तु ते ॥ १६९ ॥
प्रतिमां पुरतो दृष्ट्वा तत्र भक्त्या भजंति माम् ।
भग्नामालोच्य तूर्णं तां संत्यजंति जलाशये ॥ १७० ॥
एवं मनुष्यधर्मान्मय्यारोप्य स्थूलबुद्धयः ।
तेषां तथाविधं ज्ञानं स्याज्ज्ञानस्यान्ध्यकारकम् ॥ १७१ ॥

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥ १२ ॥

जन्म तेषां भवेन्मोघं यथा वृष्टिमृते घनाः ।
दृश्या मृगजलोद्भूतास्तरंगा दूरतो यथा ॥ १७२ ॥
मृत्तिकानिर्मिता ह्यश्वा, भूपा गारुडदर्शिताः ।
किंवा गंधर्वनगराकारो मिथ्यैव भासते ॥ १७३ ॥
उच्चे शाल्मलिवृक्षेऽपि नांतःकाष्ठं बहिः फलम् ।
अजागलस्तनास्तद्वन्निष्फला एव केवलम् ॥ १७४ ॥
यथा शाल्मलिवृक्षस्य त्याज्यमुत्पद्यते फलम् ।
धिङ्ग मूर्खजीवितं तद्वद्धिक्कर्मापि च तस्य यत् ॥ १७५ ॥
यत्तेन पठितं कीशनारिकेलविनाशवत् ।
किंवा मुक्ताफलं दिव्यमंधहस्तेऽर्पितं यथा ॥ १७६ ॥
तेषामधीतं शास्त्रादि कुमारीकरशस्त्रवत् ।
यथाऽधमादृतो मंत्रः सबीजोऽपि निरर्थकः ॥ १७७ ॥

पार्थ तेषां ज्ञानजातं तथैवाचरणादिकम् ।
शुद्धचित्तविहीनानां व्यर्थं भवति सर्वशः ॥ १७८ ॥
उक्ता सा राक्षसी माया सद्बुद्धिं ग्रसति क्षणात् ।
तथैव सद्विवेकादि सा नाशयति मूलतः ॥ १७९ ॥
एवं मायाग्रहग्रस्तार्धिताक्रांता निरंतरम् ।
तमोगुणमुखे चैते पतिताः संति केवलम् ॥ १८० ॥
या चैवाशास्यलालायां हिंसाजिह्वां युनक्त्यपि ।
असंतोषमांसखंडांश्चर्वयत्यविवेकतः ॥ १८१ ॥
याऽनर्थकर्णपर्यंतमोष्ठौ लेढुं बहिर्गता ।
प्रमादपर्वतस्यारात्कंदरा इव संति याः ॥ १८२ ॥
संति यस्या द्वेषदंष्ट्रा विवेकं चूर्णयंति ताः ।
आवृणोति स्थूलबुद्धीनस्थीनि त्वगिव स्वयम् ॥ १८३ ॥
एवं प्रकृतिराक्षस्याः पतंति शक्तिकुंडके ।
ते भ्रांतिकुंडपतिता निमज्जंत्येव संततम् ॥ १८४ ॥
अज्ञानकूपे मग्नानां न विचारबलं क्वचित् ।
त्रुडितानां तथा तेषां वार्तापि श्रूयते न च ॥ १८५ ॥
अस्त्वियं निष्फला वार्ता किं कार्या मुखदूषिका ।
व्यर्थं वाणी क्लेशिता स्यान्मास्तु तद्वर्णनं मुहुः ॥ १८६ ॥
श्रीकृष्णेनैवमुक्ते तु पार्थश्चोमित्यवोचकथत् ।
कृष्णोऽवोचत्साधुकथां शृणु वाचः सुखप्रदाम् ॥ १८७ ॥

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजंत्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥ १३ ॥

भूत्वाऽहं क्षेत्रसंन्यासी पवित्रमनसां नृणाम् ।
सविधे स्वापकालेऽपि वैराग्यं यत्र तिष्ठति ॥ १८८ ॥
अस्त्येषां ब्रह्मजिज्ञासा धर्मो राज्यं करोत्यपि ।
विवेकस्याश्रयीभूतं मनो येषां निरंतरम् ॥ १८९ ॥
गंगास्नानेन ये पूतास्तृप्ताश्च ब्रह्मभोजनात् ।
ये शांतिरूपवृक्षस्य निरूढा नवपल्लवाः ॥ १९० ॥

ये मोक्षस्यांकुरीभूता ये स्तंभा धैर्यमंडपे ।
येऽप्यानंदाब्धिपानीयपूर्णाः कुंभा इव स्थिताः ॥ १९१ ॥
येषां च प्रबला भक्तिर्मुक्तिं त्यजति दूरतः ।
येषां कर्मस्वविरतं नीतिर्जागर्ति धार्मिकी ॥ १९२ ॥
येषामवयवा नित्यं शांत्यलंकारमंडिताः ।
अपि सर्वव्यापकं मामाच्छादयति यन्मनः ॥ १९३ ॥
एवंभूता महात्मानः सत्त्वयुग्दैवसागराः ।
यावद्दृष्टं वस्तुमात्रं मद्रूपं भावयंति ये ॥ १९४ ॥
ततः संवर्धितप्रेम्णा महात्मानो भजंति माम् ।
परं तेषां मनोधर्मे द्वैतस्पर्शो न विद्यते ॥ १९५ ॥
एवं पांडव मद्रूपा भक्ताः कुर्वंति सेवनम् ।
अथ तेषां चमत्कारं वच्मि त्वमवधारय ॥ १९६ ॥

सततं कीर्तयंतो मां यतंतश्च दृढव्रताः ।
नमस्यंतश्च मां भक्त्या नित्ययुक्ता उपासते ॥ १४ ॥

मत्कीर्तनस्य नटनात्प्रायश्चित्तं न शिष्यते ।
मनसः संयमात्प्रायः पापनाम न दृश्यते ॥ १९७ ॥
यमादीन्विकलान्कृत्वा त्यक्त्वा तीर्थादरं तथा ।
व्यवहारांस्तथा याम्यान्सदा कुर्वंति कुंठितान् ॥ १९८ ॥
यमः कं यमयेयेति, दमो ब्रूते जयामि कम् ।
तीर्थानि कं पावयामो यत्र दोषो न विद्यते ॥ १९९ ॥
मन्नामकीर्तनं त्वेवं विश्वदुःखहरं स्मृतम् ।
महासुखेनैव पूर्णं तूर्णं स्यादखिलं जगत् ॥ २०० ॥
विनोदयं प्रकाशंते ह्यमराश्चाऽमृतं विना ।
योगैर्विनापि कुर्वंति प्रत्यक्षं मोक्षदर्शनम् ॥ २०१ ॥
येषां तुल्यो नृपो रंको मन्यंते न पृथुं लघुम् ।
जगत्यानंदभुवनं सर्वेषां तुल्यमेव हि ॥ २०२ ॥
केचिद्गच्छंति वैकुंठं मोक्षो यैः सुलभः कृतः ।

नामसंकीर्तनाधारात्पाविताश्चाखिला जनाः ॥ २०३ ॥
तेजसा सूर्यसंकाशा, भानुमानस्तमेति हि ।
चंद्रः पर्वणि पूर्णः स्यादिमे पूर्णा निरंतरम् ॥ २०४ ॥
नौपम्यमेषां मेघस्य स वर्षास्वेव वर्षति ।
न कश्चिदुपमापात्रं कृपासिंहाश्च मे स्मृताः ॥ २०५ ॥
सहस्रजन्मपुण्येन वाचि नाम पतेत्क्वचित् ।
अखंडं नाम तत्तेषां मुखे नृत्यति सर्वदा ॥ २०६ ॥
नाहं लभेयं वैकुंठे न तथा सूर्यमंडले ।
न योगिनां मानसानि शश्वत्तिष्ठामि भारत ॥ २०७ ॥
मन्मार्गेणमवद्यं चेत्प्रसंगेन क्वचित्तदा ।
मन्नामगर्जनं यत्र तत्रैव निवसाम्यहम् ॥ २०८ ॥
कीर्तने रमणाद्येषां देशकालादिविस्मृतिः ।
कीर्तनस्य सुखेनैव स्वात्मन्येव रताः सदा ॥ २०९ ॥
कृष्ण विष्णो हरे रामेत्येवं गायनतत्पराः ।
आत्मानात्मविवेकस्य चर्चां कुर्वत्यनारतम् ॥ २१० ॥
अस्त्विदं पार्थ जानीहि केऽप्यटंति चराचरे ।
गायंतो मद्गुणगणान्संसारे निःस्पृहाः सदा ॥ २११ ॥
तथा पार्थ शृणुष्वेदं पंचप्राणानपि स्वयम् ।
जयंति सह चित्तेन प्रकारैर्बहुभिश्च ते ॥ २१२ ॥
यमादिभिर्बहिर्वृत्त्या ह्यंतर्वज्रासनोद्यमात् ।
नित्यं प्राणायामबाणान्ये मुंचंति दिवानिशम् ॥ २१३ ॥
कुंडलिन्याः प्रकाशेन मनःप्राणबलेन च ।
जयंति ब्रह्मरंध्रस्यामृतकुल्यामयत्नतः ॥ २१४ ॥
प्रत्याहाराद्विक्रमेण विकारान्सपरिच्छदान् ।
जित्वेंद्रियाणि बध्नंति स्वांतःकरणपंजरे ॥ २१५ ॥
तावद्धीरा धारणाभ्याः पंचतत्त्वानि चैकतः ।
कुर्वंति तावदिच्छायाः प्राप्नोति चतुरंगिणी ॥ २१६ ॥
ततो जयजयारावैर्ध्वजो ध्यानस्य गर्जति ।

एकाग्रतायाः साम्राज्यं शोभामाप्नोति वै तदा ॥ २१७ ॥
समाधिवैभवं पूर्णं तथात्मानुभवासनम् ।
पट्टाभिषेकः साम्राज्ये ब्रह्मवाक्यैः प्रजायते ॥ २१८ ॥
पार्थ मद्भजनं त्वेवमत्यंतं कठिनं किल ।
शृणुष्वान्यं प्रकारं ते कथयामि समासतः ॥ २१९ ॥
तिर्यंचः सरलाश्चापि विस्तृतास्तंतवोऽपरे ।
तद्वन्मां सर्वगं सूत्रे जानंति न मदन्यथा ॥ २२० ॥
यावद्ब्रह्माणमारभ्याऽखिलं यन्मक्षिकावधि ।
तदंतवर्ति दृश्यं च मत्स्वरूपं विदंति ते ॥ २२१ ॥
स्थूलं सूक्ष्मं न ब्रुवते न सजीवं विजीवकम् ।
मत्वा मद्रूपमखिलं दृष्ट्वैव प्रणमंति च ॥ २२२ ॥
विस्मृत्य श्रेष्ठतां स्वस्य योग्यायोग्यं च लक्षणम् ।
अखिलप्राणिमात्रेभ्यो नमस्कुर्वंत्यहर्निशम् ॥ २२३ ॥
ऊर्ध्वस्थानादधोभागे गच्छत्येव यथा जलम् ।
तथोच्चान्नीचपर्यंतं स्वभावात्प्रणमंति ते ॥ २२४ ॥
फलपूर्णा तरोः शाखा नम्रीभूता भवेद्भुवि ।
एवं जगत्प्रणामार्थं शिरः कुर्वंत्यधः सदा ॥ २२५ ॥
सदैव गर्वरहिता येषां सम्पद्विनीतता ।
जयजयेति मंत्रेण सर्वस्वं चार्पयंति माम् ॥ २२६ ॥
त्यक्तमानाभिमानाश्च मत्स्वरूपं गताः सदा ।
सर्वेथैवं मद्भजने भ्रमंति च निरंतरम् ॥ २२७ ॥
एवं श्रेष्ठा भक्तिरपि प्रोक्ता त्वां प्रत्यशेषतः ।
भजंति ज्ञानयज्ञेन पार्थ वच्मि शृणुष्व तान् ॥ २२८ ॥
तथापि पद्धतिं तेषां ज्ञास्यसि त्वं यथातथम् ।
एकदा सा विस्तरेण पार्थ प्रोक्ता पुरैव[1] ते ॥ २२९ ॥
तदा प्रोक्तं पांडवेन देव सत्यं श्रुता मया ।
परंतु दैवात्संप्राप्ते पीयूषे कः कदेदलम् ॥ २३० ॥

---

१ चतुर्थाध्यायस्य त्रयस्त्रिंशात्पद्यात्.

पार्थस्यैवं वचः श्रुत्वा ज्ञात्वा श्रवणलालसाम् ।
श्रीकृष्णोऽतः समाधाय प्रसन्नः सन्नुवाच तम् ॥ २३१ ॥
धन्यस्त्वमसि कौंतेय भवदास्थावलोकनात् ।
पुनरुक्तिरयुक्तापि प्रब्रवीमि तवाग्रतः ॥ २३२ ॥
श्रीकृष्ण किमिदं ब्रूषे येयं चंद्रस्य चंद्रिका ।
न केवलं चकोरार्थं जगदर्थं प्रकाशते ॥ २३३ ॥
तथापि निजतृप्त्यर्थं चकोरश्चंद्रमीक्षते ।
तथाहं प्रार्थयामि त्वां कृपासिंधुर्यतो भवान् ॥ २३४ ॥
मेघस्य महती शक्तिर्विश्वदुःखशमक्षमा ।
तन्महावर्षमानेन चातकतृट् कियत्यसौ ॥ २३५ ॥
स्वल्पतोयार्थमपि यद्गंगायाः प्राप्यते तटे ।
तथा महत्या लब्ध्या वा खेच्छायाः पूरको हरिः ॥ २३६ ॥
कृष्णः प्रोवाच पार्थाऽलं संतुष्टं हृदयं मम ।
त्वत्कृतायाः स्तुतेरत्र नैवावश्यकता मम ॥ २३७ ॥
सावधानः शृणोषीति तदेवोत्साहयस्यहो ।
एवं संमानयन्पार्थं श्रीकृष्णः पुनरुक्तवान् ॥ २३८ ॥

ज्ञानयज्ञेन चाप्यन्ये यजंतो मामुपासते ।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥ १५ ॥

शृणुष्व त्वं ज्ञानयज्ञं पंचभूतानि मंडपः ।
यज्ञस्तंभस्तु संकल्पः पशुर्जीवेशयोर्भिदा ॥ २३९ ॥
गुणाश्च पंचभूतानामिंद्रिय-प्राणपंचकम् ।
इदमेवोपकरणं स्वाज्ञानं यद्धविर्घृतम् ॥ २४० ॥
मनोबुद्धी उभे कुंडे ज्ञानाग्नी दीप्यतो यतः ।
समत्वं यच्च चित्तस्य सैवोक्ता यज्ञवेदिका ॥ २४१ ॥
विवेकशक्तिकौशल्यं विद्धि मंत्राननेकशः ।
शांतिश्च स्रुक्स्रुवौ पार्थ जीवो यज्ञस्य कारकः ॥ २४२ ॥
जीवोऽनुभवपात्रैश्च विवेकात्मकमंत्रकैः ।

ज्ञानरूपाग्निहोत्रेण नाशयत्युभयोर्भिदाम् ॥ २४३ ॥
तदाऽज्ञानस्य लोपः स्यात्कर्तृयज्ञौ च नश्यतः ।
जीवस्याऽवभृथस्नानं ब्रह्मात्मैक्यरसे शुभम् ॥ २४४ ॥
तदा भूतानि विषयाश्चेंद्रियाणि पृथङ् नहि ।
ब्रह्मरूपः स्वयं भूत्वा जानात्येकं स चाखिलम् ॥ २४५ ॥
स्वप्ने यद्विविधं सैन्यमहमेकस्तदाऽभवम् ।
इत्थं जागरिते कोऽपि यदि ब्रूयात्तथैव तत् ॥ २४६ ॥
स्वामी सेनाऽखिलाऽसत्या ह्येक एवास्मि निश्चितम् ।
यस्यैवं भासते तस्य विश्वं स्यादेकमेव हि ॥ २४७ ॥
जीवोऽहमित्यसरणं स्यादाब्रह्म तृणावधि ।
ऐक्ययज्ञेन यजतां ब्रह्मरूपमिदं जगत् ॥ २४८ ॥
तदनादौ जगत्यस्मिन्भिन्नाः प्रकृतयस्त्विमाः ।
तासां च नामरूपाणि संति पार्थ पृथक्पृथक् ॥ २४९ ॥
एवं दृष्ट्वापि भिन्नत्वमैक्यज्ञानं न नश्यति ।
यद्यप्यवयवा भिन्नास्तथाप्येकं शरीरकम् ॥ २५० ॥
शाखानां विविधत्वेऽपि तरुरेको विराजते ।
सविता त्वेक एवास्ति किरणास्तु सहस्रशः ॥ २५१ ॥
यद्यपि व्यक्तयोऽनंता भिन्नप्रकृतिनामकाः ।
तथापि सर्वभूतेषु जानंत्येकमवस्थितम् ॥ २५२ ॥
एवं ज्ञात्वापि भिन्नत्वं ज्ञानयज्ञं चरंति ये ।
ज्ञानिनस्तेऽपि मंतव्या भिन्नभावतिरस्कृतेः ॥ २५३ ॥
यदा यदा यत्र यत्र यद्यत्पश्यंति सर्वतः ।
तत्तन्मद्यतिरिक्तं हि नैव पश्यंति किंचन ॥ २५४ ॥
जलोत्थो बुद्बुदो यद्वज्जल एव विराजते ।
स नाशावसरे भूयो जलमध्ये विलीयते ॥ २५५ ॥
वातोत्थानां भूरकणानां पृथिवीत्वं न गच्छति ।
पतिता यदि ते भूयः पृथ्व्यामेव समासते ॥ २५६ ॥
एवं केनापि भावेन यत्तद्भवतु वा न वा ।

यत्सर्वं नाहमेवेति येषा भवति भावना ॥ २५७ ॥
यावन्मम व्यापकत्व तेषामनुभवो महान् ।
जानतोऽनतरूप मा वर्तते विश्वमावत ॥ २५८ ॥
यथा चेद सूर्यबिंबमखिलाना दृशो पुर ।
भाति तद्वदिमे नित्य विश्वस्य पुरत स्थिता ॥ २५९ ॥
पाडवैषा भावनाया नातर्भागो बहिस्तथा ।
वायुर्यथैव गगने व्याप्य पूर्णोऽस्ति सर्वत ॥ २६० ॥
एव चाह यथा पूर्णस्तेषा भक्तिश्च तादृशी ।
तेषामकरणेऽपि स्यात्सहज भजन मम ॥ २६१ ॥
सर्वगोऽह यत पार्थ कथ जह्यादुपासनाम् ।
यथार्थज्ञानहीना ये तेषा प्राप्यो नचास्म्यहम् ॥ २६२ ॥
विहित ज्ञानयज्ञ ये कुर्वते भजन मम ।
एव चोपासकास्तुभ्य कथिता वर्तनादिभि ॥ २६३ ॥
कृतानि सर्वकर्माणि याति मा सर्वतोमुखे ।
मूढा मा न विजानति तेषा प्राप्यो नचास्म्यहम् ॥ २६४ ॥

अहं क्रतुरहं यज्ञः स्वधाऽहमहमौषधम् ।
मंत्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ॥ १६ ॥

तज्ज्ञानस्योदये जाते तत्र वेदोऽहमेव च ।
वेदप्रोक्त विधान च यज्ञोऽपि स्वयमस्म्यहम् ॥ २६५ ॥
कर्मणश्च तथा तस्माद्यथासागो मखो भवेत् ।
स यज्ञोऽप्यहमेवेति विद्धि पार्थ यथार्थत ॥ २६६ ॥
तथा स्वाहा स्वधा चाह सोमवल्ल्यप्यह शुचि ।
अहमाज्य च समिधो मत्राश्चाहुतयोऽप्यहम् ॥ २६७ ॥
ऋत्विजो हवनस्थान मद्रूपश्च हुताशन ।
होमद्रव्याणि सर्वाणि तान्यह विद्धि पाडव ॥ २६८ ॥

पिताऽहमस्य जगतो माता धाता पितामहः ।
वेद्य पवित्रमोंकार ऋक् साम यजुरेव च ॥ १७ ॥

अष्टप्रकृतिसंगेऽस्य सा प्रसूतेऽखिलं जगत् ।
स श्रीरंगः पृथापुत्र सर्वस्यास्यास्म्यहं पिता ॥ २६९ ॥
अर्धनारीश्वरो यद्वत्स एव स्त्री पुमानपि ।
तथा चराचरस्यास्य माता चाहं न संशयः ॥ २७० ॥
यत्रेदं तिष्ठति जगदायुर्वृद्धिर्यतोऽस्ति हि ।
तत्सर्वं मद्दते नैव द्वितीयं चास्ति पांडव ॥ २७१ ॥
प्रकृतिः पुरुषश्चेति द्वंद्वं समभवद्यतः ।
स सर्वशक्तिभुवनेऽप्यहमस्मि पितामहः ॥ २७२ ॥
अर्जुनेमे ज्ञानमार्गा यत्र संमीलिताः सह ।
चतुर्वेदाश्च गर्जंतो यं वेद्यं कथयंत्यपि ॥ २७३ ॥
अभूद्यत्र मतैक्यं च शास्त्राणां मित्रता मिथः ।
भ्रांतज्ञानानि चैकत्वाद्यं पवित्रं ब्रुवंति हि ॥ २७४ ॥
ब्रह्मबीजांकुरा ये वै चतुर्वाचां च मंदिरम् ।
एवंभूतो य ॐकारः सोऽहं मात्रात्रयात्मकः ॥ २७५ ॥
ॐकारस्योदरादेव अ-उ-मेत्यक्षरत्रयम् ।
समभूत्सह वेदांस्त्रीन्समादायैव पांडव ॥ २७६ ॥
ऋग्-यजुः-सामत्रितयं वेदानामस्म्यहं किल ।
श्रुतेः परंपरैवेयं कृष्णः प्रोवाच सादरम् ॥ २७७ ॥

गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् ।
प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् ॥ १८ ॥

प्रकृत्यंतःसमाविष्टमिदं विश्वं चराचरम् ।
विश्रान्त्यर्थं याति यत्र तदहं स्थानमुत्तमम् ॥ २७८ ॥
प्रकृतिं जीवयति यस्तया जगदचीक्लृपत् ।
तस्याः संबंधयोगेन स भुनक्ति गुणत्रयम् ॥ २७९ ॥
स विश्वलक्ष्म्या भर्ता च विद्धि निश्चयतोऽस्म्यहम् ।
तथा जगत्त्रयस्यापि मुख्यः परिवृढोऽस्म्यहम् ॥ २८० ॥
स्थैर्येण वियता सेयं चंचलत्वेन वायुना ।

अग्निना दाहकत्वेन मेघेनापि च वर्षता ॥ २८१ ॥
महीभ्रैर्न स्थलं त्याज्यं नोल्लंघ्यं सिंधुना तटम् ।
भूतभारं वहति भूरेतत्सर्वं ममाज्ञया ॥ २८२ ॥
मत्प्रेरितो वदेद्वेदः सूर्यस्तपति मद्वशे ।
मत्प्रयुक्तश्चलेत्प्राणो यो जगच्चालकः स्मृतः ॥ २८३ ॥
ममैव चाज्ञया कालो भूतानि ग्रसति स्वयम् ।
एवं यस्याज्ञया पार्थ सर्वे व्यवहरंति हि ॥ २८४ ॥
एवंविधः समर्थः स जगन्नाथोऽहमेव च ।
सर्वत्राकाशवत्साक्षी सोऽहमस्मीति विद्धि भोः ॥ २८५ ॥
सर्वथा यो जगद्व्यापी संभृतो नामरूपयोः ।
तयोः संरक्षको यश्च विद्धि सोऽस्मि नचापरः ॥ २८६ ॥
यथा जले तरंगाश्च तरंगेषु जलं यथा ।
मयि सर्वमहं तत्र जीवनं जगतोऽस्म्यहम् ॥ २८७ ॥
मय्यनन्यं तारयामि जन्ममृत्युभयात्सदा ।
शरणागतरक्षार्थमेक एव करोम्यहम् ॥ २८८ ॥
प्रकृतेस्तु गुणैर्भिन्नैरहमेकोऽप्यनेकधा ।
प्राणरूपैर्जीवमात्रेष्वावासो विद्यते मम ॥ २८९ ॥
अयं सिंधुस्तटाको वेत्यविचिंत्य रविर्यथा ।
प्रतिबिंबत्यहं तद्वद्व्याप्तस्त्रैलोक्यजीवगः ॥ २९० ॥
तथाऽहमर्जुनाधारस्त्रैलोक्यस्यास्य सर्वशः ।
उत्पत्तिस्थितिनाशानामस्म्यहं मूलकारणम् ॥ २९१ ॥
बीजोत्था वृक्षशाखाद्याः संलीयंते मुहुस्ततः ।
विश्वोत्पत्तिश्च संकल्पात्संकल्पे सा विलीयते ॥ २९२ ॥
बीजरूपं तथाऽव्यक्तं संकल्पवासनान्वितम् ।
यत्र तिष्ठति कल्पांते नूनं तत्स्थानमप्यहम् ॥ २९३ ॥
निराकारस्थित्युदये नामरूपे प्रणश्यतः ।
जातिभेदाश्च लुप्यंते वर्णव्यक्तिसमन्विताः ॥ २९४ ॥
पुनः सृष्ट्युत्पत्तिकाले ससंकल्पाश्च वासनाः ।

गृहासतेऽमरा यत्र पार्थ तत्स्थानमप्यहम् ॥ २९५॥

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥ १९ ॥

तपामि सूर्यरूपेण तदेतच्छोपयाम्यहम् ।
इंद्ररूपेण वर्षेयं पुनर्जलभृतिस्तदा ॥ २९६ ॥
अग्निना ज्वलिते काष्ठे काष्ठं यात्यग्निरूपताम् ।
तद्वद्धंता च घात्यश्च पार्थाऽहमुभयात्मकः ॥ २९७ ॥
मृत्युरूपात्मकं यद्यत्तत्तन्मद्रूपमेव च ।
अविनाशि च यत्तत्र तत्सर्वमहमस्म्यहो ॥ २९८ ॥
बहुनाऽत्र किमुक्तेन तात्पर्यार्थं ब्रवीमि ते ।
सद्वाऽसद्वाऽखिलं दृश्यं विद्धि पार्थाऽहमेव तत् ॥ २९९ ॥
यत्राहं नास्मि तत्पार्थ स्थानं नैवास्ति कुत्रचित् ।
तथापि मां न जानंति जीवा दुर्दैवयोगतः ॥ ३०० ॥
शुष्यंति किं जलमृते तरंगाः, किरणा रवेः ।
किमदृश्या विना दीपं, तद्वज्जानंति मां न ते ॥ ३०१ ॥
अंतर्बहिरिदं विश्वमोतप्रोतं भृतं मया ।
देवो नास्तीति वल्गंति तेषां दुर्दैवमेव तत् ॥ ३०२ ॥
सुधाकूपेऽपि पतितास्ततो निर्गंतुमुद्यताः ।
एवमज्ञानपूर्णाश्चेत्किं कार्यं तत्र तान्प्रति ॥ ३०३ ॥
ग्रासमात्रान्नलाभार्थमंधो धावति सर्वतः ।
आंध्येनाग्रे स्थितं रत्नं प्रत्यस्यति पदा यथा ॥ ३०४ ॥
ज्ञानसंगं विना तद्वद्भूयादन्धसमा स्थितिः ।
ज्ञानं विना च कर्माणि कृतान्यप्यकृतानि हि ॥ ३०५ ॥
गरुडस्याप्यंधतायां सपक्षत्वेऽपि किं भवेत् ।
तथैव ज्ञानहीनत्वे कर्मायासा निरर्थकाः ॥ ३०६ ॥

त्रैविद्या मां सोमपाः पूतपापा
यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते ।

ते पुण्यमासाद्य सुरेंद्रलोक–
मश्नन्ति दिव्यान्दिवि देवभोगान् ॥ २० ॥

इदं पांडव जानीहि ये वर्णाश्रमधर्मिणः ।
विधिमार्गरताश्चैव प्रमाणीभूय च स्थिताः ॥ ३०७ ॥
सानंदाः कुर्वते यज्ञं चालयंति सुराः शिरः ।
फलेन सहिता यज्ञास्तिष्ठंत्यपि च तत्पुरः ॥ ३०८ ॥
ततश्च सोमपातारो यज्ञरूपा भवंति ते ।
पुण्यनाम्नाऽप्यर्जयंति पापमेव पृथासुत ॥ ३०९ ॥
विज्ञाय वेदत्रितयं कृत्वा यज्ञान्शतावधि ।
मत्प्राप्तिं ये तिरस्कृत्य स्वर्गमिच्छंति केवलम् ॥ ३१० ॥
स्थिता कल्पतरोर्मूले भिक्षापात्रकरा नराः ।
यथा धावन्ति भैक्ष्यार्थं धनुर्धर तथैव ते ॥ ३११ ॥
शतयज्ञैश्च मामिष्ट्वा कुर्वंति स्वर्गचिंतनम् ।
कथं वाच्यमिदं पुण्यं पार्थ पातकमेव तत् ॥ ३१२ ॥
स्वर्गप्राप्तिं मद्विना ते ब्रुवते पुण्यमार्गकम् ।
ततः स्यातां जन्ममृत्यू हानिं तां मन्वते बुधाः ॥ ३१३ ॥
विचारे नारकाद्दुःखाद्वरं स्वर्गसुखं खलु ।
अखंडानंदसंपूर्णमेकं मद्रूपमेव हि ॥ ३१४ ॥
मद्दर्शनायागमने पंथानौ द्वौ प्रकीर्तितौ ।
स्वर्गश्च नरकश्चेति चौरमार्गौ न संशयः ॥ ३१५ ॥
पापयुक्सुकृतात्स्वर्गो नरकः पापपातकात् ।
नियता येन मत्प्राप्तिस्तच्छुद्धं पुण्यमीरितम् ॥ ३१६ ॥
अपि ये संति मद्रूपाः कर्मभिश्चैव वंचिताः ।
तत्कर्म पुण्यं ब्रुवतां जिह्वा गलति नैव किम् ॥ ३१७ ॥
अस्त्विदं प्रकृते विद्धि यज्ञैरिष्ट्वापि मां ततः ।
वांछंति स्वर्गजान्भोगानाचीर्णैः सर्वकर्मभिः ॥ ३१८ ॥
ते मामंतरिताः संतः पापयुक्सुकृतं ततः ।
संपाद्य च महोत्साहाद्यांति स्वर्गमशाश्वतम् ॥ ३१९ ॥

यत्रामरत्वमेवोच्चैः सिंहासनमुदीरितम् ।
ऐरावतसमो हस्ती नगरी चामरावती ॥ ३२० ॥
भांडाराण्यष्टसिद्धीनां पीयूषस्यापि संचयाः ।
कुलानि कामधेनूनां संचरंति ततस्ततः ॥ ३२१ ॥
देवसंचारपंथानो नानारत्नैर्विनिर्मिताः ।
आरामाः कल्पवृक्षाणां मनोरंजनकारकाः ॥ ३२२ ॥
यत्र गायंति गंधर्वा नृत्यंत्यप्सरसस्तथा ।
उर्वश्याद्या विलासिन्यो यत्र संति मनोहराः ॥ ३२३ ॥
अनंगः शयनेष्वास्ते गृहान्संमार्ष्टि चंद्रमाः ।
सेवार्थं सेवका यत्र तूर्णं धावंति वायुवत् ॥ ३२४ ॥
द्विजा गीष्पतिमुख्याश्च शक्राशीरर्थमुद्यताः ।
स्तुतिपाठोद्यता देवाः संत्यनंताः समंततः ॥ ३२५ ॥
मंडयंतो नृपपदं लोकपाला यतस्ततः ।
उच्चैःश्रवःसमा वेगे धावंत्यश्ववरा यतः ॥ ३२६ ॥
एवमैश्वर्यसंपन्नं स्वर्गाख्यं सुखभाजनम् ।
पुण्यसंचयपर्यंतमुपभुंजंति याज्ञिकाः ॥ ३२७ ॥

ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशंति ।
एवं त्रयीधर्ममनुप्रपन्ना
गतागतं कामकामा लभंते ॥ २१ ॥

ते सर्वं सुकृते क्षीणे भ्रष्टैश्वर्यास्ततः क्षणात् ।
पुनरेव प्रपद्यंते मृत्युलोकं यथा पुरा ॥ ३२८ ॥
सर्वस्वे हस्तगे वेश्या द्रव्यदं त्यजति क्षणात् ।
तथैवैषां याज्ञिकानां दुर्दशां किमु वर्णये ॥ ३२९ ॥
प्रसंगेऽपि च मां त्यक्त्वा पुण्यात्स्वर्गं गता अपि ।
नामरत्वं स्थिरं तेषां मृत्युलोकं पतंत्यधः ॥ ३३० ॥
मातुर्गर्भे पुनर्गत्वा विष्टानिकटवर्तिनि ।

नवमासं पुनर्जन्म धृत्वा मरणमाप्नुयुः ॥ ३३१ ॥
स्वप्ने लब्धो निधिर्नूनं जागरे नैव दृश्यते ।
याज्ञिकानां स्वर्गसौख्यं पार्थ विद्धि तथैव तत् ॥ ३३२ ॥
यदि वेदार्थसंपन्नो मदज्ञानाद्वृथा गतः ।
तुषनिर्वापणे यद्वत्कणाभावाद्वृथा श्रमः ॥ ३३३ ॥
व्यर्थास्तथा मद्रहिता धर्मास्त्रैविद्यजा अपि ।
अतो मां तत्त्वतो ज्ञात्वाऽऽनंदं भुंक्ष्व यथेप्सितम् ॥ ३३४ ॥

अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ २२ ॥

स्वचित्तं सर्वभावेन मह्यं यैरर्पितं सदा ।
तान्रक्षामि, स्वरक्षार्थं गर्भः प्रयतते किमु ॥ ३३५ ॥
एवं येषां मद्रहितं कर्तव्यं नैव विद्यते ।
मदर्थमेव देहोऽपि रक्षितो यैः प्रयत्नतः ॥ ३३६ ॥
एवमेकाग्रचित्तेन कुर्वते मदुपासनाम् ।
तथैव तानहं शश्वत्पार्थ रक्षामि सर्वतः ॥ ३३७ ॥
यदा त ऐक्यभावेन भक्तिमार्गमुपाश्रिताः ।
ततः प्रभृत्येव सदा तेषां चिंतां वहाम्यहम् ॥ ३३८ ॥
मनसा ध्रियते यत्तैस्तत्सर्वं करवाण्यहम् ।
बालाननुद्भूतपक्षान्यथा रक्षति पक्षिणी ॥ ३३९ ॥
क्षुत्तृडार्तापि यन्माताऽपत्यार्थं यतते यथा ।
तथाऽस्मदर्थं यततां सर्वं संपादयाम्यहम् ॥ ३४० ॥
मत्प्राप्तिवासनां तेषां पूरयामि कुतूहलात् ।
मत्सेवायै प्रयततां दद्यां प्रेम तदंतरे ॥ ३४१ ॥
एवं मनसि यं भावं धारयंति पुनश्च ते ।
तं सर्वं पूरयित्वाथ दत्तं रक्षामि सर्वदा ॥ ३४२ ॥
एवमेकांतभक्तानां योगक्षेमं वहाम्यहम् ।
तथा तत्कांक्षितानां च सदा पूरयिताप्यहम् ॥ ३४३ ॥

येऽप्यन्यदेवताभक्ता यजंते श्रद्धयान्विताः ।
तेऽपि मामेव कौंतेय यजंत्यविधिपूर्वकम् ॥ २३ ॥

अज्ञात्वा व्यापकं मां ये पारंपर्यमुपाश्रिताः ।
अग्नींद्रसूर्यसोमादीन्मत्प्राप्त्यर्थं भजंति च ॥ ३४४ ॥
मामेवाप्नोति तत्सर्वमखिलव्यापकत्वतः ।
परं नासावृजुर्मार्गो भजनं सरलं न च ॥ ३४५ ॥
एकस्यैव तु बीजस्य वृक्षशाखादयो न किम् ।
मूलेनैव जलादानमंतस्तत्तर्पयत्यलम् ॥ ३४६ ॥
एकस्यैव तु देहस्यापींद्रियाणि पृथग्दश ।
तैः पृथग्विषयादानं तदेकत्रैव गच्छति ॥ ३४७ ॥
कृत्वोत्तमं स्वयंपाकं किमु कर्णे समर्पयेत् ।
किंवा सुगंधिपुष्पाणि वध्नीयान्नेत्रदेशतः ॥ ३४८ ॥
मुखेन भक्षयेदन्नं गंधं नासिकया हरेत् ।
तद्वन्मद्भावनां कृत्वा मम पूजां समाचरेत् ॥ ३४९ ॥
अज्ञात्वा यत्तु भजनं ज्ञेयं निष्कारणं हि तत् ।
कर्मनेत्रसमं ज्ञानं तन्निर्दोषमपेक्षितम् ॥ ३५० ॥

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।
न तु मामभिजानंति तत्त्वेनातश्च्यवंति ते ॥ २४ ॥

पश्य पंडुसुतान्यच्च यज्ञद्रव्यादिभुक्परः ।
वस्तुतः को मदन्योऽस्ति सर्वकर्मफलप्रदः ॥ ३५१ ॥
यज्ञस्यादौ तथा चांतेऽप्यहमेकोऽस्मि तत्त्वतः ।
परं दुर्बुद्धयस्त्यक्त्वा मामिंद्रादीनुपासते ॥ ३५२ ॥
यद्देयपित्रुद्देशेन गंगायां गांगमर्प्यते ।
मामर्प्यते मदीयं च तत्र भिन्ना हि भावना ॥ ३५३ ॥
एवंविधा जनाः सर्वे मार्गाक्रष्टा भवंति हि ।
यत्रास्था विद्यते तेषां यांति तत्रैव ते मुहुः ॥ ३५४ ॥

यांति देवव्रता देवान् पितॄन्यांति पितृव्रताः ।
भूतानि यांति भूतेज्या यांति मद्याजिनोऽपि माम् २५

ये कायवाङ्मनोभिश्च देवानेव भजंति हि ।
देहत्यागानंतरं ते देवा एव भवंति च ॥ ३५५ ॥
पितृणां प्रीणनार्थाय पितृनेव यजंति ये ।
आयुषोंऽते तु ते सर्वे पितृलोकं प्रयांति च ॥ ३५६ ॥
क्षुद्रदेवोपासकाश्च जारणे मारणे रताः ।
भूतप्रेतपिशाचादीन्साधुयंत्यनिशं तु ये ॥ ३५७ ॥
तेषां देहावसाने तु पिशाचत्वमवाप्यते ।
स्ववासनानुसारेण प्राप्नुवंति फलान्यपि ॥ ३५८ ॥
ये मां पश्यंति नेत्राभ्यां नाम शृण्वंति कर्णतः ।
मां चिंतयंति चित्तेन गुणगानं मुखेन हि ॥ ३५९ ॥
सर्वैरंगैश्च सर्वत्र मां नमंति सदैव च ।
मदुद्देशेन कुर्वंति दानपुण्यादिकं च यत् ॥ ३६० ॥
येषां मदर्थेऽध्ययनमंतर्यागं च मत्कृते ।
यैः स्वीयं सर्वमायुष्यं मदर्थं व्ययितं किल ॥ ३६१ ॥
हरेर्यशो वर्धयेमेत्येवं चैषामहंकृतिः ।
येषां चित्ते तु जगति लोभो मत्प्राप्तये किल ॥ ३६२ ॥
मत्प्राप्त्यर्थं सकामा ये प्रेम्णोऽर्थं प्रेमकारकाः ।
मोहिता मम मोहेन लौकिकं नैव जानते ॥ ३६३ ॥
येषां मत्प्राप्तये शास्त्रं मंत्राश्चापि मदाप्तये ।
येषां व्यापारमात्रं च सर्वं मद्भजनाय हि ॥ ३६४ ॥
एवंभूता मृतेः पूर्वमपि मद्रूपतां गताः ।
ते मृत्योः परमन्यत्र क गच्छेयुर्वदस्व माम् ॥ ३६५ ॥
ये हि मद्भजने लग्नाः सायुज्यपदमागताः ।
मह्यं यैः सर्वभावेन कृतं स्वस्य समर्पणम् ॥ ३६६ ॥
आत्मत्वमंतरा नान्यदस्ति मत्प्रेमकारणम् ।
उपचाराः केऽपि चान्ये न मद्दर्शनकारकाः ॥ ३६७ ॥
शास्त्रमानी न जानाति न धन्यो धन्यमान्यपि ।
मनुते मुक्तमात्मानं स बद्धः सर्वथैव हि ॥ ३६८ ॥

कृत्वापि यज्ञदानादि चित्ते गर्वं वहंति ये ।
मत्प्राप्तिविषये तेषां तृणतुल्यैव योग्यता ॥ ३६९ ॥
पार्थ ज्ञानबलेनापि को वेदेभ्योऽधिको भवेत् ।
शेषादप्यधिकः को वा वक्तास्ति भुवनत्रये ॥ ३७० ॥
शेषोऽभूच्छयनं यस्य मूकाऽभूच्नेत्यपि श्रुतिः ।
सनकाद्या मुनिजना भ्रांता आसंश्च यत्कृते ॥ ३७१ ॥
शंकरादधिकः कोऽपि तपस्विषु न विद्यते ।
सोऽपि पादोदकं यस्य मूर्ध्ना वहति सादरम् ॥ ३७२ ॥
किंवा लक्ष्म्या अपि महान्श्रीमत्त्वेनास्ति कश्चन ।
यद्गृहे ऋद्धिसिद्ध्याद्या दास्यं कुर्वंति नित्यशः ॥ ३७३ ॥
ता गृहाणि च बध्नंति नाम्नाऽमरपुराणि च ।
तेषु शक्रादयो देवाश्चित्राणीव विभांति हि ॥ ३७४ ॥
तद्गृहाणां भंजने तु शक्राद्या यांति रंकताम् ।
दास्यः पश्यंति यान्वृक्षान्यांति ते कल्पवृक्षताम् ॥ ३७५ ॥
यस्या दास्यः प्रभावाढ्या नंदंति सततं गृहे ।
सा लक्ष्मीः पट्टमहिषी मानं नाप्नोति यत्पदे ॥ ३७६ ॥
मानमुज्झित्य सा पार्थ मनोभावेन सेवया ।
आस्ते यत्पादसेवार्थं पात्रीभूय यदंतिके ॥ ३७७ ॥
अतस्त्यक्त्वा स्वं महत्त्वं विद्यागर्वं च सर्वशः ।
विहरेच्च विलीनः सन्मत्प्राप्तिः स्यात्तदैव हि ॥ ३७८ ॥
सूर्यतेजःप्रकाशाग्रे चंद्रो निस्तेजतां व्रजेत् ।
तत्र प्रकाशाभिमानः खद्योतस्य वृथैव सः ॥ ३७९ ॥
यत्र श्रीवैभवं न्यूनमपूर्णं धूर्जटेस्तपः ।
अज्ञानी पातकी तत्र मां ज्ञास्यति कथं हि सः ॥ ३८० ॥
त्यक्त्वा देहाभिमानं स्वं श्लाघ्यैर्निजगुणैः सह ।
सर्वैश्वर्यमदेनापि कुर्यादारातिकं मम ॥ ३८१ ॥

---

१ वेदो नेति नेति=इदं न इदं नेत्येव कथयति.

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ २६ ॥

उल्लासाद्दृढभावेन मत्समर्पणहेतुना ।
कस्यापि फलवृक्षस्य भक्त्यार्पयति यः फलम् ॥ ३८२ ॥
तद्यावन्मत्पुरो यातं न यातं तावदेव हि ।
कराभ्यां प्रतिगृह्याद्मि तत्सप्रसवबंधनम् ॥ ३८३ ॥
पश्य यद्भक्तिभावेन पुष्पं केनचिदर्पितम् ।
मुखे क्षिपामि सद्यस्तदाघ्रेयं नासयापि हि ॥ ३८४ ॥
अस्त्विदं पुष्पविषये, वृक्षपत्रमपि प्रियम् ।
कोमलं वाथ शुष्कं वा महीरुहसमुद्भवम् ॥ ३८५ ॥
अपि चेद्भक्त्युपहृतं मत्वाऽमृतसमं हि तत् ।
भुक्त्वा तृप्तिं प्रयास्यामि यथा पीयूषभक्षणात् ॥ ३८६ ॥
यदा हि तरुपत्राणि दुष्प्राप्याणि भवंति चेत् ।
तदा पार्थ न दुष्प्राप्यं जलं भवति कुत्रचित् ॥ ३८७ ॥
तत्तु सर्वत्र सुलभं लभ्यते च विना धनम् ।
जलमप्यर्पयेत्प्रेम्णा भक्तिभावपुरःसरम् ॥ ३८८ ॥
महांति तेन वैकुंठान्मंदिराण्यर्पितानि मे ।
कौस्तुभादधिकान्मन्येऽलंकारांस्तेन चार्पितान् ॥ ३८९ ॥
तेन दुग्धनिभा शय्या क्षीराब्धिसदृशी शुभा ।
भक्त्या मनोहरा स्वच्छा मामुद्दिश्य विनिर्मिता ॥ ३९० ॥
कर्पूरागरजा गंधा मेरुतुल्याः समर्पिताः ।
नीराजनेन मन्येऽहं सूर्यमालेव दर्शिता ॥ ३९१ ॥
सुपर्णवद्वाहनानि, कल्पद्रूपवनानि च ।
कामधेनुसमूहाश्च मन्ये तेन समर्पिताः ॥ ३९२ ॥
माधुर्येऽमृतकल्पानि सुपक्वान्नान्यनेकशः ।
भक्त्यार्पितं च पानीयमुभयं तुल्यतोपदम् ॥ ३९३ ॥
अधिकं किमु वक्तव्यं सुदाम्नः पृथुका मया ।
भक्षिता ग्रंथिमुन्मुच्य तच्छ्रुतं न किमु त्वया ॥ ३९४ ॥

भक्तिमान्यदि चेत्कोऽपि सुमहानथ वा लघुः ।
प्रेमपात्रं मम भवेद्यतो भक्तिभुगस्म्यहम् ॥ ३९५ ॥
निमित्तमात्रं तद्भक्तेः पत्रं पुष्पं फलं जलम् ।
केवलं भक्तिरेवास्ति मद्भक्तेः साधनं महत् ॥ ३९६ ॥

तस्मादर्जुन यत्नेन भक्तिबुद्धिमुपाश्रय ।
स्वमनोमंदिरे भक्त्या मत्स्मृतिः सुस्थिरा भवेत् ॥ ३९७ ॥

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणम् ॥ २७ ॥

करोषि यानि कर्माणि तथा भोगान्भुनक्षि यान् ।
यज्ञादिभिर्यजसि यत्स्विष्टैर्बहुधनव्ययात् ॥ ३९८ ॥
ददासि पात्रे दानानि सेवकेभ्यश्च वेतनम् ।
तपांसि यान्यर्जयसि शरीरक्लेशतः सदा ॥ ३९९ ॥
किंवा सहजया गत्या यद्यत्कर्म करोषि हि ।
तत्तत्सर्वं भक्तिपूर्वं सर्वदा मह्यमर्पय ॥ ४०० ॥
मुक्त्वाऽभिमानं विस्मृत्य स्वकर्तृत्वं तथा हृदि ।
निष्कामः सत्कर्मजातं निःशेषं मां समर्पय ॥ ४०१ ॥

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबंधनैः ।
संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥ २८ ॥

यथाऽग्निदग्धबीजानि नांकुराय भवंति हि ।
मय्यर्पणे सदसतां कर्मणां स्यात्फलं न ते ॥ ४०२ ॥
सशेषं यदि कर्म स्यात्कारणं सुखदुःखयोः ।
तथासति पुनर्जन्म भूयादर्जुन तत्कृते ॥ ४०३ ॥
तथापि जन्ममरणे न भवेतां मदर्पणे ।
जन्माभावे तत्समुत्थाः क्लेशाः स्युश्च तिरोहिताः ॥ ४०४ ॥
तदर्थं कर्मसंन्यासयुक्तिः पार्थ मयोदिता ।
तां समाचर सद्यस्त्वं वृथा कालं न हापय ॥ ४०५ ॥

देहबंधोऽनया न स्यात्सुखदुःखाब्धिमज्जनम् ।
प्रविष्टे सहजं सौख्यं सर्वानंदमये मयि ॥ ४०६ ॥

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।
ये भजंति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥ २९ ॥

कथं त्वमिति चेद्रूपे सर्वभूतेष्वहं समः ।
अहंममेति भेदस्तु मय्यर्जुन न विद्यते ॥ ४०७ ॥
ज्ञात्वैवं मामहंकारबीजमुद्ध्वंसयंति ये ।
कृत्वाऽर्पयंति भक्त्या मामंतःकरणपूर्वकम् ॥ ४०८ ॥
देहस्था इव दृश्यंते मां प्राप्ता अपि सर्वदा ।
वसामि हृदये तेषां नित्यं मद्भावितात्मनाम् ॥ ४०९ ॥
बीजाद्वटतरोर्जातः शाखापल्लवविस्तरः ।
सूक्ष्मबीजे स प्रविष्टश्चास्ते व्याप्य तदंतरम् ॥ ४१० ॥
एवं परस्परं भेदा ह्युभयोर्नाममात्रतः ।
कृते सूक्ष्मविचारे तु सोऽहमस्म्येक एव हि ॥ ४११ ॥
आहृत्य भूषणान्यन्याद्यथा तैः स्वांगभूषणम् ।
तथोदासीनभावेन त्यागिनां देहधारणम् ॥ ४१२ ॥
वायुसंगाद्गते गंधे तद्धीनं कुसुमं यथा ।
एवमायुर्दायशेषाद्भुवने संति केवलम् ॥ ४१३ ॥
किंतु तेषामहंकारो भक्तिमालंब्य सर्वतः ।
मद्रूपे प्रविशत्येव निश्चयेनार्जुन स्वतः ॥ ४१४ ॥

अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मंतव्यः सम्यग्व्यवसितो हि सः ॥ ३० ॥

एवं प्रेम्णैव भजतां न पुनर्जन्मसंभवः ।
धनुर्धर स कोऽप्यस्तु जात्योच्चो नीच एव वा ॥ ४१५ ॥
किं च तेषामाचरणमस्ति पापमयं किल ।
तथापि भक्तिमार्गे यैर्देहो व्यापारितः सदा ॥ ४१६ ॥

अंतकाले मतिर्यद्वद्वृत्तिर्भवति तादृशी ।
अतोऽते भक्तिमालंब्य शरीरं स्थापितं तु यैः ॥ ४१७ ॥
यः पूर्वं सुदुराचारोऽप्यंते सर्वोत्तमांतरः ।
ब्रुडितोऽपि महापूरे जीवन्याति ततो बहिः ॥ ४१८ ॥
तीरागतस्य ब्रुडनं सुपूरेऽपि वृथैव तत् ।
तद्वत्पापं लयं याति पार्थांते भक्तिकारणात् ॥ ४१९ ॥
पापयुक्तोऽपि यः पश्चात्तापतीर्थे निमज्जति ।
याति मां शरणं चापि स्वांतःकरणभावतः ॥ ४२० ॥
कुलं तस्य पवित्रं च निष्कलंकं तथा यशः ।
जन्मनः सार्थकं शश्वदपि तेनैव साधितम् ॥ ४२१ ॥
अधीताः सकला विद्यास्तपांस्याचरितानि च ।
तद्वदष्टांगयोगोऽपि सभ्यस्तस्तेन दुष्करः ॥ ४२२ ॥
अस्त्वयं बहुविस्तारो मय्यास्थां यद्युपागतः ।
सर्वकर्मभ्य एवासावुत्तीर्णोऽभवदंततः ॥ ४२३ ॥
एकनिष्ठापेटिकायां न्यस्य बुद्धिमनःस्थितिम् ।
मयि तामथ मंजूषां यः स्थापयति संततम् ॥ ४२४ ॥

क्षिप्रं भवति धर्मात्मा शश्वच्छांतिं निगच्छति ।
कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥ ३१ ॥

सोऽपि कालांतरेणैव याति मद्रूपतामिति ।
न मन्येथाः कदाऽपि त्वममृतस्थो म्रियेत किम् ॥ ४२५ ॥
यावन्नोदयते सूर्यस्तावद्रात्रिं प्रचक्षते ।
भक्तिमुज्झित्य कुर्वंति तन्महापातकं न किम् ॥ ४२६ ॥
तस्माद्यस्य मनोभूमौ मत्सांनिध्यं भवेद्यदा ।
तदैव मत्स्वरूपं स पार्थ प्राप्नोति तत्त्वतः ॥ ४२७ ॥
दीपात्प्रज्वालिते दीपे पौर्वापर्यं न दृश्यते ।
सदा मद्भजकोऽप्येवं प्राप्नोति ममरूपताम् ॥ ४२८ ॥
मत्स्थितिं शांतिकांत्यादि लभतेऽखंडमेव सः ।
किं बहुना जगत्यस्मिन्स मज्जीवेन जीवति ॥ ४२९ ॥

पार्थ किं पुनरुक्तेन वारंवारं तवांतिके ।
यस्य मत्प्राप्तिरिष्टा स्यात्स भक्तिं विसरेन्नहि ॥ ४३० ॥
कुलीनत्वं नचापेक्ष्यं वंशशुद्धिश्च नेप्सिता ।
नच व्युत्पत्तिरभ्यासः क्वचित्स्वल्पोऽप्यपेक्षितः ॥ ४३१ ॥
नापेक्षा रूपवयसोर्न संपत्तिरपेक्षिता ।
मयि भक्तिर्न चेत्सर्वं सदपि व्यर्थमेव तत् ॥ ४३२ ॥
कणहीनाश्च मंजर्यो व्यर्थं जाता ह्यनेकशः ।
जनशून्यं च नगरं व्यर्थं यद्यपि सुंदरम् ॥ ४३३ ॥
किंवा सरोवरं शुष्कं, योगो वा दुःखिनोर्वने ।
अथवा सुमहान्वृक्षो वंध्यपुष्पैः प्रफुल्लितः ॥ ४३४ ॥
तथैव वैभवं व्यर्थं कुलजात्यादिकं वृथा ।
गतप्राणो यथा देहः सांगोपांगोऽपि निष्फलः ॥ ४३५ ॥
तथा मद्भक्तिरहितं जीवितं व्यर्थमेव हि ।
पाषाणाः स्थूलसूक्ष्माश्च पृथिव्यां प्रसृता यथा ॥ ४३६ ॥
घनापि हिवेरच्छाया निषिद्धा सज्जनैर्यथा ।
तथैवाखिलपुण्यानि भक्तिहीनं त्यजंत्यहो ॥ ४३७ ॥
पारिभद्रः फलाढ्यश्चेद्वायसानां समृद्धिदः ।
तथा मद्भक्तिहीनोऽपि पापानामाश्रयो भवेत् ॥ ४३८ ॥
खर्परं षड्रसैः पूर्णं स्थापितं चेच्चतुष्पथे ।
तच्छुनामुपभोगाय भवेन्नैव च सद्व्यये ॥ ४३९ ॥
तथा भक्तिविहीनो यः पुण्यं स्वप्नेऽपि नाचरेत् ।
देहावसानपर्यंतं दुःखान्येव भुनक्ति सः ॥ ४४० ॥
अतो नहि कुलापेक्षा यदि जात्यांत्यजोऽपि हि ।
अथवा पशुदेहोऽस्तु मद्भक्तया श्रेष्ठ एव सः ॥ ४४१ ॥
नक्राक्रांतगजेंद्रेणाऽकारि मत्स्मरणं यदा ।
विमुच्य नीतः सारूप्यं न पशुत्वात्तिरस्कृतः ॥ ४४२ ॥

१ दुष्टकंटकिवृक्षछाया.

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यांति परां गतिम् ॥३२॥

ये नामग्रहणायोग्यजातिजा अधमाधमाः ।
पापयोनिसमुद्भूताः पार्थ लोकबहिष्कृताः ॥ ४४३ ॥
ये नीचाः पापयोनित्वाज्ज्ञानेऽपि प्रस्तरा इव ।
परं येषां दृढा भक्तिर्मय्यस्ति सततं शुभा ॥ ४४४ ॥
मन्नामगायनं वक्त्रे दृष्ट्या मद्रूपदर्शनम् ।
यन्मनो मद्विरहितं संकल्पं वेत्ति न क्वचित् ॥ ४४५ ॥
श्रोत्राभ्यां श्रूयते यैस्तु सदा मद्गुणकीर्तनम् ।
सर्वांगे भूषणं दिव्यं मम सेवैव यैः कृता ॥ ४४६ ॥
यद्बुद्धेर्विषयो नान्यो ज्ञानं वापि न माममृते ।
एवंस्थितास्ते जीवंति, मरणं यांति चान्यथा ॥ ४४७ ॥
एवमेव च सर्वस्वं भावो मय्येव रक्षितः ।
यज्जीविताय चाधारोऽप्यहमेवास्मि पांडव ॥ ४४८ ॥
ते पापयोनिसंभूताः शास्त्राध्ययनवर्जिताः ।
तुलनायां न ते मत्तो न्यूनाः क्वापि भवंति हि ॥ ४४९ ॥
दैत्यैर्भक्तिबलेनैव देवाः सर्वे पराजिताः ।
अहं प्रह्लादभक्तयर्थं नारसिंहोऽभवं तदा ॥ ४५० ॥
प्रह्लादेन मदर्थं हि सोढाः संकटराशयः ।
तस्य चारित्रगानेन मद्देयमपि लभ्यते ॥ ४५१ ॥
दैत्योद्भवस्यापि तस्य शक्रादीनां न योग्यता ।
ममाऽधदयकता भक्तेर्जातिर्न हि विचार्यते ॥ ४५२ ॥
राजमुद्रांकितं चर्मखंडं भवति रिक्थवत् ।
सर्वे पदार्थास्तेनैव लभ्यंते पार्थ भूतले ॥ ४५३ ॥
मुद्रां विना सुवर्णं वा रौप्यं वा न क्षमं क्वचित् ।
मुद्रांकिताश्चर्मणस्तु व्यवहारा भवंति हि ॥ ४५४ ॥
अतः पार्थ मनोबुद्धी भक्तिमुद्रांकिते यदि ।
तदैव सत्कुलीनत्वं सर्वज्ञत्वं च राजते ॥ ४५५ ॥

अतो वर्णकुलादीनि संति निष्कारणानि हि ।
निःसीमभक्तियोगेन सर्वं भवति सार्थकम् ॥ ४५६ ॥
कथमप्यस्तु सा भक्तिस्तया मत्प्राप्तिमृच्छति ।
पार्थ पूर्वस्थितिस्तस्य कथमप्यस्तु देहिनः ॥ ४५७ ॥
स्रोतसां क्षुद्रता तावद्यावन्नो यांति जाह्नवीम् ।
गंगाजले प्रविष्टानि तद्रूपाणि भवंति हि ॥ ४५८ ॥
खदिरश्चंदनो वेति तावद्भेदेन तिष्ठतः ।
यावत्प्रदीपिते वह्नौ न पतेतां कथंचन ॥ ४५९ ॥
यावन्मद्रूपता पार्थ न लब्धा देहिनां क्वचित् ।
तावत्क्षत्रियविट्शूद्रा विभक्ता जातयः पृथक् ॥ ४६० ॥
यथाब्धौ लवणं यातमब्धित्वं याति तत्क्षणम् ।
तथा मद्भक्तियुक्तानां न जातिव्यक्तिकल्पनम् ॥ ४६१ ॥
नद्यो नदाश्च दृश्यंते पूर्वपश्चाद्वहा इव ।
सिंधोः समागमात्पूर्वं पार्थक्यं न ततः परम् ॥ ४६२ ॥
येनकेन प्रकारेण चित्ते मयि समर्पिते ।
अनायासेन मद्रूपप्राप्तिर्भवति निश्चितम् ॥ ४६३ ॥
स्पर्शस्य छेदनमिषाद्लोहस्पर्शो यदा भवेत् ।
तत्क्षणे स्वर्णतां याति लोहं सर्वात्मना यथा ॥ ४६४ ॥
पश्य मत्प्रेमव्याजेन गोप्यश्चित्तार्पणान्मयि ।
निःसीमभक्तया सारूप्यं न प्राप्ताः किं धनंजय ॥ ४६५ ॥
कंसो भीत्या चिंतयन्मामगच्छन्मत्स्वरूपताम् ।
शिशुपालादयो वैरभावान्मोक्षं गताः किल ॥ ४६६ ॥
यादवाः पांडवाश्चापि सुहृत्त्वान्मुक्तिमागताः ।
देवकीवसुदेवाद्या मोक्षं याता ममत्वतः ॥ ४६७ ॥
शुकः सनत्कुमाराश्च ध्रुवोऽक्रूरश्च नारदः ।
भक्त्यैव सर्वे मां प्राप्ता अभवन्मोक्षभागिनः ॥ ४६८ ॥
गोप्यः काममिषाच्चऽभवन्कंसो भीत्याऽनुचिंतनात् ।
शिशुपालादयो वैरात्सायुज्यं प्रापिता मया ॥ ४६९ ॥

भक्त्या वाथ विरक्त्या वा वैरेण विषयेच्छया ।
यथा केनापि मां प्राप्तास्तेषां निर्वाणदोऽस्म्यहम् ॥ ४७० ॥
पार्थ प्राप्तुं मत्स्वरूपं मार्गाणां न्यूनता नहि ।
येनकेनापि मार्गेण मां प्राप्तो मोक्षभाग्भवेत् ॥ ४७१ ॥
जातौ कस्यांचिदुद्भूय भजनं वैरमेव वा ।
चिंतनं वैरभावेन कृतं भजनमेव तत् ॥ ४७२ ॥
ययाकयापि वा रीत्या शरणं मां प्रयाति चेत् ।
तदा मद्रूपता तस्य हस्ते प्राप्नोति तत्त्वतः ॥ ४७३ ॥
जन्मास्तु पापयोन्यां वा वैश्यः शूद्रोऽगनाऽस्तु वा ।
निःसंशयं मद्भजनाद्याति मद्धाम शाश्वतम् ॥ ४७४ ॥

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥ ३३ ॥

सर्ववर्णेषु ये श्रेष्ठाः स्वर्गलोकाधिकारिणः ।
आकरा मंत्रविद्यानां मूर्धन्या ब्राह्मणाः स्मृताः ॥ ४७५ ॥
ये भूचरा भूमिदेवास्तपोमूर्तय एव च ।
तीर्थानामपि माहात्म्यमुद्भूतं येभ्य एव तु ॥ ४७६ ॥
संति येषु सदा वेदा वेदप्रावरणं च ये ।
कृपाशीर्वचनैर्येषां कल्याणं वर्धते सदा ॥ ४७७ ॥
यद्दास्यारूपतोयेन वृद्धिः सत्कर्मणां भवेत् ।
येषां सदिच्छासामर्थ्यात्सत्यत्वं ह्यस्ति जीवितम् ॥ ४७८ ॥
येषां च वैदिकैः शब्दैरग्नेरायुष्यवर्धनम् ।
समुद्रेणात्मनस्तोयं येभ्यः प्रेमार्थमर्पितम् ॥ ४७९ ॥
मयाऽपसारिता लक्ष्मीः कौस्तुभोऽपि धृतः करे ।
येषां पादरजःप्राप्त्यै हृदयं पुरतः कृतम् ॥ ४८० ॥
ब्राह्मणांघ्र्युत्थितं लक्ष्म धृतं वक्षःस्थले मया ।
गांभीर्यस्यैव रक्षार्थं पार्थान्यन्नास्ति कारणम् ॥ ४८१ ॥
कालाग्निरुद्रमर्दनं येषां क्रोधः प्रजायते ।
प्रसादेऽसिलसिद्धीनां लब्धाः स्युः सर्वसिद्धयः ॥ ४८२ ॥

एव हि ब्राह्मणा पूज्या स्वत सुरतराशय ।
भजका याति मद्रूपमिति किं तत्समर्थनात् ॥ ४८३ ॥
चंदनागानिलस्पर्शान्निंबो भवति चदन ।
निर्जीवोऽपि स देवाना याति मूर्धसु सर्वदा ॥ ४८४ ॥
स चदन कथ तत्र न यायाद्रघवत्तम ।
न यायादिति केनापि कथित चेन्मृषैव तत् ॥ ४८५ ॥
विपदाहस्य शाति स्यादिति निश्चित्य सादरम् ।
शंकरेण कलार्धोऽपि ललाटे विधृतो विधु ॥ ४८६ ॥
चद्रादप्यधिक शातो गधादरश्च विशेषत ।
विधु सर्वांगलेपाय चदनो नैति योग्यताम् ॥ ४८७ ॥
किंवा स्वल्पोदकानीनि गगा गत्वा तदाश्रयात् ।
सहज सागर याति गगाया कान्यथा गति ॥ ४८८ ॥
तत्साधेषा गतिमानदाता सरक्षिताप्यहम् ।
राजर्षीणा ब्राह्मणानामपि निर्वाणदोऽस्म्यहम् ॥ ४८९ ॥
नाव प्राप्य शतच्छिद्रा कथ पार गमिष्यति ।
दृष्ट्वा शालाग्रपृष्ठे चाऽनावृताग कथ व्रजेत् ॥ ४९० ॥
स्वागे पतति पाषाणे चर्मणाच्छाद्यते न किम् ।
रोगाश्च तेनै।पथार्थमौदार्मीन्य नहीप्यते ॥ ४९१ ॥
धनवर्षा व्याप्नुवति ततोऽन्यत्र व्रजेत्र किम् ।
एव तु गदससारे प्राप्त कि न भजेद्धि माम् ॥ ४९२ ॥
मा विहाय सुत पार्थ सुखसासारिको भवेत् ।
पार्थ स्वसारपर्याप्ता सपत्ति कि गृहे स्थिता ॥ ४९३ ॥
किंवा विद्यो मद्भजन तारुण्य ज्ञानमेव वा ।
स्वैर निश्चयेनेति को विश्वस्तुमिहार्हति ॥ ४९४ ॥
सर्वं भोग्यपदार्थास्तु देहसौख्याय सति ते ।
परिणामे देहमपि कालो ग्रसति निश्चितम् ॥ ४९५ ॥
यत्र दुःखधरा पूर्णं मृत्योराशिश्च निश्चिता ।
मृत्युलोकस्थानि च दारभ्याणुपस्थितम् ॥ ४९६ ॥

जीवतः सौख्यदं पार्थ विद्यते किमु तत्र वै ।
निरग्निशीतलांगाराध्मानाद्दीपो भवेत्कथम् ॥ ४९७ ॥
विषकंदं संप्रपीड्य रसं निष्काश्य यत्नतः ।
मत्वाऽमृतं स पीतश्चामरत्वार्थं मृतिप्रदः ॥ ४९८ ॥
तद्वद्वैषयिकं सौख्यमत्यंतं दुःखदं हि तत् ।
तदेव मूर्खाः सेवंते सुखभावेन तेऽनिशम् ॥ ४९९ ॥
अथवा स्वशिरश्छित्त्वा पादव्याधिप्रशांतये ।
यथैवाचरणे तद्वन्मर्त्यलोकसुखं स्मृतम् ॥ ५०० ॥
मृत्युलोके सौख्यवार्ता श्रुता केन कदापि किम् ।
अंगारकृतशय्यायां सुखस्वापयदेव सा ॥ ५०१ ॥
यत्र चंद्रः क्षयग्रस्त उदयोऽस्तार्थमेव हि ।
प्रगृह्य सुखरूपं हि दुःखं क्लिश्नाति चाखिलान् ॥ ५०२ ॥
मंगलस्यांकुरोत्पत्तौ प्राप्तमेवास्त्यमंगलम् ।
उदरांतः प्रविश्यापि कालो गर्भं जिघांसति ॥ ५०३ ॥
वहंतं संसारचिंतां यमदूता नयंत्यपि ।
क्व नीताः केन मार्गेणेत्यादपि श्रूयते न च ॥ ५०४ ॥
शोधितेष्वपि मार्गेषु पुनरागमनं दृश्यते ।
पुराणेषु कथाः प्रोक्ता मृतानामेव सर्वशः ॥ ५०५ ॥
तत्रत्यक्षणिकत्वस्य यथावद्वर्णनाय हि ।
आयुर्मानं ब्रह्मणोऽपि न पर्याप्तं भवेत्खलु ॥ ५०६ ॥
मृत्युलोकस्थितावेवं जीवान्स्वस्थतया स्थितान् ।
आलोच्य हृदये नूनमाश्चर्यं जायते मम ॥ ५०७ ॥
इहामुत्रसुखार्थाय न व्ययंति कपर्दिकाम् ।
त्यजंति कोटिशस्तत्र हानिः स्याद्यत्र सर्वथा ॥ ५०८ ॥
रक्तं विषयभोगेषु सुखिनं ब्रुवते जनाः ।
अत्यंतलोभग्रस्तं च मन्यंते ज्ञानिनं खलु ॥ ५०९ ॥
स्वल्पशिष्टायुषः पुंसो लुप्तबुद्धिबलस्य च ।
नमस्कुर्वंति चरणौ वृद्धोऽयमिति मानिनः ॥ ५१० ॥

अपत्यं वर्धते यावत्तावन्नृत्यंति हर्षतः ।
वृथायुर्गच्छतीत्यस्य कः करोति विचारणाम् ॥ ५११ ॥
जन्मनो दिनमारभ्य कालो गच्छत्यहर्दिवम् ।
तमज्ञात्वैव कुर्वंति वर्धापनमहोत्सवम् ॥ ५१२ ॥
न सहंते मृत्युशब्दमाक्रंदंति तथा मृतौ ।
गणयंति गतायुर्न कश्चिन्मूढाः कदापि हि ॥ ५१३ ॥
सर्पगीर्णोऽपि मंडूको जिह्वयात्त्येव मक्षिकाः ।
एवं जना वर्धयंति तृष्णां वैषयिकीं मुहुः ॥ ५१४ ॥
कष्टं कष्टं मृत्युलोके वैपरीत्यं हि सर्वथा ।
यद्यप्यत्र त्वया जन्म प्राप्तमस्ति धनंजय ॥ ५१५ ॥
अतश्चेमं विमुच्य त्वं तूर्णं मद्भक्तिमाश्रय ।
तेन यास्यसि पार्थ त्वमक्षयं मामकं पदम् ॥ ५१६ ॥

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥ ३४ ॥

स्वांते कुरुष्व मद्रूपं प्रेम्णा मद्भजनं कुरु ।
सर्वत्र व्यापकं मत्वा मामेवैकं नमस्कुरु ॥ ५१७ ॥
मय्येव चित्तमाधाय संकल्पा येन भर्जिताः ।
शुद्धः स एव मंतव्यो मदर्थं यज्ञकृच्च सः ॥ ५१८ ॥
एवं मद्योगसंपन्नो मद्रूपं प्राप्नुयास्तदा ।
इदं हृदंतर्गूढस्थं कथयामि तवार्जुन ॥ ५१९ ॥
सर्वेभ्योऽपि यदेतावन्मया गूढं सुरक्षितम् ।
तत्तत्त्वं यदि गृह्णासि सुखी भवसि तत्क्षणम् ॥ ५२० ॥
यदुक्तवान्भक्तकामकल्पद्रुमेघकांतिभृत् ।
आत्मारामः परब्रह्म तदेवोवाच संजयः ॥ ५२१ ॥
तच्छ्रुत्वा धृतराष्ट्रस्तु प्रसंगे विषमेऽपि हि ।
महापूरे महिषवन्निर्विकारमनाः स्थितः ॥ ५२२ ॥
संजयश्चालय मूर्धानं प्रोवाचाऽमृतवर्षणम् ।
प्राप्य संत्यज्य तं कश्चिद्याति ग्रामांतरं यथा ॥ ५२३ ॥

परमेवं कथं वाच्यमस्माकं प्रभुरस्त्ययम् ।
किंवा कार्यं ह्यस्य जन्मसभावश्चैवमेव हि ॥ ५२४ ॥
ममैव दैवमुदितं यद्व्यासेनात्र योजितः ।
युद्धवृत्तांतकथने जातं कल्याणमेव तत् ॥ ५२५ ॥
एवं दृढं मनः कृत्वा वृत्तं ब्रुवति संजये ।
कंठो रुद्धः समुल्लासादष्टौ भावास्तथोत्थिताः ॥ ५२६ ॥
अभून्मनश्च तल्लीनं तथा वागपि कुंठिता ।
रोमांचितमभूदंगमुद्भूताः सात्त्विका गुणाः ॥ ५२७ ॥
अर्धोन्मीलितनेत्राभ्यामानंदाश्रूद्गमोऽभवत् ।
अंतरानंदसंवृध्या शरीरं समकंपत ॥ ५२८ ॥
उद्भूता रोमकूपेषु सुसूक्ष्मा घर्मबिंदवः ।
तन्मुक्तामणिजालाभं जातं प्रावरणं शुभम् ॥ ५२९ ॥
एवमानंदसंदोहे ब्रह्मैक्यावसरेऽपि हि ।
तदा व्यासाज्ञप्तकार्ये विघ्नोऽयं समुपस्थितः ॥ ५३० ॥
तथापि तत्क्षणे श्रोत्रप्राप्ता श्रीकृष्णगर्जना ।
संजयोऽपि द्रुतं भूयो देहभानमुपागतः ॥ ५३१ ॥
निमृज्य नेत्रसलिलं प्रोञ्छ्य घर्मं शरीरगम् ।
प्रार्थयद्धृतराष्ट्रं च सादरं श्रूयतामिति ॥ ५३२ ॥
इतः कृष्णबोधबीजं भूयात्स्नेहेन संजयः ।
श्रोतृभ्यस्तेन लाभः स्यात्प्रमेयाणामपि स्फुटम् ॥ ५३३ ॥
किंचिच्छ्रवणमात्रेणानंदराशौ स्थितिर्भवेत् ।
श्रोत्रेंद्रियेभ्यो दैवेन मालेवेयं समर्पिता ॥ ५३४ ॥
विभूतियोगं श्रीकृष्णो यत्पार्थाय प्रदर्शयेत् ।
शृणुध्वमवधानेनेत्येवं ज्ञानेश्वरोऽब्रवीत् ॥ ५३५ ॥

इति श्रीज्ञानदेवविरचितायां भावार्थदीपिकायां अनंतनिरूपणे नवमोऽध्यायः ॥ ९ ॥

श्लोकाः ३४ नवश्लोकाः ५३५

दशमोऽध्यायः

स्पष्टज्ञानविदग्धाय[1] प्रमेयप्रमदाय[2] च ।
विद्यापद्मविकासाय विलासाय नमोऽस्तु ते ॥ १ ॥
संसारध्वांतसूर्याया[3]ऽनंतवीर्योत्तमाय[4] च ।
युवतुर्याविलासाय[5] गुरुवर्याय ते नमः ॥ २ ॥
कृत्स्नविश्वैकपालाय शुभरत्नाकराय[6] च ।
साध्वरण्यचंदनाय[7] स्वाराध्याय नमोऽस्तु ते ॥ ३ ॥
विद्वच्चकोरचंद्राय[8] ह्यात्मानुभवभूभृते ।
श्रुतिसारसमुद्राय कामकामाय[9] ते नमः ॥ ४ ॥
भक्तसेवनपात्राय[10] भवेभ[11]कष्टनाशिने ।
जगदुत्पत्तिमूलाय नमः श्रीगुरवेऽस्तु मे ॥ ५ ॥
भवत्कृपागणपतिप्रसादाद्बालधीरपि ।
सद्विद्याढ्या निश्चयेन भवत्येव न संशयः ॥ ६ ॥
श्रीमद्गुरोरुदारा वाग्यदा दद्याद्भीवरम्[12] ।
तदा नवामृताब्धेश्चागाधतामपि वेत्ति सः ॥ ७ ॥
भवदीया प्रेमवाणी मूकं गृह्णाति चेत्करे ।
कुर्याद्वाचस्पतिसमं कविकाव्यादिकर्मसु ॥ ८ ॥
भवत्कृपादृग्यन स्यान्मूर्धानं वा करः स्पृशेत् ।

---

१ विदग्धश्चतुरः. २ मायारूपिणी प्रमदा=स्त्रीर्यस्य. ३ अंधकारनाशक-सूर्य, मध्यमपदलोपी समासः. ४ अपरिमेयमुत्तमं वीर्यं यस्य. ५ तरुण-तुरीयावस्थया विलासो यस्य. ६ आकरः खनि. ७ सज्जनरूपारण्यस्थचंद-नाय. ८ विदा=ज्ञानिनां हृदयमेव चकोरस्तस्य चंद्र. ९ मन्मथस्यापि मन्मथ. १० सद्भक्तभजनयोग्याय. ११ संसाररूपगजकुंभमर्दनाय. १२ अभी-वरमभयवरम्.

स नरोऽपि प्रयात्येव क्षणादीश्वरतुल्यताम् ॥ ९ ॥
एवं महिम्नो माहात्म्यं वाचाहं वर्णयामि किम् ।
किं कर्तुं शक्यते सूर्यशरीरोद्वर्तनं कदा ॥ १० ॥
का मंजरी कल्पतरोः क्षीराब्धेरुपदापि का ।
कर्पूराय सुगन्धार्थमन्यद्द्रव्यं किमर्पयेत् ॥ ११ ॥
किमु लेप्यं चंदनाय पक्वान्नममृताय वा ।
आकाशादपि विस्तीर्णं किं कर्तुं शक्यते भुवि ॥ १२ ॥
तथा श्रीगुरुमाहात्म्याकलने साधनं किमु ।
अशक्यमखिलं ज्ञात्वा केवलं नौमि भक्तितः ॥ १३ ॥
प्रज्ञाबलात्प्रवृत्तश्चेद्गुरोर्माहात्म्यवर्णने ।
तन्मुक्ताफलतेजस्वीकरणोद्योगवद्भवेत् ॥ १४ ॥
किंवा सुवर्णालंकारे रौप्ययोजनवद्धि तत् ।
अतो गुरुपदोर्मूर्ध्ना नमनं भक्तितो वरम् ॥ १५ ॥
ज्ञानदेवोऽब्रवीत्स्वामिन्कृपयाऽऽलोचितोऽस्म्यहम् ।
यत्प्रयागवटोऽभूवं श्रीकृष्णार्जुनसंगमे ॥ १६ ॥
भक्त्या समाराधयते दुग्धार्थमुपमन्यवे ।
धूर्जटिः सुप्रसन्नः सन्दत्तवान्क्षीरसागरम् ॥ १७ ॥
रुष्टं ध्रुवं तपस्यंतं विलोक्यानन्यभावतः ।
वैकुंठाधिपतिः प्रादात्तस्मै ध्रुवपदं नवम् ॥ १८ ॥
ब्रह्मविद्याशिरोरत्नं शास्त्राणां विश्रमस्थलम् ।
गीताशास्त्रं तथैवेदमोवीवृत्तेन वर्णये ॥ १९ ॥
शब्दारण्ये संचरतां कर्णे नाप्नोति यत्कथा ।
सा वाकृता कल्पलता विचारफलदायिनी ॥ २० ॥
देहबुद्धिरहंकारस्था याताऽद्वैतमंदिरम् ।
मनो गीतार्थाब्धिमध्ये स्थापितं जलमंदिरे ॥ २१ ॥
इत्यगाधां देवकृतिं मद्वाणी वर्णयेत्कथम् ।
तथाप्यबोचं धैर्येण तत्क्षमस्व दयानिधे ॥ २२ ॥

ओवीति भाषायामनियताक्षरचतुष्पादवृत्तस्य व्यवहारः.

भवत्कृपाप्रसादेन गीता पूर्वार्धमादितः ।
ओवीवृत्तेन मोदेन यथावत्प्रतिपादितम् ॥ २३ ॥
प्रोक्तोऽर्जुनविषादश्च प्रथमाध्याय आदितः ।
द्वितीये सांख्यबोधश्च सभेदोऽपि निरूपितः ॥ २४ ॥
तृतीये कथितं कर्म सज्ञानं तत्तुरीयके ।
उक्तश्च पंचमेऽध्याये योगतत्त्वस्य विस्तरः ॥ २५ ॥
षष्ठे तदेव सुस्पष्टं योगासनविधेः सह ।
एकत्वं जीवशिवयोः कथं स्यादिति वर्णितम् ॥ २६ ॥
अष्टांगयोगसिद्धिश्च योगभ्रष्टगतिस्तथा ।
तत्सोपपत्तिकं सर्वं षष्ठेऽध्याये निरूपितम् ॥ २७ ॥
उपक्रमोपसंहारौ सप्तमे प्रकृतेरपि ।
चातुर्विध्यं च भक्तानां यथावदुपपादितम् ॥ २८ ॥
अष्टमे सप्तप्रश्नानां कृत्वा विस्तरतः पुरः ।
देहांतयोग्यावसरः समासेन विचारितः ॥ २९ ॥
नवमेऽपि च वेदोक्तः सर्वसारसमुच्चयः ।
य एव लक्षसंख्याके भारतेऽस्ति प्रपंचितः ॥ ३० ॥
तत्र सप्तशतश्लोकैर्गीताशास्त्रमुदाहृतम् ।
श्रीकृष्णार्जुनसंवादरूपं वर्वर्ति सर्वतः ॥ ३१ ॥
ज्ञातुं नवमतत्त्वार्थं भीतः पार्थोऽवधारितुम् ।
अतोऽभिमानं तस्याहं संवहेयं वृथा कुतः ॥ ३२ ॥
शर्करा वा गुडो वापि चैकस्मादिक्षुतो रसात् ।
तथापि माधुरीस्वाद उभयोर्भिन्न एव हि ॥ ३३ ॥
ज्ञात्वा ब्रह्म वदंत्येकेऽन्ये स्थानं दर्शयंति च ।
केचिद्विचारसमये ब्रह्मीभूता भवंत्यपि ॥ ३४ ॥
गीताध्यायास्तथा सर्वे ब्रह्मज्ञानभृता अपि ।
नवमोऽवर्णनीयोऽत्र वर्णितः सा भवत्कृपा ॥ ३५ ॥
शाटी प्रकाशितैकस्य प्रतिसृष्टिं व्यधात्परः ।
कृत्वैकोऽब्धौ सेतुबंधं स्वीयं सैन्यमतारयत् ॥ ३६ ॥

खेऽगच्छदेकः सूर्यार्थमन्यः सिंधुं पपौ क्षणात् ।
मत्तो मूकात्तथैवात्र ब्रह्मवादोऽपि कारितः ॥ ३७ ॥
अस्त्विदं रणभूमौ ते युद्धं कर्तुमुपस्थिताः ।
आसीत्प्रकारोऽनुपमो रामरावणयोरिव ॥ ३८ ॥
कृष्णबोधो नवमगो नवाध्यायवदेव हि ।
यो गीतार्थं विजानाति स सिद्धांतयितुं क्षमः ॥ ३९ ॥
एवमेते नवाध्याया यथामति निरूपिताः ।
उत्तरार्धमितो वच्मि गीतायाः शृणुतादरात् ॥ ४० ॥
श्रीकृष्णोऽचीकथत्पार्थं स्वा विभूतीः सविस्तरम् ।
मुख्या गौणाः कथां तासां सुरसां वर्णयाम्यतः ॥ ४१ ॥
शांतो जीयाद्धि शृंगारं सौंदर्याद्देशभाषया ।
तेन साहित्यशृंगारओवीवृत्तं भविष्यति ॥ ४२ ॥
मूलभागः संस्कृतोऽस्ति व्याख्या प्राकृतभाषया ।
विज्ञाते चोभयोरर्थे न मूलं भासते पृथक् ॥ ४३ ॥
शरीरसौष्ठवमलंकारान्भूषयति स्वयम् ।
केन कं भूपितमिति भेदस्तत्र न दृश्यते ॥ ४४ ॥
प्राकृता वा संस्कृता वा गीता शोभयतः समम् ।
बुद्ध्या पवित्रयैवेदं श्रोतव्यं प्रेमभावतः ॥ ४५ ॥
कस्मिंश्चिदादाये प्रोक्ते वृष्टिर्नवरसा भवेत् ।
चातुर्यं मन्यते तत्र स्वस्य शोभां समागताम् ॥ ४६ ॥
तथा प्राकृतलावण्यं तारुण्यमपद्व्यं च ।
गीतातत्त्वं च संपूर्णं तेनेदं रचितं किल ॥ ४७ ॥
एतच्चराचरगुरुर्विश्वचित्तचमत्कृतौ ।
कथयिष्यति यत्कृष्णस्तदेवाग्रेऽवधार्यताम् ॥ ४८ ॥
उवाच ज्ञानदेवो यदूचे कृष्णोऽर्जुनं प्रति ।
सर्वथा त्वच्चित्तवृत्तिर्योग्या श्रवणकर्मणि ॥ ४९ ॥

१ हनुमानिति ज्ञेयम्. २ अगस्त्यमुनि.. ३ मत्तः=मत्सदृशात्. ४ भाषायां ओवीति छंदः प्रसिद्धम्.

श्रीभगवानुवाच ।

भूय एव महाबाहो शृणु मे परमं वचः ।
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥ १ ॥

एतावद्वर्णने दृष्टं चित्तस्थैर्यं यथा तव ।
अग्रेऽपि तद्वदेवास्तु परिपूर्णतयाऽधिकम् ॥ ५० ॥
घटे स्वल्पं जलं क्षिप्य पूर्णमालोच्य निःस्रवम् ।
ततोऽधिकं पूरयीत कथनीयं तथैव हि ॥ ५१ ॥
हस्ते दत्वा धनं कुर्याद्विश्वस्तं धनरक्षकम् ।
तथा विश्वासपात्रस्त्वं ह्यसीति सुपरीक्षितः ॥ ५२ ॥
अत्यादरेण श्रीकृष्णः पार्थमाभाष्य सादरम् ।
शैलं दृष्ट्वा मेघ इव परिपूर्णोऽभवत्तदा ॥ ५३ ॥
कृपासिंधुः समवदच्छृणु पार्थ समासतः ।
पूर्वमुक्तं पुनर्ब्रूयां दार्ढ्यार्थं भवतः किल ॥ ५४ ॥
प्रत्यब्दमुप्यते बीजं क्षेत्रे धान्यविवृद्धये ।
पुनस्तत्रैवावपने न श्रमो भाति कस्यचित् ॥ ५५ ॥
पुनः पुनस्तापितं सद्याति तेजस्वितां परम् ।
अतः सुवर्णशुद्धिश्च यथा कुर्वत्यभीक्ष्णदाः ॥ ५६ ॥
तद्वत्त्वय्युपकारार्थमेव नायमुपक्रमः ।
ममापि स्वार्थसिद्ध्यर्थं पार्थेमां वच्मि ते कथाम् ॥ ५७ ॥
यथाऽर्भकस्य शृंगारा न भवंत्युपकारकाः ।
मातुर्दृष्ट्यैव सुखदाः कुरुते सैव भूषितम् ॥ ५८ ॥
तथैव तव कल्याणं संपन्नं स्याद्यथा यथा ।
तथा तथाऽस्मदानंदो द्विगुणत्वेन वर्धते ॥ ५९ ॥
अस्त्वौपचारिकमिदं त्वत्प्रेमार्थं सदा मम ।
अतः कथंचिदुक्तेऽपि त्वन्मनोऽतृप्तमेव हि ॥ ६० ॥
एतदर्थं मुहुस्तत्तत्कथितं त्वद्धितेच्छया ।
अस्त्विदं, त्वं शृणुष्वाग्रेऽप्यंतःकरणपूर्वकम् ॥ ६१ ॥
अत्युत्तमं मत्कथनं शृणु मर्मज्ञ सादरम् ।
प्राप्तं यदक्षरब्रह्म त्वदालिंगनहेतुना ॥ ६२ ॥

न मे विदुः सुरगणाः प्रभवं न महर्षयः ।
अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥ २ ॥

यदि पार्थ न जानासि मत्स्वरूपं यथार्थतः ।
तथा त्वत्पुरतो दृश्योऽहमेव निखिलं जगत् ॥ ६३ ॥
अत्रैव वेदोऽभून्मूको मनःप्राणाश्च पंगुलाः ।
तं मां ज्ञातुं रविशशी यातावस्तं निशां विना ॥ ६४ ॥
उदरस्थो यथा गर्भो मातुर्वेत्ति वयो नहि ।
तथेशं मां देवसंघा ज्ञातुं शक्ता न चाभवन् ॥ ६५ ॥
सिंधोरंतं जलचरा न जानंति, न मक्षिकाः ।
उल्लंघंति नभस्तद्वद्दृष्योऽपि न मां विदुः ॥ ६६ ॥
कः कियान्वा कस्य वाऽहं प्रादुर्भूतः कदेति च ।
निर्णेतुमेतद्यातानि ह्यनंतानि युगान्यपि ॥ ६७ ॥
महर्षीणां च देवानां सर्वेषां प्राणिनामपि ।
यन्मूलमहमेवेति ज्ञातुं पार्थ सुदुःशकम् ॥ ६८ ॥
नगाग्रे चेज्जलं गच्छेन्मूले वृक्षाग्रमेव च ।
जगदेतन्मदुद्भूतं मां जानीयात्तदाऽर्जुन ॥ ६९ ॥
तरुं श्लिष्येत चेद्बीजं वीचिष्वब्धिः समाविशेत् ।
समाविष्टं भवेद्वापि परमाणौ चराचरम् ॥ ७० ॥
तद्देवर्षिगणा देवा मत्संभूता जना अपि ।
सर्वे ज्ञातुं समर्था मां भवेयुः पार्थ तत्त्वतः ॥ ७१ ॥
एवमस्म्यहमज्ञेयस्तथापि विषयस्पृहाम् ।
त्यक्त्वा पराङ्मुखीभूय स्वेंद्रियार्थेषु सर्वशः ॥ ७२ ॥
पराङ्मुखत्वे संजाते देहाहंधीः प्रणश्यति ।
ततः स पंचभूतानां मूर्धानमधिरोहति ॥ ७३ ॥

यो मामजमनादिं च वेत्ति लोकमहेश्वरम् ।
असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥ ३ ॥

एवं जाते मनःस्वास्थ्ये स्वस्य दृष्ट्यैव केवलम् ।

आत्मप्रकाशसामर्थ्यान्ममाजत्वं स पश्यति ॥ ७४ ॥
सर्वथाऽनादिरस्मीह सर्वेषां परमेश्वरः ।
इति भावेन यो मर्त्यो जानात्यर्जुन तत्त्वतः ॥ ७५ ॥
स पाषाणेष्वपि स्पर्शो रसेष्वमृतसन्निभः ।
तद्वत्सोऽपि ममैवांशो मनुष्येष्वस्ति निश्चितम् ॥ ७६ ॥
स एवास्ति ज्ञानमूर्तिस्तदंशाश्च सुखांकुराः ।
लोके तस्मिन्मनुष्यत्वबुद्धिस्तु भ्रांतिरेव हि ॥ ७७ ॥
कदाचित्कर्पूरराशौ लग्नश्चेद्वीरकोऽपि च ।
तस्मिञ्जलेऽपि पतिते कर्पूरवन्न नश्यति ॥ ७८ ॥
तथापि दृश्यते तस्य वर्तनं मनुजादिवत् ।
अपि मायाविकारस्य बाधां जानाति न कश्चित् ॥ ७९ ॥
तं मुंचति भयात्पापं सर्पवद्गन्धचंदनम् ।
तथैव सर्वे संकल्पा मां ज्ञास्यंतं त्यजंति हि ॥ ८० ॥
मां जानीयात्कथमिति ज्ञातुमिच्छसि चेद्यदि ।
मत्स्वरूपं विकारांश्च कथयामि शृणुष्व तत् ॥ ८१ ॥
भिन्नभिन्नेषु जीवेषु प्रकृत्या साम्यमागताः ।
संति सर्वा विभूतयः पार्थ सर्वत्र विस्तृताः ॥ ८२ ॥

बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः ।
सुखं दुःखं भवोऽभावो भयं चाऽभयमेव च ॥ ४ ॥
अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः ।
भवंति भावा भूतानां मत्त एव पृथग्विधाः ॥ ५ ॥

तत्र तु प्रथमं बुद्धिस्ततो ज्ञानमनंतरम् ।
असंमोहः सहिष्णुत्वं तथा सत्येन वर्तनम् ॥ ८३ ॥
ततः शमदमौ लोके सुखदुःखे तथैव च ।
भावाभावौ मत्त एव सर्वं भवति पांडव ॥ ८४ ॥

१ स्पर्शमणिः—यत्स्पर्शे लोहं सुवर्णं भवतीति संकेतः प्राचाम्.

भयं च निर्भयं चैव ह्यहिंसा समता तथा ।
तुष्टिस्तपस्तथा दानं मद्भावास्तेऽपि पांडव ॥ ८५ ॥
कीर्तिश्चैवापकीर्तिश्च भावाऽभावाः सदैव ये ।
जीवमात्रेषु दृश्यंते मज्जातानेव विद्धि तान् ॥ ८६ ॥
भिन्नभिन्ना यथा जीवा भावा भिन्नास्तथैव हि ।
तेषु जानंति मां केचिन्न जानंत्यपि केचन ॥ ८७ ॥
भासते सूर्ययोगेन प्रकाशो ध्वांतमेव वा ।
प्रकाशो हृदये भाति ध्वांतमस्तमयेऽपि च ॥ ८८ ॥
मदर्थे ज्ञानमज्ञानमुभयं कर्मणः फलम् ।
अतो भूतेषु दृश्यंते भिन्ना विकृतयः सदा ॥ ८९ ॥
मय्येवं जीवसृष्टिश्च सर्वैयं व्याप्य तिष्ठति ।
धनुर्धर विजानीहि न मत्तोऽन्यत्परायणम् ॥ ९० ॥
अस्याः सृष्टेः पालकाश्च भावा एकादश स्मृताः ।
यदाज्ञावशगा लोकास्तान्वच्मि शृणु सादरम् ॥ ९१ ॥

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ।
मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ॥ ६ ।

ये सर्वगुणसंपन्ना ज्ञानवंतो महर्षयः ।
कश्यपाद्याश्च विख्याताः पार्थ सप्तर्षयोऽपि च ॥ ९२ ॥
चतुर्दश च मन्वाद्याः स्वयंभ्वाद्याश्च तेष्वपि ।
चत्वारश्चैव मनवो देवा मुख्यतमा मताः ॥ ९३ ॥
एकादशेमे भावास्तु सृष्टिकार्यार्थमेव हि ।
मन्मनस्तः समुद्भूतास्त्वं जानीहि धनुर्धर ॥ ९४ ॥
यदा लोकव्यवस्थेयं नासीत्त्रिभुवनस्य च ।
त्वस्थानि पंचभूतानि शांतान्यासंश्च सर्वथा ॥ ९५ ॥
तदा सप्तर्षयोऽभूवन्दिक्पालास्तैर्विनिर्मिताः ।
तेभ्योऽप्यक्षपदं दत्तं विश्वसिन्सर्वतोऽपि हि ॥ ९६ ॥
एकादश नृपालेषु सृष्टिस्तैरेव निर्मिता ।

सर्वोऽपि विस्तरश्चैवं त्वं ममैवेति विद्धि भोः ॥ ९७ ॥
आरंभे बीजमेवास्ति ततो वृक्षः प्रजायते ।
ततः स्कंधादिकाण्डानां विस्तारोऽपि प्रजायते ॥ ९८ ॥
ततः शाखाः सुविस्तीर्णाः प्रशाखा विस्तृतास्तथा ।
भवंति तेभ्योऽगणिताः कोमलाः पल्लवा अपि ॥ ९९ ॥
ततः पुष्पफलानि स्युर्वृक्षत्वं विस्तृतं भवेत् ।
विचारितेऽस्य मूले तु बीजमेकं हि कारणम् ॥ १०० ॥
तद्वत्पूर्वं ममास्तित्वं मत्तो जातं ततो मनः ।
मनसः सप्त मुनयश्चत्वारो मनवस्तथा ॥ १०१ ॥
तैर्निर्मिता लोकपालास्तैश्च लोकाः प्रकल्पिताः ।
तेभ्यः सर्वं प्राणिमात्राश्चोद्भूता अखिला इमे ॥ १०२ ॥
तदेवं विश्वविस्तारो विस्तृतः सोऽहमेव हि ।
श्रद्धावद्भिः सर्वमेतद्यथावदनुभूयते ॥ १०३ ॥

एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः ।
सोऽविकंपेन योगेन युज्यते नात्र संशयः ॥ ७ ॥

हे सुभद्रापते सर्वे मद्भावाश्च विभूतयः ।
एतेषामेव सर्वत्र व्याप्तिर्जगति वर्तते ॥ १०४ ॥
अतोऽपि निश्चितमिदं यद्ब्रह्माद्यापिपीलकम् ।
मत्तोऽन्यन्न किमप्यस्ति दृश्येषु भुवनत्रये ॥ १०५ ॥
एवं जानाति यस्तत्त्वं तस्याभूज्ज्ञानजागृतिः ।
उत्तमाधमभेदस्य स दुःस्वप्नं न पश्यति ॥ १०६ ॥
अहं च मद्विभूतीश्च विभूत्याटयाश्च मूर्तयः ।
एतत्सर्वं चैकमिति योगयुक्ता विदंति हि ॥ १०७ ॥
ज्ञानयोगेन चानेन मद्रूपे रमते हि यः ।
स एव जातो निःशंकं कृतकृत्यो न संशयः ॥ १०८ ॥
यस्त्वभेदया दृष्ट्या रंजितो भजने मम ।
तेन तद्भजनच्छंदपाशेन ग्रथितोऽस्म्यहम् ॥ १०९ ॥

अद्वैतमनसा भक्त्या मत्प्राप्तिस्तस्य जायते ।
अपूर्णत्वेऽपि सुखभाक् स्यात्तत्षष्ठे निरूपितम् ॥ ११० ॥
साऽभेदभक्तिस्तु कथं प्राप्ता स्यादिति चेद्ब्रुवि ।
शंकसे तर्हि तां वच्मि शृणुष्वात्र सविस्तरम् ॥ १११ ॥

अहं सर्वस्य जगतो मत्तः सर्वं प्रवर्तते ।
इति मत्वा भजंते मां बुधा भावसमन्विताः ॥ ८ ॥

अहमेवास्य विश्वस्य निर्मातास्मि धनंजय ।
मत्तस्तत्पोषणमपि शश्वद्भवति सर्वथा ॥ ११२ ॥
पश्यानेकतरंगाणामुत्पत्तिर्जायते जलात् ।
जलमेवाश्रयस्तेषां जीवनं जलमेव हि ॥ ११३ ॥
लहरीणां सर्वथापि जलमेवाश्रयो यथा ।
मत्तो विना जगत्यस्मिन्नान्यदस्त्यपरं क्वचित् ॥ ११४ ॥
मां सर्वव्यापकं ज्ञात्वा सद्भावेन निरंतरम् ।
सर्वदा यत्रकुत्रापि प्रेमपूर्वं भजंत्यपि ॥ ११५ ॥
देशः कालो वर्तमानं मदभेदेन वर्तते ।
यथा पवनरूपः सन्खे संचरति मारुतः ॥ ११६ ॥
एवमात्मज्ञानिनोऽपि त्रैलोक्ये निर्विकल्पतः ।
चित्ते सर्वव्यापकं मां स्मरंतः संचरन्ति हि ॥ ११७ ॥
यो यो दृक्सरणिं प्राप्तः स देव इति भावना ।
भक्तियोगोऽयमेवास्ति त्वं विजानीहि निश्चयात् ॥ ११८ ॥

मच्चित्ता मद्गतप्राणा बोधयंतः परस्परम् ।
कथयंतश्च मां नित्यं तुष्यंति च रमंति च ॥ ९ ॥

मद्रूपा येंऽतरे जातास्तृप्ता मत्प्राणतश्च ये ।
विस्मृतां जन्म मरणं मज्ज्ञानच्छंदसैव च ॥ ११९ ॥
एवं ज्ञानाद्बलिष्ठाश्च नृत्यंत्यानंदतः सदा ।
गृह्णंति ददति ज्ञानं व्यवहारे परस्परम् ॥ १२० ॥

सरांसि सचिद्रूपाणि पूरे यांति सदैकताम् ।
तत आश्रयभूताश्च तरंगाणां तरंगकाः ॥ १२१ ॥
ज्ञानिनो ह्यैक्यमापन्ना ब्रह्मानंदे च सिश्रिताः ।
आत्मबोधोऽप्यात्मबोधं भूषयत्येव बोधतः ॥ १२२ ॥
सूर्यस्य सूर्येणार्तिंक्यं चंद्रेणालिंगनं विधोः ।
तुल्यौ प्रवाहावेकत्र संयुज्येतां यथैकतः ॥ १२३ ॥
ऐक्यस्य संगमे तद्वदष्टौ भावास्तरंति हि ।
प्राप्नोति ज्ञानिनां श्रैष्ठ्यं यत्संवादचतुष्पथे ॥ १२४ ॥
तस्मिन्महासौख्यभरे ग्रामाद्धावंति देशतः ।
बहिरंतस्तु मद्रूपप्राप्त्या गर्जंति तोषिताः ॥ १२५ ॥
एकांते गुरुशिष्याभ्यां मंत्र एकाक्षरोऽन्वहम् ।
जप्यस्तं च त्रिभुवने तृप्ता गर्जंति तोषतः ॥ १२६ ॥
यथा प्रफुल्लं पद्मं न मकरंदावृतौ क्षमम् ।
राजतो रंकपर्यंतं तुल्यं गंधं प्रयच्छति ॥ १२७ ॥
गायंति मद्गुणांस्तद्वद्विसरंति कथामपि ।
आनंदात्तन्मयाः संतो गतदेहात्मभावनाः ॥ १२८ ॥
एवं पूर्णप्रेमरंगाश्च विदंति दिनं निशाम् ।
ब्रह्मानंदस्वरूपेण सुखं भुंजंति सर्वदा ॥ १२९ ॥

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयांति ते ॥ १० ॥

तेभ्योऽस्माभिः प्रदेयस्य विभागं च समीरितम् ।
प्राप्नुवंति यथासांगमात्मन्येवार्जुन स्वतः ॥ १३० ॥
मत्प्राप्त्यर्थमटंतश्च ब्रह्ममार्गे चलंति ते ।
तदग्रे स्वर्गमोक्षादिमार्गाः कान्तारवत्स्मृताः ॥ १३१ ॥
सदाराधनतुष्टेन तेभ्यो देयं च यन्मया ।
तदर्जुन गृहीतं तैः स्वम्याधीनतया पुरा ॥ १३२ ॥
तथापि मम कर्तव्यं तेषां प्रेमविवर्धनम् ।
कालादपि भयं तेषां नैव भूयात्कदाचन ॥ १३३ ॥

क्रीडासक्ते यथा बाले माता दृष्टिं निधाय च ।
पश्चाद्धावत्यंघ्रिचिह्नपथा स्नेहेन चार्जुन ॥ १३४ ॥
यद्यद्याचति बालस्तु तत्तत्स्वयं प्रयच्छति ।
तद्वत्तेषां भक्तिमार्गो रक्षणीयो मयैव सः ॥ १३५ ॥
वर्धयंतो भक्तिमार्गं मद्रूपं प्राप्नुवंति हि ।
वर्धनं भक्तिमार्गाणां ममात्यंतं प्रियं भवेत् ॥ १३६ ॥
यथा मत्प्रेम भक्तानां तथा तेषां ममापि च ।
अनन्यभक्तेर्मद्गेहे सदैव न्यूनतास्त्यलम् ॥ १३७ ॥
तथा सामान्यभक्तार्थं मोक्षस्वर्गौ विनिर्मितौ ।
सह लक्ष्म्या मच्छरीरमेनंतायार्पितं मया ॥ १३८ ॥
यत्ततोऽप्यधिकं ह्यात्मसुखमत्युत्तमं स्मृतम् ।
तत्तु प्रेमलभक्तार्थमस्ति संरक्षितं मया ॥ १३९ ॥
एवं प्रेमयुतान्भक्तान्सविधे स्थापयाम्यहम् ।
इमा वार्ता न कुत्रापि वक्तुं शक्याः कदाचन ॥ १४० ॥

तेषामेवानुकंपार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ ११ ॥

तस्मान्मद्रूपात्मभक्तिर्जीवनार्थं कृता च यैः ।
मां विना सर्वमितरन्मन्यंते निष्फलं किल ॥ १४१ ॥
तत्त्वज्ञानां तथा तेषां पुरो दीपाश्रयं करे ।
कृत्वा कर्पूरदीपं च पुरो गच्छामि संततम् ॥ १४२ ॥
अज्ञानरूपरजनौ व्याप्तेऽधतमसेऽपि हि ।
तन्नाशयित्वा भक्तार्थमुदयं करवाण्यहम् ॥ १४३ ॥
अब्रवीद्भगवानेवं तदा पार्थोऽप्युवाच ह ।
भवत्कृपावशाद्दासस्संपूर्णा मे मनोरथाः ॥ १४४ ॥
श्रीकृष्ण सेऽद्य भवता मृष्टः सांसारिको मलः ।
कृतः पुनर्जन्ममुक्तः सर्वतः सुखितोऽस्म्यहम् ॥ १४५ ॥

---

१ घम्याभूताय रोपाय.

जन्मनः कारणं हाय नेत्राभ्यामवलोकितम् ।
इत्यमातं जीवितं हीत्येवं मन्ये सुनिश्चितम् ॥ १४६ ॥
देव त्वदुपदेशेन जातो भाग्योदयो मम ।
आयुषश्चापि सार्थक्यमभूत्त्वदनुग्रहात् ॥ १४७ ॥
भवद्बोधज्योतिषाऽद्य गतमंतर्बहिस्तमः ।
अत आलोचितः साक्षात्स्वस्वरूपो भवान्मया ॥ १४८ ॥

अर्जुन उवाच ।

परं ब्रह्म परं धाम पवित्रं परमं भवान् ।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥ १२ ॥

कृष्णाऽसि त्वं परंब्रह्म भूतविश्रांतिमंदिरम् ।
जगन्नाथस्त्वमेवासि पवित्रः परमोऽपि च ॥ १४९ ॥
त्रिषु देवेषु मुख्यस्त्वं पुरुषः पंचविंशकः ।
दिव्यः प्रकृतिभावात्त्वं हृषीकेश परो ह्यसि ॥ १५० ॥
स्वामिन्ननादिसिद्धस्त्वं जन्मधर्मैर्न बध्यसे ।
एवं त्वद्वैभवं सर्वं ज्ञातमद्यैव तत्त्वतः ॥ १५१ ॥
त्रिकालं सूत्रधृग्जीवकलायास्त्वमसि स्फुटम् ।
ब्रह्मांडस्यापि चाधारस्त्वमेवेत्यपि वेद्म्यहम् ॥ १५२ ॥

आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ।
असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥ १३ ॥

एवं ज्ञाने प्रतीतिश्च द्वितीया सुदृढास्त्यपि ।
पूर्वं महर्षिकथिता भवद्विषयिणी प्रथा ॥ १५३ ॥
तथापि तस्याः सत्यत्वमद्यारूढं स्वचेतसि ।
तच्चापि सर्वं भगवंस्त्वत्कृपातोऽभवद्ध्रुवम् ॥ १५४ ॥
अखंडं नारदोऽप्येवमस्मदग्रे प्रगायति ।
अपि तस्यार्थमज्ञात्वा शुश्रुमो गानमाधुरीम् ॥ १५५ ॥
यथांधाधिष्ठितग्रामे मार्तंड उदितोऽपि हि ।
तापयत्येव तानंधान्प्रकाशादृशिमंतरा ॥ १५६ ॥

तथाऽध्यात्मं नारदस्य रागालापसमन्वितम् ।
अरंजयदलं चित्तं ज्ञानमण्वपि नाऽकरोत् ॥ १५७ ॥
श्रुताश्च तद्वदसितदेवलादिकृताः कथाः ।
तदापि विषयश्चेडग्रस्तासीद्धीर्ममापि हि ॥ १५८ ॥
परिणामाद्विषस्यास्य मधुरं कटुतां व्रजेत् ।
कटवो विषयाः शश्वज्जीवानां मधुरास्तथा ॥ १५९ ॥
वक्तव्यमितराणां किं व्यासो राजगृहे स्वयम् ।
आगत्य सर्वदा वक्ति कृष्ण त्वच्चरितं शुभम् ॥ १६० ॥
ध्वांते चिंतामणिर्लब्धो दूरे त्यक्तोऽज्ञभावतः ।
सूर्यप्रकाशे विज्ञातश्चिंतामणिरिति स्वयम् ॥ १६१ ॥
तथा व्यासादिभिः प्रोक्ताश्चिद्रत्नखनयोऽपि हि ।
हेलयोपेक्षिता आसंस्त्वज्ज्ञानार्कं विना मया ॥ १६२ ॥

सर्वमेतदृतं मन्ये यन्मां वदसि केशव ।
नहि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः ॥ १४ ॥

अद्य त्वद्वागिनकरैर्यातमृष्युक्तिकश्मलम् ।
अज्ञानं यत्तद्विषयं तत्प्रणष्टं च मूलतः ॥ १६३ ॥
तदुक्तयो ज्ञानबीजं पतितं चित्तभूतले ।
जाताः कृपाजलाद्वृक्षाः ससंवादफलोपगाः ॥ १६४ ॥
उक्ता या नारदादीनां सरितो जलपूरिताः ।
मम रूपे विशंत्यद्य संवादसुखसागरे ॥ १६५ ॥
पूर्वस्मिञ्जन्मनि स्वामिन्पुण्यानि विहितानि मे ।
तेन त्वत्सद्गुरोर्लाभात्पुण्यान्यनृणतां ययुः ॥ १६६ ॥
यद्यपि श्रेष्ठमुखतः कर्णाभ्यां त्वद्गुणाः श्रुताः ।
तथापि त्वत्कृपाऽभावाज्ज्ञातं तत्त्वं नचाण्वपि ॥ १६७ ॥
यदा दैवं सानुकूलमुद्यमाः सफलास्तदा ।
भवंति तद्वत्पठितश्रुतार्थं गुर्वनुग्रहात् ॥ १६८ ॥
वनरक्षः प्रयत्नेन नित्यं वृक्षान्प्रसिंचति ।
परं विना वसंततुं न स्यात्तेषां फलोद्गमः ॥ १६९ ॥

विषमज्वरनिर्मुक्तो मधुरं स्वादु भाव्यते ।
शरीरारोग्यतायां तु ज्ञेयमुत्तममौषधम् ॥ १७० ॥
किंवा वागादींद्रियेषु चैतन्यं प्रविशेद्यदा ।
तदा कार्यक्षमाणि स्युः सार्थक्येनाखिलान्यपि ॥ १७१ ॥
तथा वेदाद्यध्ययनं किंवा योगादिसाधनम् ।
स्वभ्यस्तं च भवेत्पूर्णं यदा स्याच्छ्रीगुरोः कृपा ॥ १७२ ॥
एवं प्रतीतिबलतो मुदाऽनृत्यत्तदाऽर्जुनः ।
अवदच्च तदा देव त्वद्वाक्यं रुचितं मम ॥ १७३ ॥
कैवल्याधिपते सत्यं प्रतीतिर्मेह्यमागता ।
त्वां विज्ञातुं समर्थाः स्युर्न देवा न च दानवाः ॥ १७४ ॥
त्वत्स्वरूपमविज्ञाय ज्ञातं यो मन्यते वृथा ।
सोऽज्ञानी निश्चयेनेति मत्प्रतीतिर्दृढाऽभवत् ॥ १७५ ॥

स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम ।
भूतभावन भूतेश देवदेव जगत्पते ॥ १५ ॥

आकाशस्य महत्त्वं च जानात्याकाश एव हि ।
पृथिव्येव विजानाति पृथ्व्या रूपं नहीतरः ॥ १७६ ॥
तथाऽखिलाः स्वीयशक्तीर्जानासि त्वं रमापते ।
गर्वं वहंति वेदाद्या ज्ञातं मत्वैव केवलम् ॥ १७७ ॥
मनसोऽग्रे कथं यायाद्वायुं वाऽऽवृणुयात्कथम् ।
मायानदीं कथं तीर्त्वा गच्छेद्बाहुबलेन हि ॥ १७८ ॥
त्वज्ज्ञानं दुर्घटं तद्वद्तो जानाति कोऽपि न ।
ज्ञातुं समर्थस्त्वामेकस्त्वमेव भुवनत्रये ॥ १७९ ॥
त्वां त्वमेव विजानासि वक्तुमन्यान्क्षमोऽसि च ।
अतः स्वेच्छाललाटस्थं मार्जय स्वेदमेकदा ॥ १८० ॥
श्रीकृष्ण जगदुद्भूते हे संसारेभकेसरिन् ।
देवदेवार्चित स्वामिन्निदं किं भवता श्रुतम् ॥ १८१ ॥
महिमानं तवालोक्य नाहं पात्रं पुरःस्थितौ ।
तद्भयेन न चेद्ब्रूयां नास्त्युपायोऽपरः कश्चित् ॥ १८२ ॥

समुद्रः सरितश्चापि संति पानीयपूरिताः ।
रिक्तचत्ताश्चातकस्य स्यात्पृक्षजलकांक्षिणः ॥ १८३ ॥
सर्वत्र गुरवः संति न त्वत्तोऽन्या गतिर्मम ।
अस्त्विदं, कृष्ण मे ब्रूहि त्वद्विभूतीः समासतः ॥ १८४ ॥

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥ १६ ॥

देव या हि विभूतीस्ते दिव्या व्याप्य जगत्स्थिताः ।
अखिला अपि ता मह्यं कृपया दर्शय प्रभो ॥ १८५ ॥
संति यद्यप्यनंतास्ता व्याप्य त्रैलोक्यमासते ।
विशेषतस्तासु मुख्यास्तावलः कथयाऽधुना ॥ १८६ ॥

कथं विद्यामहं योगिंस्त्वां सदा परिचिंतयन् ।
केषु केषु च भावेषु चिंत्योऽसि भगवन्मया ॥ १७ ॥

अहं कथं त्वां जानीयां चिंत्यं रूपं च किं तव ।
भावयेयाखिलं रूपं ध्यानं किमपि नो भवेत् ॥ १८७ ॥
अतः संक्षेपेण पूर्वं विभूतीः कथितास्त्वया ।
पुनस्ता एव वक्तव्या विस्तरेणैकदा मम ॥ १८८ ॥
येषु येषु च भावेषु मया चिंत्योऽसि माधव ।
तांस्तान्स्पष्टतया मह्यं कथयस्वाऽविशेषतः ॥ १८९ ॥

विस्तरेणात्मनो योगं विभूतिं च जनार्दन ।
भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम् ॥ १८ ॥

पृष्टा विभूतयो यास्ते ब्रूहि भूतपते पुनः ।
मुहुर्मुहुस्ताः किं ब्रूयामिति त्वं भाषसे यदि ॥ १९० ॥
तर्ह्येवं संशयं चित्ते मा कुरुष्व जनार्दन ।
प्राप्ते सामान्यामृतेऽपि नैवालंप्रत्ययो भवेत् ॥ १९१ ॥
देवैर्मृत्युभयात्पीतं कालकूटसहोदरम् ।

१ अमृतम्, क्षीराब्धेः सकाशादुद्भवेन सहोत्पन्नत्वात्सहोदरत्वम्.

तथापींद्रा ब्रह्मदिने जाता नष्टाश्चतुर्दश ॥ १९२ ॥
सिंधोरेव रसोऽगच्छत्तथाऽमृतमिति प्रियाम् ।
तथापि तद्रसास्वादे न तृप्तिः कस्यचिद्भवेत् ॥ १९३ ॥
एवं क्षुद्रामृतस्यापि चेन्माधुर्यं सुदुस्त्यजम् ।
तदाऽनपेक्ष्यं किंवा स्याद्भवतः परमामृतम् ॥ १९४ ॥
मंदराचलसंघृष्टक्षीरसिंधुं विनैव च ।
इदं स्वभावतः सिद्धं कृष्ण त्वत्परमामृतम् ॥ १९५ ॥
न दृढं द्रवरूपं वा न गंधोऽस्य न माधुरी ।
प्राप्तं स्यात्स्मृतिमात्रेण देहिनो यस्य कस्यचित् ॥ १९६ ॥
यत्कथाश्रवणादेव संसारो भासते मृषा ।
अनायासेन स्थिरता स्वांगे प्राप्नोत्यबाधिता ॥ १९७ ॥
जन्ममृत्योर्येन वार्ता निःशेषं प्रविलीयते ।
बहिरंतर्महत्सौख्यं वर्धत्येव निरंतरम् ॥ १९८ ॥
दैवेन तत्सेवितं चेत्स्वस्वरूपं करोति तत् ।
तत्रार्पितं तु मे चित्तं न वक्तुं शक्नुयादलम् ॥ १९९ ॥
त्वन्नामैव प्रियं मेऽस्ति दर्शनं सन्निधे स्थितिः ।
ततः प्रियकथा वक्षि परमानंदकारकाः ॥ २०० ॥
इदं सुखं कथमिति वक्तुं नार्हं तथापि च ।
भवन्मुखाच्छृणोम्यत्र भवंतु पुनरुक्तयः ॥ २०१ ॥
सूर्यः पर्युषितो न स्यान्नाऽशुचिर्हव्यवाड् भवेत् ।
संततं प्रवहद्गांगं भवेत्पर्युषितं किमु ॥ २०२ ॥
कृष्ण यद्भवता प्रोक्तं साक्षाद्ब्रह्मैव तत्खलु ।
चंदनद्रुमपुष्पाणि मन्ये घ्राणार्पितानि हि ॥ २०३ ॥
एवं पार्थवचः श्रुत्वा कृत्वा सर्वांगचालनम् ।
उवाचास्ति खनिः पार्थो भक्तिज्ञानोभयोरपि ॥ २०४ ॥
तत्संतोषभरेणांगं प्रेम्णाऽभूद्विह्वलं तदा ।
सायासेन तदावृत्याप्यनंतस्त्विदमब्रवीत् ॥ २०५ ॥

श्रीभगवानुवाच—

हंत ते कथयिष्यामि दिव्या ह्यात्मविभूतयः ।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यंतो विस्तरस्य मे ॥ १९ ॥

ब्रह्मणोऽहं पितासीति यच्चित्ते स्मरणं नहि ।
सोऽब्रवीद्धे पार्थ तात कृतं सर्वोत्तम त्वया ॥ २०६ ॥
तातेत्यवोचत्पार्थं यत्कृष्णश्चित्रं न भाति तत् ।
न किं स नंदबालत्वं स्वीचकार स्वयं मुदा ॥ २०७ ॥
अस्त्विदं प्रस्तुतं सर्वमत्यंतं प्रेमदर्शकम् ।
भगवानवदत्पार्थं कथयिष्ये शृणुष्व तत् ॥ २०८ ॥
पृच्छसि त्वं विभूतीर्याः संख्यपाराः पृथासुत ।
मदीया अप्यसंख्यत्वान्नाहं जानामि सर्वथा ॥ २०९ ॥
स्वांगस्थान्यपि लोमानि संख्यातुं कोऽपि न क्षमः ।
तथा मदीया अपि ताः संख्यातुं न क्षमोऽस्म्यहम् ॥ २१० ॥
अहं कियान्कथं वेति पार्थ वेद्मि न तत्त्वतः ।
अतः प्राधान्यतो वच्मि विभूतीरवधारय ॥ २११ ॥
याभिर्ज्ञाताभिरखिला विज्ञाताः स्युः पृथासुत ।
यथा हस्तगते बीजे वृक्षो हस्तगतो भवेत् ॥ २१२ ॥
उद्यानलब्धौ लभ्यंते फलपुष्पाण्ययत्नतः ।
तथैव मुख्यविज्ञाने ज्ञातं स्यादखिलं तदा ॥ २१३ ॥
अपारो मम विस्तारो नांतस्तस्य धनुर्धर ।
गगनाद्यश्च विस्तारः शश्वन्मयि विलीयते ॥ २१४ ॥

अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
अहमादिश्च मध्यं च भूतानामन्त एव च ॥ २० ॥

कुटिलालकमूर्धन्यो धनुर्वेदप्रियंवक ।
भूतमात्रेऽखिले व्याप्तोऽप्यहमात्मास्मि पांडव ॥ २१५ ॥
चित्तेऽतरहमेवाऽस्मि संवेष्ट्यास्मि बहिः सदा ।
अहमादौ तथांतेऽहं मध्येऽहं सर्वदा स्थितः ॥ २१६ ॥

अंतर्बहिः सर्वतोऽपि मेघानां व्यापकं वियत् ।
तथैवोद्भूय गगनाद्विलीयन्ते विहायसि ॥ २१७ ॥
यदा पुनर्विलीयंते तदा यांति स्वरूपताम् ।
तथोत्पत्तिस्थितिलयगतिर्जीवगतास्म्यहम् ॥ २१८ ॥
अनंतत्वं व्यापकत्वं त्वं विभूत्याऽवगच्छसि ।
जीवं कृत्वा कर्णरूपं कथामग्रे शृणुष्व भोः ॥ २१९ ॥
इतोऽपि लालसा चेत्ते विभूतिश्रवणेऽस्ति हि ।
मयोक्तं कथयामीति प्रधानाः शृणु वक्ष्यतः ॥ २२० ॥

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् ।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥ २१ ॥

इत्युक्त्वा सकृपश्चाहादित्येषु विष्णुरस्म्यहम् ।
तेजोधिकेषु सर्वेषु रश्मिमान्रविरस्म्यहम् ॥ २२१ ॥
मरुतामपि सर्वेषां मरीचिरहमस्मि च ।
तारागणेषु तेजस्वी चंद्रोऽहं शांतिदः सदा ॥ २२२ ॥

वेदानां सामवेदोऽस्मि देवानामस्मि वासवः ।
इंद्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥ २२ ॥

अखिलेष्वपि वेदेषु सामवेदोऽस्मि तत्त्वतः ।
देवेष्वपि मरुद्वंधुर्महेंद्रोऽस्मि न संशयः ॥ २२३ ॥
एकादशं मनश्चाहमिंद्रियेष्वखिलेष्वपि ।
भूतेषु या वरीवर्ति चेतना सापि चास्म्यहम् ॥ २२४ ॥

रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्षसाम् ।
वसूनां पावकश्चास्मि मेरुः शिखरिणामहम् ॥ २३ ॥

एकादशेषु रुद्रेषु मदनारिश्च यः स्मृतः ।
स शंकरोऽस्मि सर्वेशो निःशंकं विद्धि मानसे ॥ २२५ ॥
यक्षरक्षोगणेष्वीड्यः शंभुमित्रं धनाधिपः ।
कुबेरोऽस्मीति चानंतः प्रोक्तवान्निश्चयेन हि ॥ २२६ ॥
यश्चाष्टवसुषु प्रोक्तः पावकाख्यः स चास्म्यहम् ।

अद्रिष्वपि च सर्वेषु मेरुरस्म्युच्चशृंगवान् ॥ २२७ ॥

पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम् ।
सेनानीनामहं स्कंदः सरसामस्मि सागरः ॥ २४ ॥
महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् ।
यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः ॥ २५ ॥

स्वर्गसिंहासनस्थायः प्रतिष्ठाकृदहर्निशम् ।
पुरोहितानां यो राजा स बृहस्पतिरप्यहम् ॥ २२८ ॥
त्रैलोक्यसेनापतिषु स्कंदः शंकरवीर्यजः ।
कृत्तिकास्वग्निना क्षिप्तः स एवास्मि महामते ॥ २२९ ॥
सरोवरेषु सर्वेषु सागरोऽस्मि नदीपतिः ।
महर्षिषु तपोराशिर्भृगुरस्म्यहमेव च ॥ २३० ॥
सर्ववाणीष्वनुस्यूतमहमस्म्यक्षरं परम् ।
इति संप्रोक्तवान्वैकुंठाधिपो नंदनंदनः ॥ २३१ ॥
सर्वेष्वपि च यज्ञेषु जपयज्ञोऽस्मि तत्त्वतः ।
स ह्योंकारादिमंत्रैश्च कर्मत्यागकरः सदा ॥ २३२ ॥
नाम्नो जपश्च परमो नात्र स्नानाद्यपेक्षितम् ।
नाम्ना धर्माः पावनाः स्युर्वेदादौ ब्रह्म चैव यत् ॥ २३३ ॥
अचलेष्वपि शैलेषु पुण्यपुंजात्मकश्च यः ।
सोऽहं हिमाचलश्चेति ब्रवीति कमलापतिः ॥ २३४ ॥

अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः ।
गंधर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥ २६ ॥
उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम् ।
ऐरावतं गजेंद्राणां नराणां च नराधिपम् ॥ २७ ॥

कल्पवृक्षः पारिजातश्चंदनश्च गुणैर्वराः ।
विख्याता अपि ये तेषु पूज्योऽश्वत्थोऽहमस्मि भोः ॥२३५॥
देवर्षिष्वपि सर्वेषु नारदोऽहमसंशयम् ।

गंधर्वेषु च सर्वेषु तथा चित्ररथोऽस्म्यम् ॥ २३६ ॥
अशेषेष्वपि सिद्धेषु तपस्वी कपिलोऽस्म्यहम् ।
उच्चैःश्रवास्तुरंगाणामश्वरत्नं तथास्म्यहम् ॥ २३७ ॥
राज्यभूपासु करिषु श्रेष्ठश्चैरावतोऽस्म्यहम् ।
पयोराशेः समुद्भूतो यो देवासुरमंथने ॥ २३८ ॥
यं सेवंते प्रजाः सर्वा वशीभूता निरंतरम् ।
मनुष्येषु च यो राजा विभूतिं विद्धि तं मम ॥ २३९ ॥

आयुधानामहं वज्रं धेनूनामस्मि कामधुक् ।
प्रजनश्चास्मि कंदर्पः सर्पाणामस्मि वासुकिः ॥ २८ ॥
अनन्तश्चास्मि नागानां वरुणो यादसामहम् ।
पितॄणामर्यमा चास्मि यमः संयमतामहम् ॥ २९ ॥

सर्वायुधेषु प्रवरं करे शतमखस्य यत् ।
विराजते शश्वदेव तद्वज्रमहमेव च ॥ २४० ॥
कामधेनुश्च धेनूनां विष्वक्सेनोऽहमब्रवीत् ।
यश्च प्रजननः प्रोक्तः प्रसिद्धो मदनोऽस्म्यहम् ॥ २४१ ॥
सर्वसर्पकुले मुख्यो वासुकिश्चाहमेव हि ।
पार्थ नागेषु सर्वेषु योऽनंतः सोऽपि चास्म्यहम् ॥ २४२ ॥
अखिलेष्वपि यादःसु मुख्यः पश्चिमदिक्पतिः ।
वरुणोऽस्मीति चानंतः कथयामास पांडवम् ॥ २४३ ॥
पितॄणां चापि सर्वेषां प्रोक्ता या पितृदेवता ।
सोऽर्यमास्मीति भगवानवोचत्पांडवं तदा ॥ २४४ ॥
जगतः प्राणिमात्राणां शुभाशुभफलानि ये ।
कर्मानुसारतश्चापि विलिखंति यथातथम् ॥ २४५ ॥
तेषामपि नियंतॄणां युक्तायुक्तविचारतः ।
कर्मसाक्षी यमोऽस्मीति प्रत्यवादीद्रमापतिः ॥ २४६ ॥

प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम् ।
मृगाणां च मृगेंद्रोऽहं वैनतेयश्च पक्षिणाम् ॥ ३० ॥

अपि दैत्यकुलोत्पन्नो दैत्यदौःशील्यवर्जितः ।
स प्रह्लादोऽस्म्यहमिति विद्धि साधुषु योऽग्रणीः ॥ २४७ ॥
कालोऽस्म्यहं कलयतामिति गोपालकोऽवदत् ।
मृगेष्वपि च सिंहोऽहमखिलश्वापदाग्रणीः ॥ २४८ ॥
पक्षिजातिषु सर्वासु गरुडोऽस्मि च तद्वपुः ।
अतः पृष्ठेन मां वोढुं सामर्थ्यं तस्य विद्यते ॥ २४९ ॥

पवनः पवतामस्मि रामः शस्त्रभृतामहम् ।
झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥ ३१ ॥

घटिकामितकालात्प्राकरोतीलाप्रदक्षिणाम् ।
एकेनोड्डानमात्रेण सप्ताब्धीनपि लंघति ॥ २५० ॥
एवं त्वरितगो वायुर्वेगवत्सु च सोऽप्यहम् ।
सर्वशस्त्रभृतामग्र्यः श्रीरामोऽप्यहमस्मि भोः ॥ २५१ ॥
यः संकटेऽपि धर्मात्मा केवलं धनुराश्रितः ।
लेभे विजयलक्ष्मीं च त्रेतायां वीर्यवत्तरः ॥ २५२ ॥
सुवेलाद्रौ रावणस्य शिरःश्रेणीमखंडयत् ।
उदोमंत्रेण गगने भूतेभ्यस्तान्बलीन्ददौ ॥ २५३ ॥
देवानां रक्षितं श्रैष्ठ्यं धर्मस्योज्जीवनं कृतम् ।
सूर्यवंशे प्रादुरभूत्केवलं प्रतिसूर्यवत् ॥ २५४ ॥
एवं मुख्यः शस्त्रधृत्सु रामः सीतापतिस्त्वहम् ।
पुच्छयुग्जलजीवेषु विख्यातो मकरोऽस्म्यहम् ॥ २५५ ॥
श्रेष्ठा सर्वप्रवाहेषु भगीरथसमाहृता ।
ग्रसिता जह्नुना गंगा जंघाभेदादभूत्पुनः ॥ २५६ ॥
यस्याः प्रौढिः प्रवाहेषु श्रेष्ठा त्रिभुवने सरित् ।
जाह्नवी साप्यहं पार्थ साक्षान्मन्मूर्तिरेव सा ॥ २५७ ॥
एवंप्रकारा विश्वस्मिन्भिन्ना मम विभूतयः ।
सहस्रजन्मभिश्चार्धा नालं जातास्तु वर्णनात् ॥ २५८ ॥

सर्गाणामादिरंतश्च मध्यं चैवाहमर्जुन ।

अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् ॥ ३२ ॥
अक्षराणामकारोऽस्मि द्वंद्वः सामासिकस्य च ।
अहमेवाक्षयः कालो धाताहं विश्वतोमुखः ॥ ३३ ॥

चिनवाम्येकदैवाहं नक्षत्राण्यखिलान्यपि ।
इत्येवमर्जुनेच्छायां कार्या स्याद्गगनच्छदिः ॥ २५९ ॥
पृथिव्यणूनां गणने कक्षे भूगोलमाश्रयेत् ।
तद्विस्तारं तथा ज्ञातुं पूर्वं मज्ज्ञानमीप्सितम् ॥ २६० ॥
सशाखफलपुष्पाणामप्याकलनमेकदा ।
विना वृक्षोत्पाटनेन न स्यादेव कदाचन ॥ २६१ ॥
तद्वदेव विभूतीश्च ज्ञातव्या यदि चैकदा ।
तदा पूर्वं मत्स्वरूपं ज्ञातव्यं स्यादकल्मषम् ॥ २६२ ॥
पृथग्विभूतिकथने कति श्रोष्यसि पांडव ।
अतस्त्वं विद्धि मनसि मां सर्वं व्याप्य धिष्ठितम् ॥ २६३ ॥
आदौ मध्ये तथांते च सृष्टेः कारणमस्म्यहम् ।
तंतवः सरला वक्रा व्याप्ता यद्वत्पटे तथा ॥ २६४ ॥
एवं व्यापकताज्ञाने ह्यवश्या विभूतयः ।
परं त्वद्योग्यता नेति तदास्तां पार्थ भाषणम् ॥ २६५ ॥
कथयेति पृच्छसि त्वं सुभद्रेश ततः शृणु ।
सर्वविद्यासु वेदांतविद्या निश्चितमस्म्यहम् ॥ २६६ ॥
वक्तृष्वपि च सर्वेषु वादः पूर्वोत्तरोऽस्म्यहम् ।
यः कदाप्यैक्यभावेन न समाप्तो भवेत्क्वचित् ॥ २६७ ॥
निर्णये वर्धते शश्वच्छ्रवणे तर्कविस्तरः ।
वक्तॄणां रोचते यद्वन्मधुरा वक्तृता सदा ॥ २६८ ॥
एवं प्रवादे यो वादो गोविंदो वक्ति सोऽस्म्यहम् ।
सर्वाक्षरेषु योऽकारः स्वरगो विशदोऽस्म्यहम् ॥ २६९ ॥
पार्थ सर्वसमासेषु द्वंद्वाख्योऽस्मि न हीतरः ।
मक्षिकातो विध्यवधिः कालोऽहं सर्वभक्षकः ॥ २७० ॥

मेरुमंदारसहितां महीं नयति यो लयम् ।
गुप्तां करोति यस्तत्र जाते जलमये लये ॥ २७१ ॥
प्रलये ग्रसते तेजो वायूनसंभक्षयत्यपि ।
यस्योदरेऽपि वियतोऽवकाशो लभ्यते लये ॥ २७२ ॥
एवं योऽनवधिः कालः सोऽहमित्यवदद्धरिः ।
पुनश्च सृष्टिनिर्माता स सर्वोत्पादकोऽस्म्यहम् ॥ २७३ ॥

मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम् ।
कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ३४

सृष्टभूतधृगस्मीह भूतानां पालकोऽपि च ।
अंते संहारको यश्च मृत्युः सोऽप्यहमेव हि ॥ २७४ ॥
अतः स्त्रीवाचकेष्वेषु सप्त संति विभूतयः ।
अद्य ताः कथयाम्यग्रे शृणुष्वावहितः सदा ॥ २७५ ॥
कीर्तिर्या नित्यनूत्नास्ति सापि मन्मूर्तिरर्जुन ।
औदार्ययुक्ता संपत्तिः साहमेव सुनिश्चितम् ॥ २७६ ॥
न्यायासने चोपविश्य विचारयति या नयम् ।
सा वाणी मत्स्वरूपैव धनुर्धर न संशयः ॥ २७७ ॥
वस्तुजातं समालोक्य चित्ते या मत्स्मृतिर्भवेत् ।
सा निश्चयेन ज्ञातव्या स्मृतिशक्तिर्मदात्मिका ॥ २७८ ॥
या तत्परा निजहिते सा बुद्धिर्मत्स्वरूपिणी ।
धृतिरप्यसदीयैव सा क्षमाप्यहमर्जुन ॥ २७९ ॥
एवं स्त्रीसमुदायेऽपि विद्धि सप्त विभूतयः ।
इति संसारेभसिंहः श्रीहरिः प्रोक्तवान्स्वयम् ॥ २८० ॥

बृहत्साम तथा साम्नां गायत्री छंदसामहम् ।
मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ॥ ३५ ॥

सामसु श्रुतिगीतेषु बृहत्सामेति यन्महत् ।
तदप्यहमिति प्रोचे पांडवाय रमापतिः ॥ २८१ ॥
तथा छंदस्सु सर्वेषु यवेर्ति श्रेष्ठयमाश्रितः ।

गायत्रीति च यच्छंदः सोऽहं निर्भ्रान्तमर्जुन ॥ २८२ ॥
मासेषु मार्गशीर्षोऽहमिति शार्ङ्गधरोऽब्रवीत् ।
ऋतुष्वहं समस्तेषु वसंतः कुसुमाकरः ॥ २८३ ॥

द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् ।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम् ॥ ३६ ॥
वृष्णीनां वासुदेवोऽस्मि पांडवानां धनंजयः ।
मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥ ३७ ॥

द्यूतं कपटविद्यासु विभूतिस्तन्ममैव हि ।
ततश्चतुष्पथेऽप्यस्य प्रतिबंधो न विद्यते ॥ २८४ ॥
सप्रकाशपदार्थेषु यच्च तेजस्तदस्म्यहम् ।
इष्टकार्येषु विजयः सहजः सोऽस्म्यहं सदा ॥ २८५ ॥
शुद्धो न्यायश्च यत्रास्ति व्यवसायसुखप्रदः ।
सोऽहमस्मीति देवानां राजा प्रोवाच सादरम् ॥ २८६ ॥
सत्त्वाधिष्ठितभूतेषु सत्त्वमस्मि सुनिश्चितम् ।
वासुदेवो यादवेषु श्रीमान्योऽस्ति स चास्म्यहम् ॥ २८७ ॥
वसुदेवात्समुत्पन्नो गोप्यर्थं गोकुले गतः ।
सोऽहं कदाचित्सप्राणां पूतनामग्रसं क्षणात् ॥ २८८ ॥
बालभावेऽप्यनुत्तीर्णे दैत्यहीना कृता मही ।
गोवर्धनं करे धृत्वा शक्रगर्वोप्यपाकृतः ॥ २८९ ॥
शल्यं हृतं च कालियात्त्रातं गोकुलमग्नितः ।
वत्सचौर्ये ब्रह्मणोऽपि सर्वथा भ्रामितं मनः ॥ २९० ॥
कौमारेऽथ समुद्भूते कंसप्रभृतयः खलाः ।
महापराक्रमोपेता घातिता लीलयैव हि ॥ २९१ ॥
वक्तव्यं कतिधा चेदं श्रुतं यच्चेक्षितं त्वया ।
यादवेष्वपि तज्ज्ञेयं मत्स्वरूपं न संशयः ॥ २९२ ॥
अर्जुनोऽहं पांडवेषु ज्ञेयश्चंद्रकुलोद्भवः ।
अतः परस्परं प्रेमभावे विघटनं नहि ॥ २९३ ॥

मिथ्या गृहीत्वा संन्यासं मत्स्वसाऽपहृता त्वया ।
तथापि न विकल्पो मे द्वयोरेकत्वयोगतः ॥ २९४ ॥
व्यासोऽहं मुनिवृंदेषु ब्रूते यादवराडिति ।
कवीश्वरेष्वपि महानुशना कविरस्म्यहम् ॥ २९५ ॥

दंडो दमयतामस्मि नीतिरस्मि जिगीषताम् ।
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥ ३८ ॥

सर्वेषां च नियंतृणामप्याब्रह्मपिपीलिकम् ।
दंडो यः सर्वदमनः सोऽहमस्मि न संशयः ॥ २९६ ॥
सारासारविचारज्ञो धर्मज्ञानैकपक्षधृक् ।
शास्त्रेषु यच्च मूर्धन्यं नीतिशास्त्रमहं हि तत् ॥ २९७ ॥
गुह्येषु गूढं यन्मौनं, स्रष्टाप्यज्ञो यदग्रतः ।
तच्च मौनमहं विद्धि धनुर्धर यथार्थतः ॥ २९८ ॥
ज्ञानवत्सु च यज्ज्ञानं तदहं चार्जुन स्वयम् ।
अस्त्विदं मद्विभूतीनामंतो नास्ति पृथासुत ॥ २९९ ॥

यच्चापि सर्वभूतानां बीजं तदहमर्जुन ।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥ ३९ ॥

नांतोऽस्ति मम दिव्यानां विभूतीनां परंतप ।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥ ४० ॥

कचित्पर्जन्यधाराणां गणना स्यात्प्रयत्नतः ।
तथा तृणांकुराणां च संख्यानं समये भवेत् ॥ ३०० ॥
यथा लहर्यः सिंधूत्था असंख्येयाः कदापि हि ।
तथा विभूतयोऽनंताः संख्यातुं नैव च क्षमाः ॥ ३०१ ॥
तथापि मुख्यास्त्वामत्र कीर्तिताः पंचसप्ततिः ।
तेन मन्ये भवद्धेतुः पूर्णः सामान्यतोऽभवत् ॥ ३०२ ॥
योऽयं विभूतिविस्तारो वस्तुतोऽपार एव हि ।
अतः कति प्रवक्तव्याः कति त्वं श्रोतुमर्हसि ॥ ३०३ ॥

अत्र त्वां मर्म वक्ष्यामि सुगूढमपि चैकदा ।
यस्माद्भूतांकुरो बीजात्तद्बीजमपि चास्म्यहम् ॥ ३०४ ॥
तस्मात्सूक्ष्मं तथा स्थूलं मुक्त्वा नीचोच्चभावनाम् ।
व्याप्तं मां वस्तुमात्रेऽपि समदृष्ट्या विभावयेत् ॥ ३०५ ॥
अतोऽपि सुलभा युक्तिरन्यास्ति कथयामि ताम् ।
यथा त्वमेव जानासि विभूतीः पार्थ सर्वशः ॥ ३०६ ॥

यद्यद्विभूतिमत्सत्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं ममतेजोंशसंभवम् ॥ ४१ ॥

संपत्तिश्च दया चैव यत्र स्यास्यति नित्यदा ।
तां विभूतिं विजानीहि ममैवेति धनंजय ॥ ३०७ ॥

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥ ४२ ॥

एकं खेऽस्ति रवेर्बिंबमपि त्रैलोक्यदीपकम् ।
तथैवाज्ञां ममैकस्य पालयंत्यखिला जनाः ॥ ३०८ ॥
एतादृशं न मन्येत ह्येकं निर्धनमेव वा ।
किं कामधेनुना साकमिच्छापूर्तिश्चरत्यहो ॥ ३०९ ॥
तां प्राप्येच्छति यत्कोऽपि तत्सा प्रसवति स्वयम् ।
तथा विभूतिसंगे मे साग्रमैश्वर्यमस्त्यपि ॥ ३१० ॥
तच्चैवमेव जानीयाद्यदाज्ञां शिरसा जनाः ।
वहंति सर्वे तान्विद्धि मद्विभूतीरिति स्वतः ॥ ३११ ॥
यत्सामान्यविशेषेति भेदज्ञानं सुदूषितम् ।
यतः सर्वत्र विश्वस्मिन्नेक एवास्मि तत्त्वतः ॥ ३१२ ॥
एवं चेदुच्चनीचादि कुतः सा भेदकल्पना ।
तथैव चात्मनः सिद्धेः कलंकं किमु लापयेत् ॥ ३१३ ॥
व्यर्थं घृतं किं मथ्नीयाद्रंधनं वाऽमृतस्य किम् ।
वायोर्दक्षिणवामेति भेदोऽङ्गेषु क विद्यते ॥ ३१४ ॥
सूर्यं द्रष्टुं प्रयत्ने तु दृष्टिर्नश्यति केवलम् ।

यथांधो बाह्यदृष्ट्याऽयं तथांतरपि च स्फुटम् ॥ ३२९ ॥
इदमस्तु, तदा पार्थः स्वहिताय समुद्यतः ।
ततोऽप्यधिकमुत्कंठाऽवीवृधत्तस्य बोधने ॥ ३३० ॥
सोऽवादीद्यांतःप्रतीतिर्बाह्ये दृग्गोचराऽस्तु सा ।
एवमभ्युदयार्थाय मतिस्तस्याभ्यवर्धत ॥ ३३१ ॥
तदाऽभ्यामेव दृष्टिभ्यां विश्वरूपं समासतः ।
पश्येयेति बलिष्ठाऽभूदिच्छा दैवेन तस्य हि ॥ ३३२ ॥
प्राप्ता कल्पतरोः शाखा यस्या वंध्यं फलं नहि ।
यद्यद्वक्ति तदा पार्थः कृष्णः पूर्णं करोति तत् ॥ ३३३ ॥
प्रह्लादं रक्षितुं भक्तं विषरूप्यभवत्स्वयम् ।
स श्रीकृष्णो गुरुः साक्षात्पार्थस्य पुरतः स्थितः ॥ ३३४ ॥
प्रश्नार्थं विश्वरूपस्य कथं पार्थः समारभत् ।
तदग्रे वर्णयिष्येऽहमिति ज्ञानेश्वरोऽब्रवीत् ॥ ३३५ ॥

इति श्रीज्ञानेश्वरविरचितायां भावार्थदीपिकायां अभंतनिरूपणे
दशमोऽध्यायः ॥ १० ॥

श्लोकाः ४२ नवश्लोकाः ३३५

तथैव मत्स्वरूपेऽपि न सामान्यविशेषकम् ॥ ३१५ ॥
भिन्नभिन्ना मद्विभूतीर्नार्हाः संख्यातुमंजसा ।
अतः सुभद्राधिपते किं ब्रूयामधिकं तव ॥ ३१६ ॥
ममैव चांशेनैकेन व्याप्तमस्त्यखिलं जगत् ।
अभेदबुद्ध्या बुध्वैतत्त्वं सर्वत्र भजस्व माम् ॥ ३१७ ॥
एवं वनवसंतोऽयमेकांतो यश्च योगिनाम् ।
सकलैश्वर्यवांश्चैव श्रीकृष्णश्चैवमब्रवीत् ॥ ३१८ ॥
तदाऽर्जुनोऽवदत्स्वामिन्नुक्तं भेदं त्यजेति यत् ।
तेनाहं चैव भेदश्च पृथगस्तीति निश्चितम् ॥ ३१९ ॥
उदयात्प्राग्रविर्ध्वांतोच्छित्त्यै किं प्रार्थ्यते जगत् ।
तद्वद्भूयां तथाऽहं त्वां तदप्युन्मत्तवद्भवेत् ॥ ३२० ॥
एकदा तव नामैव सकृदुच्चरितं श्रुतम् ।
तदापि भेदो नष्टः स्याद्धृदयाद्दूरतः ॥ ३२१ ॥
भवान्परब्रह्ममूर्तिर्दैवाल्लब्धो मया यदि ।
तर्हि भेदः कदा कस्य कथं दृश्येत कं प्रति ॥ ३२२ ॥
उष्णबाधा कथं वा स्याद्व्रजतश्चंद्रमंदिरे ।
तथेह श्रीहरे मह्यं त्वयोक्तं सत्यमेव तत् ॥ ३२३ ॥
तदाऽनंतोऽपि तुष्टः सन्नालिलिंग पृथासुतम् ।
तथोक्तवान्पार्थ रोषं मदुक्ते त्वं न धारय ॥ ३२४ ॥
विभूतीनां प्रकारा ये भेदेन कथिता मया ।
त एवाऽभेदरूपेण त्वच्चित्ते फलिता न वा ॥ ३२५ ॥
इति द्रष्टुं तथा तेऽद्य वाह्यात्कारेण भाषितम् ।
जातं त्वद्धृद्यभेदेन ज्ञातमित्थं मया स्फुटम् ॥ ३२६ ॥
तदाऽर्जुनोऽब्रवीद्देव स्वयमालोचयेदिदम् ।
पश्याम्यहं जगत्कृत्स्नं यत्त्वया व्याप्तमेव हि ॥ ३२७ ॥
एवं योग्योऽभवत्पार्थ इति ब्रुवति संजये ।
धृतराष्ट्रः स्वस्य एव तत्काले समुपाविशत् ॥ ३२८ ॥
सखेदः संजयस्तत्र मूते भाग्यविपर्ययात् ।

यथांघो वाह्यदृष्ट्याऽयं तथांतरपि च स्फुटम् ॥ ३२९ ॥
इदमस्तु, तदा पार्थः स्वहिताय समुद्यतः ।
ततोऽप्यधिकमुत्कंठाऽवीवृधत्तस्य बोधने ॥ ३३० ॥
सोऽवादीद्यांतःप्रतीतिर्बाह्ये दृग्गोचराऽस्तु सा ।
एवमभ्युदयार्थाय मतिस्तस्याभ्यवर्धत ॥ ३३१ ॥
तदाऽभ्यामेव दृग्भ्यां विश्वरूपं समासतः ।
पश्येयेति बलिष्ठाऽभूदिच्छा दैवेन तस्य हि ॥ ३३२ ॥
प्राप्ता कल्पतरोः शाखा यस्या वंध्यं फलं नहि ।
यद्यद्वक्ति तदा पार्थः कृष्णः पूर्णं करोति तत् ॥ ३३३ ॥
प्रह्लादं रक्षितुं भक्तं विषरूप्यभवत्स्वयम् ।
स श्रीकृष्णो गुरुः साक्षात्पार्थस्य पुरतः स्थितः ॥ ३३४ ॥
प्रश्नार्थं विश्वरूपस्य कथं पार्थः समारभत् ।
तदग्रे वर्णयिष्येऽहमिति ज्ञानेश्वरोऽब्रवीत् ॥ ३३५ ॥

इति श्रीज्ञानेश्वरविरचितायां भावार्थदीपिकाया अनंतनिरूपणे
दशमोऽध्यायः ॥ १० ॥

श्लोका. ४२ नवश्लोका. ३३५

गीर्वाणज्ञानेश्वरी

एकादशोऽध्यायः

इत एकादशाध्याये कथ्यते द्वैरसी कथा।
यत्र साक्षाद्विश्वरूपं पार्थदृग्गोचरं भवेत्॥ १॥
गेहे शांतरसस्यात्र प्राप्तः प्राघुणिकोऽद्भुतः।
इतरेषां रसानां च पंक्तिलाभोऽभवत्तयोः॥ २॥
लभंते सुहृदो लग्ने वस्त्रालंकारसत्कृतिम्।
देशभाषासने तद्वद्विलसंति रसा नव॥ ३॥
शांताद्भुतौ भूषितौ तु दृग्भ्यामालोचनक्षमौ।
आलिंगनार्थं स्नेहेन प्राप्तौ हरिहराविव॥ ४॥
अमावास्यादिने किंवा युक्तौ रविशशी यथा।
तद्वच्छांताद्भुतावैक्यमायातौ प्रेमभावतः॥ ५॥
गंगायमुनयोः संगे प्रयागो रसयोरभूत्।
श्रवणस्नानमात्रेण तत्राऽभूत्पावितं जगत्॥ ६॥
यत्र शांताद्भुतौ मूर्तौ गुप्ता गीतासरस्वती।
त्रिवेणीसंगमश्चैकादशोऽध्यायः प्रयागवत्॥ ७॥
अत्र श्रोत्रेंद्रियद्वारा साध्यं तीर्थावगाहनम्।
कृतं निवृत्तिनाथेनेत्येवं ज्ञानेश्वरोऽब्रवीत्॥ ८॥
गीर्वाणं गहनं मुक्त्वा बद्धः प्राकृतघट्टकः।
अयं निवृत्तिदेवेन कृतो धर्मस्य शेवधिः॥ ९॥
अतः स्नात्वात्र यः कोऽपि विश्वरूपं विलोक्य च।
प्रयागमाधवं नत्वा मोचयेद्भवबंधनम्॥ १०॥
अस्त्विदं, यन्नवरसा मूर्ताश्चात्र समागताः।
तेन श्रवणसौख्यस्य जगतो राज्यमागमत्॥ ११॥

---

१ शांताद्भुताख्यरसद्वययुता. २ प्राघुणिकः=अतिथिः. ३ शेवधिः=निधिः.

अत्र शांताद्भुतौ यद्वत्प्रत्यक्षाश्चेतरे रसाः ।
अल्पेयमुपमा, मोक्षोऽप्यनायासेन लभ्यते ॥ १२ ॥
सोऽयमेकादशाध्यायो देवविश्रांतिकस्थलम् ।
तत्र प्रवेशः पार्थस्य, भाग्यस्य मुकुटो हि सः ॥ १३ ॥
गीतार्थे प्राकृते जाते भाग्यवान्पार्थ एव किम् ।
प्राकृतज्ञस्य कस्यापि स्यात्समृद्धिः सुखस्य हि ॥ १४ ॥
अतो विज्ञापयामीह विनयात्सज्जनान्प्रति ।
शृणुध्वं सावधानेन गीताव्याख्यानमुत्तमम् ॥ १५ ॥
नैवं स्नेहः संतवृंदे योग्यः स्यान्मादृशैः कृतः ।
प्रेमभावेन मन्यध्वं वालोक्तमिव मद्वचः ॥ १६ ॥
स्वशिक्षितः शुको ब्रूते तच्छ्रुत्वा चाल्यते शिरः ।
माता बालेन कुतुकं कारयित्वापि नंदति ॥ १७ ॥
तथा मदुक्ता ये शब्दाः पाठिता भवतैव ते ।
मदुक्तं भवदीयं तच्छ्रोतव्यं देव सादरम् ॥ १८ ॥
स्वामिन्वक्तृत्ववृक्षोऽयं रोपितो मधुरस्त्वया ।
अवधानोदकं सिक्त्वा वर्धनीयस्त्वयैव हि ॥ १९ ॥
तदंकुरसपुष्पाणि विविधार्थफलानि च ।
स्युस्त्वत्कृपावलेनैव तेन स्यात्सुखितं जगत् ॥ २० ॥
ततोऽब्रुवन्संतजनास्तुष्टाः सो भाषणात्तव ।
यत्कृष्णायाऽब्रवीत्पार्थस्तदेव कथयाऽधुना ॥ २१ ॥
तदाऽवदज्ज्ञानदेवोऽहं कृष्णार्जुनभाषणम् ।
कथं वक्तुं समर्थः स्यां भवंतो दत्त वक्तृताम् ॥ २२ ॥
वनस्यैर्वानरैर्देव हतो लंकापातेस्त्वया ।
एकादशाक्षौहिणीः किं नैकः पार्थो हनिष्यति ॥ २३ ॥
कर्तुं न शक्यं श्रेष्ठानां नैवास्ति जगति कचित् ।
समर्थाः साधवो यूयं गीतार्थं ब्रूत मन्मुखात् ॥ २४ ॥

---

१ अंकुरसा=नवरसाः.

शुद्धं हि गीताभावार्थं स्वमुखेनाह केशवः ।
तमेव विशदं वच्मि शृणुध्वमवधानतः ॥ २५ ॥
गीताग्रंथश्च धन्योऽयं वेदसंवेद्यदैवतम् ।
यं स्वयं भगवान्कृष्णो वक्तास्याऽखिलशक्तिमान् ॥ २६ ॥
तन्महत्त्वं कथं वच्मि यः शिवस्यापि दुर्गमः ।
अतो भावेन गीतायै नमस्कुर्यामिदं वरम् ॥ २७ ॥
अस्त्विदं, सोऽर्जुनो दृष्टिं विश्वरूपे निवेशयन् ।
अकरोत्प्रथमं प्रश्नं तं शृणुध्वं वदामि वः ॥ २८ ॥
सृष्टिः सर्वेश्वरमयीत्येवं बोधो यथांतरे ।
तथा बहिर्गोचरः स्यादित्यैच्छत्पांडवस्ततः ॥ २९ ॥
सत्यप्येवं स्थिते पार्थस्तदुक्तौ प्राप संकटम् ।
विश्वरूपं दर्शयेति पृच्छेयं केशवं कथम् ॥ ३० ॥
एतावंतं न केनापि पृष्टं भक्तेन यत्कचित् ।
तन्मयाऽद्य कथं वाच्यं प्रत्यक्षं कथयेति तम् ॥ ३१ ॥
यद्यप्यहं कृष्णमित्रं देवक्या नाधिकः कचित् ।
सा मातापि च यत्प्रष्टुमविभेदधिकारिणी ॥ ३२ ॥
मत्तो यद्यपि सेवाऽभूत्सा किं गरुडवद्भवेत् ।
सोऽप्येवं नोक्तवान्देवं विश्वरूपप्रदर्शने ॥ ३३ ॥
सनकाद्या महांतोऽपि नापृच्छन्निकटस्थिताः ।
व्रजवासिजनेभ्योऽपि कथं प्रेम्णाधिकोऽस्म्यहम् ॥ ३४ ॥
ते वंचितास्तु बाल्येनाऽवरीपार्थं च गर्भगः ।
सुरक्षितं विश्वरूपं न कस्यापि प्रदर्शितम् ॥ ३५ ॥
एवं यदत्यंतगूढं कृष्णहृत्स्थं वदेति तम् ।
मया कथं तत्प्रष्टव्यमिति न ज्ञायते यतः ॥ ३६ ॥
न प्रष्टव्यं तदा विश्वरूपदर्शनमंतरा ।
अस्वस्थचित्तो जीवामि तदप्यत्यंतदुर्घटम् ॥ ३७ ॥
अतः पुराल्पं पृच्छामि ततो देवेच्छयाऽधिकम् ।
एवं विचार्य पुरतः पार्थः प्रोवाच भीतवत् ॥ ३८ ॥

ततश्चातुर्यतोऽपृच्छद्यथा शब्दद्वयोत्तरम् ।
दर्शयेत्तद्रूपीकेशो विश्वरूपं यथातथम् ॥ ३९ ॥
वत्सं दृष्ट्वा यथा धेनुरत्विष्टस्येव संभ्रमात् ।
मुखे धृते स्तने क्षीरस्रुतिर्नावरितुं क्षमा ॥ ४० ॥
पांडवानां रक्षणाया धावत्कृष्णो वनांतरे ।
स पार्थेन कृते प्रश्ने न दद्याद्रुत्तरं कथम् ॥ ४१ ॥
कृष्णः साक्षात्स्नेहरूपः पार्थश्च स्नेहपोषकः ।
एवमैक्ये तयोर्द्वौ भिन्नौ स्तश्चित्रमेव तत् ॥ ४२ ॥
अतः पार्थवचः श्रुत्वा कृष्णः स्याद्विश्वरूपधृक् ।
सावधानतया तस्मात्प्रसंगं शृणुतादरात् ॥ ४३ ॥

अर्जुन उवाच ।

मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम् ।
यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम ॥ १ ॥

ततः पार्थोऽवदत्कृष्णं शब्दातीतं दयानिधे ।
भवता तत्त्वमप्युक्तं मदर्थं कृपया त्वया ॥ ४४ ॥
भूतानि यं लयं यांति जीवमाये प्रणश्यतः ।
या स्याद्ब्रह्मस्थितिस्तत्र तत्स्वीयं रूपमंतिमम् ॥ ४५ ॥
रक्षितं भवता शश्वद्रूढं हृदयमंदिरे ।
वेदेभ्योऽपि परं यच्च सुदूरे रक्षितं त्वया ॥ ४६ ॥
तदद्य हृदयं स्वीयं मत्पुरः प्रकटीकृतम् ।
शंकरेण निजैश्वर्यं ज्ञानायारातिकीकृतम् ॥ ४७ ॥
स्वामिंस्तदद्य सहजं लीलयैव ममार्पितम् ।
तत्त्वया दत्तमित्युक्तौ भेदः स्यात्पुरतः स्थितः ॥ ४८ ॥
महापूरे ब्रुडंतं मां दृष्ट्वा धृत्वा शिखां करे ।
निष्कासितो दयासिंधो निमज्ज्य स्वयमंततः ॥ ४९ ॥
त्वां विना न जगत्यस्मिन्द्वितीयं वस्तु विद्यते ।
परं दुर्दैवमस्माकं यदहंकारमाश्रिताः ॥ ५० ॥

महान्जगत्यर्जुनोऽहमिति देहाभिमानतः।
कौरवानप्याप्तजनान्मत्वाऽऽसं स्वीयभावतः ॥ ५१ ॥
यान्हत्वा तेन पापेन किं वा भुंजीय शासनम् ।
पश्यंतमेवं दुःस्वप्नं सावधानः कृतः प्रभो ॥ ५२ ॥
यथा कश्चिद्गृहं त्यक्त्वा गंधर्वनगरं व्रजेत् ।
किंवा त्यक्त्वा जलं गच्छेत्पातुं मृगजलं यथा ॥ ५३ ॥
दृष्ट्वा वस्त्रात्मकं सर्पं भयकंपार्दितं यथा ।
म्रियमाणं च संरक्ष्य श्रेयः संपादितं त्वया ॥ ५४ ॥
प्रतिबिंबं जले दृष्ट्वा पतन्सिंहो जलाशये ।
रक्षणीयो यथाऽनंत रक्षितोऽहं तथा त्वया ॥ ५५ ॥
एतावंतं तथैवासीन्निश्चयोऽपि ममांतरे ।
यत्सप्त सागराश्चेह श्रीहरे संयुता अपि ॥ ५६ ॥
सर्वापि ब्रुडिता सृष्टिराकाशास्त्रुटितोऽपि वा ।
तथापि गोत्रजैर्युद्धप्रसंगो मास्तु सर्वथा ॥ ५७ ॥
एवं ह्यहंकारबद्धो ब्रुडितश्चाग्रहोदके ।
वरमासीत्प्रसंगे त्वं निकटे रक्षकः स्थितः ॥ ५८ ॥
यन्मिथ्या मानितं स्वीयं गोत्रजादि च कल्पितम् ।
मिथ्यापिशाचग्रस्तोऽहं भवतैव सुरक्षितः ॥ ५९ ॥
पूर्वं लाक्षागृहान्मुक्तावासीद्देहे भयं तदा ।
इदमन्यद्धद्दुःखं चैतन्यं लोपयेदपि ॥ ६० ॥
दुराग्रहहिरण्याक्षः कक्षीकृत्य च धीभुवम् ।
मोहार्णवगवाक्षेण निःसृतोऽभूदितस्ततः ॥ ६१ ॥
स्वस्थानमाप्ता सा बुद्धिर्भवत्सामर्थ्यतः किल ।
प्राप्तं कृष्ण द्वितीयं त्वां वराहाकृतिधारणम् ॥ ६२ ॥
तव कीर्तिरपारास्ति मूकोऽहं वच्मि तत्कियत् ।
मह्यं प्राणाश्च पञ्चापि निश्चयादर्पितास्त्वया ॥ ६३ ॥
मयच्छ्रमा न च व्यर्था देव लब्धं त्वया यदाः ।
यत्सम्मूलं ममाज्ञानमगच्छन्नाशकारकम् ॥ ६४ ॥

आनंदजलकह्लारे कृपादृष्टिरियं हरे।
स्वरूपामंदिरे दयादाश्रयं येभ्य एव हि ॥ ६५ ॥
तेभ्यो जातो मोह इति क्षुद्रा वार्ता कथं भवेत्।
वडवाग्निं शमयितुं शक्तं मृगजलं किमु ॥ ६६ ॥
श्रीमन्नहमपि प्राप्य यत्कृपामंदिरं तव।
लिहन्ब्रह्मरसास्वादं न्यग्रसं पूर्वपुण्यतः ॥ ६७ ॥
तेन मोहो लयं यातस्तत्किमाश्चर्यकारकम्।
कथयामि भवत्पादौ धृत्वोद्धारोऽभवन्मम ॥ ६८ ॥

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥ २ ॥

श्रीकृष्ण पुंडरीकाक्ष कोटिसूर्यसमप्रभ।
तत्त्वं तव मुखांभोजाच्छ्रुतमद्य दयाघन ॥ ६९ ॥
उत्पद्यंते यतो जीवा लयं वा यांति यत्र ते।
सा विस्तरेण प्रकृतिरुक्ता देवेन मां प्रति ॥ ७० ॥
साद्यंतमुक्ता प्रकृतिर्दर्शिता ब्रह्मणः स्थितिः।
प्रावृत्य यस्य माहात्म्यं वेदा आसन्सुशोभिताः ॥ ७१ ॥
यस्माज्जाता इमे वेदा धर्मरत्नान्यसूयुवन्।
भवत्पादाश्रयेणैव वरीवृतति वैभवात् ॥ ७२ ॥
अगाधं तव माहात्म्यं मार्गैर्लभ्यं तथाखिलैः।
आत्मानुभावेन रम्यं दर्शितं भवता मम ॥ ७३ ॥
निरभ्रे च यथाकाशे स्पष्टं स्यात्सूर्यमंडलम्।
शैवालोत्सारणे यद्वन्निर्मलं दृश्यते जलम् ॥ ७४ ॥
चंदनालिंगनं शक्यं त्याजिते सर्पवेष्टने।
किंवा पिशाचे नष्टेऽपि निधानं हस्तगं भवेत् ॥ ७५ ॥
ज्ञानावृतौ या मायासीत्सा त्यक्ता दूरतस्त्वया।
ततो मम मतिश्चाद्य परब्रह्मणि संगता ॥ ७६ ॥
एतस्मिन्विषये चित्ते पूर्णो विश्वास आगतः।

तथापि श्रीपते काचिदुत्पन्नान्यैव वासना ॥ ७७ ॥
तां यदि त्वां न पृच्छेयं कं वाऽन्यं वच्मि तत्कृते ।
त्वां विनाप्याश्रयस्थानमस्त्यन्यद्यत्रकुत्र वा ॥ ७८ ॥
जलाधारा जलचरा बालकाः स्तन्यकांक्षिणः ।
तद्विना प्राणितुं योग्यमस्ति किं वान्यसाधनम् ॥ ७९ ॥
संकटे त्यज्य संकोचं पृच्छामि त्वां मनोगतम् ।
कृष्णोऽब्रवीदलं स्तुत्या यत्प्रष्टव्यं वदस्व तत् ॥ ८० ॥

एवमेतद्यथाऽऽत्थ त्वमात्मानं परमेश्वर ।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥ ३ ॥

तदाऽवदत्किरीटी च या वार्ता कथितात्वया ।
तत्प्रत्ययेनापि दृष्टिः शांताऽऽसीत्सर्वथा मम ॥ ८१ ॥
यत्संकल्पेन त्रैलोक्यं भूत्वा प्राप्नोति वा लयम् ।
स्थानतदपि मद्रूपमेवं वदसि यत्कचित् ॥ ८२ ॥
यतस्तन्मूलरूपं ते देवकार्यमिषेण हि ।
यस्माच्चतुर्भुजः किंवा भवसि द्विभुजः स्वतः ८३ ॥
क्षीराब्धौ शेषशायी सन्मत्स्यकूर्मादिरूपधृक् ।
कृत्वेष्टकार्यं च पुनर्यत्र तिष्ठसि संततम् ॥ ८४ ॥
यं गायंत्युपनिषदो हृदि ध्यायंति योगिनः ।
आलिंग्य सनकाद्या यं तिष्ठंत्यानंदपूरिताः ॥ ८५ ॥
यदगाधं चक्रपाणे विश्वरूपं तव श्रुतम् ।
तदालोचयितुं साक्षाद्दृग्भ्यां संत्वरते मनः ॥ ८६ ॥
निःसंकोचं यथा कृष्ण पृष्टा मद्वासना त्वया ।
इयमेका मम हृदि प्रबलेच्छाद्य वर्तते ॥ ८७ ॥
यत्साग्रं विश्वरूपं ते मम स्याद्दृष्टिगोचरम् ।
एवं चित्तेऽभवद्व्यासो जागरूको ह्यनारतम् ॥ ८८ ॥

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ।
योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ॥ ४ ॥

शार्ङ्गिन्नेकास्ति शंका मे विश्वरूपावलोकने ।
योग्यता विद्यते किंवा नास्तीति भगवन्मयि ॥ ८९ ॥
नाहं वेद्मि मदीयं तद्देव त्वं यदि पृच्छसि ।
किं वा रुग्णः स्वं निदानं वेत्ति रोगस्य कुत्रचित् ॥ ९० ॥
कार्यार्थीच्छाभरे वेत्ति न कश्चित्स्वीययोग्यताम् ।
यथा तृषार्तो न ब्रूते सिंधुवज्जलमप्यलम् ॥ ९१ ॥
एवमिच्छाभरेणाद्य चित्तं जातमनावरम् ।
तथापि बालकस्यार्तं माता जानाति तत्त्वतः ॥ ९२ ॥
जनार्दन तथा पूर्वमधिकारं निरीक्ष्य मे ।
दर्शनं विश्वरूपस्य मां कारय दयानिधे ॥ ९३ ॥
तथास्ति चेत्कुरु कृपां नो चेत्त्वं ब्रूहि नेत्यपि ।
पंचमालापजं सौख्यं बधिरः कथमाप्नुयात् ॥ ९४ ॥
न वृष्टिश्चातकार्थं हि यत्तर्पयति सा जगत् ।
सैव व्यर्था भवेद्वृष्टा प्रस्तरप्रायभूतले ॥ ९५ ॥
चंद्रामृतं चकोरोऽस्ति तत्र कोऽन्यान्निवारयेत् ।
यथा वा दृष्टिहीनस्य प्रकाशोऽपि वृथैव हि ॥ ९६ ॥
तस्मान्निश्चयतो विश्वरूपं दर्शयसीति माम् ।
सौम्यं वाप्युग्ररूपं वा त्वं हि दर्शयितुं क्षमः ॥ ९७ ॥
तवौदार्यं च सुमहन्न पात्रापात्रभावना ।
दानप्रसंगे वैरिभ्य: कैवल्यं प्रददासि च ॥ ९८ ॥
निश्चयाहुर्लभो मोक्षस्त्वत्पदाराधकोऽस्ति सः ।
आज्ञापयसि तं यत्र तत्र याति स दासवत् ॥ ९९ ॥
विषस्तनं पाययितुं प्राप्ता यद्यपि पूतना ।
सापि मोक्षपदं नीता यत्त्वया सनकादिवत् ॥ १०० ॥
राजसूये सभास्तारमंडितायां सदस्यपि ।
शतधा दुर्वचोभिस्त्वं शिशुपालेन दूनितः ॥ १०१ ॥
अपराध्यपि गोपाल स मोक्षं प्रापितस्त्वया ।
औत्तानपादिः किं पार्श्वं ध्रुवोऽचलपदं प्रति ॥ १०२ ॥

यः पैतृकपदप्राप्त्यै तपस्तप्तुं गतो वनम् ।
अच्युतं सूर्यचंद्राभ्यां तस्मै दत्तं पदं त्वया ॥ १०३ ॥
एवं विपत्तिग्रस्तानां दानशूरोऽसि माधव ।
नारायणोच्चारमात्रान्मोचितोऽजामिलस्त्वया ॥ १०४ ॥
पदा महर्षुर्विप्रस्य लक्ष्म वक्षस्थले धृतम् ।
शंखासुरशरीरोत्थो धृतः शंखस्त्वया करे ॥ १०५ ॥
अपकारिषूपकारी दाताऽपात्रेऽप्युदारराट् ।
दानं स्वीकृत्य जातोऽसि द्वारपालो बलेर्गृहे ॥ १०६ ॥
आजुहाव भवन्नाम्ना क्रीडार्थं पालितं शुकम् ।
सा वेश्यापि त्वया नीता वैकुंठभुवनं स्वकम् ॥ १०७ ॥
त्वमेवं क्षुद्रभक्तेभ्यो मोक्षं दत्से सुदुर्लभम् ।
मां कथं भिन्नभावेन स्वभक्तं स्थापयिष्यसि ॥ १०८ ॥
अहो आप्यायते यस्याः पयःपूरेण वै जगत् ।
तिष्ठंति किं कामधेनोस्तस्या वत्सा बुभुक्षिताः ॥ १०९ ॥
तस्मान्मत्प्रार्थितं रूपं मां न दर्शयसीति न ।
तज्ज्ञातुमथवा द्रष्टुं पात्रतां देह्यनुग्रहात् ॥ ११० ॥
विश्वरूपावलोकाय दृष्टिर्योग्या ममास्ति चेत् ।
तर्हि मद्वासनां देव कृपया पूरयैकदा ॥ १११ ॥
एवं पार्थस्य विज्ञप्तिं श्रुत्वाऽश्रुत्वापि तत्क्षणे ।
षड्गुणैश्वर्यसंपन्नो देवस्तत्प्रवणोऽभवत् ॥ ११२ ॥
शौरेः कृपामेघवृष्टौ पार्थो वर्षर्तुरागमत् ।
कृष्णोऽकूजत्कोकिलवद्वसंतस्तत्र चार्जुनः ॥ ११३ ॥
दर्शने पूर्णचंद्रस्य क्षीराब्धिः पूरितो भवेत् ।
तथा द्विगुणितप्रेम्णा चक्रपाणिर्भृतोऽभवत् ॥ ११४ ॥
ततः कृपावान्श्रीकृष्णः प्रेम्णोच्चैः संजगर्ज च ।
उवाच पार्थ रूपाणि ममालोकय नैकदाः ॥ ११५ ॥
पश्याम्येकं विश्वरूपमिति पार्थस्य कांक्षितम् ।
तथापि सर्वं कृष्णेन विश्वरूपमयं कृतम् ॥ ११६ ॥

महानुदारः श्रीकृष्णो भक्तेष्टं पूरयत्ययम् ।
स्वीयं ददाति सर्वस्वं सहस्रगुणितं स्वयम् ॥ ११७ ॥
न दर्शितं यच्छेषाय वेदेभ्योऽपि न दर्शितम् ।
प्रेयस्या अपि यल्लक्ष्म्या विश्वरूपं न दर्शितम् ॥ ११८ ॥
विविधैश्च प्रकारैस्तद्धरिः स्पष्टमदर्शयत् ।
धनुर्धरस्य सुमहद्भाग्यं तन्नात्र संशयः ॥ ११९ ॥
जागृतः प्रव्रजेत्स्वप्नं स स्यात्स्वप्नमयस्तदा ।
तथाऽनन्तस्तत्समयेऽभवद्ब्रह्माण्डरूपधृक् ॥ १२० ॥
नित्यमुद्रां ततस्त्यक्त्वा मुक्त्वा जवनिकावृतिम्[1] ।
किंवा स्वं योगसामर्थ्यं स्पष्टं प्रकटितं तदा ॥ १२१ ॥
तद्द्रष्टुं शक्नुयात्पार्थो नवेति न विचार्य च ।
तत्कालमुक्तवान्विश्वरूपं पाहीति पांडवम् ॥ १२२ ॥

श्रीभगवानुवाच ।

पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः ।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥ ५ ॥

एकं रूपं दर्शयेति त्वयोक्तं यत्तथा कृतौ ।
किं कृतं स्यादतः सर्वं दर्शयामि मदात्मकम् ॥ १२३ ॥
केचित्स्थूलाः कृशाः केचिद्विशाला लघवोऽपि हि ।
पृथवः सरलाः केचिदमर्यादाश्च केचन ॥ १२४ ॥
अनावराः प्रांजलाश्च सव्यापाराश्च निश्चलाः ।
उदासीनाः स्नेहवंतस्तीव्रशीलाश्च केचन ॥ १२५ ॥
घूर्णिताः सावधानाश्च गंभीराः शीघ्रकारिणः ।
उदाराः कृपणाश्चैव तामसा अपि केचन ॥ १२६ ॥
शांताः केचित्तथा मंदाः स्तब्धाश्चानंदसंयुताः ।
सशब्दाश्चापि निःशब्दाः सौम्यरूपाश्च केचन ॥ १२७ ॥

१ तिरस्करिण्या आवरणम् ।

साभिलाषा विरक्ताश्च जागृताः केऽपि निद्रिताः ।
सुखिनो दुःखिनश्चैव प्रसन्नाः केचिदर्जुन ॥ १२८ ॥
अशस्त्राश्च सशस्त्राश्च रौद्रा मित्राणि केचन ।
भयानका विचित्राश्च समाधिस्थास्तथा परे ॥ १२९ ॥
उत्पत्तिकर्मसंलुब्धाः केचित्स्नेहेन पालकाः ।
केचित्संहारकाश्चापि साक्षिभूताश्च केचन ॥ १३० ॥
एवं नानाविधाः सर्वे दिव्यतेजःप्रकाशिनः ।
विभिन्नवर्णाः संलेके विज्ञेया मत्स्वरूपवत् ॥ १३१ ॥
तप्तस्वर्णनिभाः केचिद्वर्णतः कपिलाः कति ।
केचित्सिंदूरवर्णाभाः संध्यारुणनिभास्तथा ॥ १३२ ॥
स्वभावसुंदराः केचित्सद्रत्नैः खचिता इव ।
केचित्कुंकुमवर्णाश्चाऽरुणोदयसमप्रभाः ॥ १३३ ॥
केचित्स्फटिकसंकाशा इंद्रनीलनिभाः क्वचित् ।
कृष्णवर्णाः कज्जलाभा रक्तवर्णाश्च केचन ॥ १३४ ॥
तप्तहेमसमाः पीता नीलमेघनिभाः कति ।
स्वर्णचंपकसंकाशा हरिताश्चापि केचन ॥ १३५ ॥
तप्तताम्रसमाः केचिच्चंद्राभा धवलाः कति ।
एवं बहुविधान्सर्वान्धनुर्धर विलोकय ॥ १३६ ॥
यथा सर्वे भिन्नवर्णा आकृत्या पृथगेव च ।
येषां सौंदर्यमालोच्य मदनः शरणं ययौ ॥ १३७ ॥
केचिच्च सुंदराकारास्तेजःपुंजा मनोहराः ।
श्रियोऽलंकारभांडारनिभाः संपद्भिभूषिताः ॥ १३८ ॥
सुपुष्टा मांसलाः केचिद्विकरालाः कृशाः कति ।
लंबकंठाः स्थिताः केचिद्दीर्घशीर्षा भयंकराः ॥ १३९ ॥
एवमाकृतयोऽनंता अपाराश्च दिदृक्षताम् ।
प्रत्येकावयवप्रांते पार्थ सर्वं जगद्गतम् ॥ १४० ॥

पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा ।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥ ६ ॥

मन्नेत्रोन्मीलनं यत्र स्युस्तत्रादित्यसूदयः।
इष्टेर्निमीलने देवा लयं यान्त्यखिला अपि ॥ १४१ ॥
मुखानिले समुद्भूते ज्वालामालाकुले ततः।
उत्पद्यंतेऽष्टवसवो ज्वालाभ्यः संघशोऽखिलाः ॥ १४२ ॥
कोपाविष्टे सति मयि भ्रूप्रांतैक्यं यदा भवेत्।
तदैकादशरुद्राणामुत्पद्यन्ते गणाः समम् ॥ १४३ ॥
उत्पद्यंतेऽश्विनौ देवाः शतशः सौम्यतेजसा।
वायवश्चापि जायंते श्रोत्रतोऽर्जुन नैकशः ॥ १४४ ॥
एकैकावयवात्तेषां सुरसिद्धकुलान्यपि।
भवंति सुविशालानि पश्य रूपाणि नैकशः ॥ १४५ ॥
यत्र मूकाः श्रुतिगणाः कालायुर्द्रष्टुमल्पकम्।
यस्यांतपारः कुत्रापि ब्रह्मणोऽपि न लभ्यते ॥ १४६ ॥
वेदत्रयेणाश्रुतानि पश्य रूपाण्यनेकशः।
आश्चर्यजनकान्यत्र कौतुकान्यवलोकय ॥ १४७ ॥

इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम्।
मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ॥ ७ ॥

मूर्तीनां रोमकूपेषु पश्य सृष्टिं तथाऽखिलाम्।
यथा कल्पद्रुच्छायायां समुत्पन्नास्तृणांकुराः ॥ १४८ ॥
यथा गवाक्षप्रकाशे दृश्यंते परमाणवः।
तथा संधिष्विंद्रियाणां ब्रह्मांडं परिवर्तते ॥ १४९ ॥
अत्रत्यैकप्रदेशेऽपि विश्वं पश्य सविस्तरम्।
ततः परं चेन्मनसि पश्येयमिति वासना ॥ १५० ॥
तथा तद्विलयेऽप्यत्र सर्वथा नैव संकटम्।
यदीप्सितं तत्सकलं मद्देहे पश्यसि स्वयम् ॥ १५१ ॥
एवं कारुण्यपूर्णेन यदोक्तं विश्वमूर्तिना।
तदाऽर्जुनोऽभवन्मूको दृष्टं वा नेति नोक्तवान् ॥ १५२ ॥
कथमेवमयं स्वस्थः कृष्णेनालोचितोऽर्जुनः।
तदापि पूर्ववद्विश्वरूपदर्शनलालसः ॥ १५३ ॥

न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥ ८ ॥

अस्योत्कंठा न शांताऽभूद्वृत्तिर्न सुखितापि च ।
दर्शितां विश्वसृष्टिं च नायं द्रष्टुं क्षमोऽभवत् ॥ १५४ ॥
इत्थं ज्ञात्वा हसन्देवः कौतुकादेवमुक्तवान् ।
दर्शितं ते विश्वरूपं परं त्वं तन्न पश्यसि ॥ १५५ ॥
तदाऽर्जुनोऽब्रवीद्देव कं प्रत्यूनं समागतम् ।
प्रयच्छसि बकायात्तुं त्वं किं चंद्रकरामृतम् ॥ १५६ ॥
कृत्वा निर्मलमादर्शं यथांधाय प्रदर्शयेत् ।
अथवोत्कृष्टगीतं किं योग्यं बधिरसंनिधौ ॥ १५७ ॥
किंवा कमलकिंजल्कं मंडूकोऽर्हति भक्षितुम् ।
अस्थाने तद्वृथाभूते शार्ङ्गिन् कुप्येत कं वद ॥ १५८ ॥
तथात्रातींद्रियज्ञानमालोच्यं ज्ञानचक्षुषा ।
तच्चर्मचक्षुषा देव पश्येयाहं कथं प्रभो ॥ १५९ ॥
तवैव न्यूनता सेति नोक्त्वा सोढव्यमेव तत् ।
श्रीकृष्णोऽप्यब्रवीत्पार्थ त्वदुक्तं मान्यमेव मे ॥ १६० ॥
विश्वरूपं दर्शयितुं शक्तिर्देया पुरैव ते ।
परं प्रेमभरादद्य संवादे विस्मृतोऽस्म्यहम् ॥ १६१ ॥
उप्ते ह्यकर्षितक्षेत्रे बीजं भवति तद्वृथा ।
तस्माद्द्रष्टुं विश्वरूपं दिव्यां दृष्टिं ददामि ते ॥ १६२ ॥
तया दृष्ट्वैश्वर्ययोगमखिलं विश्वविस्तृतम् ।
पश्यसि त्वमनायासात्स्वयं चानुभविष्यसि ॥ १६३ ॥
एवं वेदांतसंवेद्यः श्रीकृष्णोऽखिलवंदितः ।
आद्यस्थानः श्रीभगवानुक्तवानर्जुनं प्रति ॥ १६४ ॥

संजय उवाच ।

एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः ।
दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥ ९ ॥

संजयो धृतराष्ट्राय वक्ति चित्रं विभाति मे ।
कोऽस्ति लक्ष्म्याः सुदैवेनाऽधिको लोके विचारय ॥ १६५ ॥
वर्णितुं सूत्ररूपेण समर्थः कः श्रुतिं विना ।
शेषं विना वेत्ति को वा यः सम्यग्दास्यलक्षणम् ॥ १६६ ॥
को द्वितीयोऽस्ति वा लोके सेवको गरुडोपमः ।
भगवत्प्राप्तिलोभेन यः सेवां कुरुतेऽनिशम् ॥ १६७ ॥
किं ब्रवीम्यस्त्विदं दूरे, पांडवानां समुद्भवः ।
यद्दिनादभवत्तस्मादार्तं कृष्णसुखं हि तैः ॥ १६८ ॥
स्निग्धेषु तेष्वर्जुनेन कृष्णोऽत्यंतं वशीकृतः ।
यथा करोति हार्देन कामिनं कामिनी वशे ॥ १६९ ॥
न वक्ति पाठितः पक्षी न स्यादाज्ञानुगो मृगः ।
भाग्योदयोऽयं पार्थस्य यदभूद्भगवान्वशे ॥ १७० ॥
द्रष्टुं साक्षात्परंब्रह्म दत्ते पार्थाय चक्षुषी ।
अर्जुनोक्तं यत्किमपि कृष्णः पूरयति स्वयम् ॥ १७१ ॥
पार्थे क्रुद्धेऽपि यः शांतो रुष्टे संभावयत्यपि ।
अभूद्वशंवदस्तस्य तदाश्चर्यं विभाति मे ॥ १७२ ॥
गर्भतस्त्यागिनोऽभूवन्ख्यातिमंतः शुकादयः ।
तथापि सर्वे मोक्षार्थमस्तुवन्कृष्णमेव हि ॥ १७३ ॥
समाधौ योगिभिर्ध्येयः पार्थाधीनो बभूव यः ।
तद्विस्मितमभूद्राजन्धृतराष्ट्र मनो मम ॥ १७४ ॥
संजयः पुनरप्याह राजानं कोऽत्र विस्मयः ।
सानुकूले चक्रपाणावेवं भाग्योदयो भवेत् ॥ १७५ ॥
आस्तां तदाऽब्रवीद्देवो दिव्यदृष्टिं ददामि ते ।
यथा सांगं विश्वरूपं पश्यसि त्वं पृथासुत ॥ १७६ ॥
कृष्णाननादक्षराणि निःसृतानि ततः क्षणात् ।
ध्वस्तमज्ञानपटलमर्जुनस्य हृदि स्थितम् ॥ १७७ ॥
ज्ञानदेवः कथयति तानि नैवाक्षराणि हि ।
किंतु पार्थाय कृष्णेनोद्दीप्ता चिद्रूपदीपिका ॥ १७८ ॥

तद्दिव्यदृक्प्रकाशेन ज्ञानदृष्टिर्विकासिता ।
दर्शनं विश्वरूपस्य कृष्णेन प्रकटीकृतम् ॥ १७९ ॥

प्रभोः सर्वेऽवताराश्च तरंगा विश्ववारिधेः ।
यत्तेजःकिरणैः किंवा विश्वं मृगजलायितम् ॥ १८० ॥

अनादिभूमिकायां च चित्रीभूतं चराचरम् ।
दर्शयामास पार्थाय कौतुकाच्छ्रीहरिः स्वयम् ॥ १८१ ॥

पूर्वं मृद्भक्षणे बाल्ये तद्वयस्यैर्निवेदिते ।
यशोदा क्रोधसंयुक्ता त्वां दधार यदा करे ॥ १८२ ॥

तदा भीत इवात्यर्थं मुखं व्यादाय तत्पुरः ।
त्वयांतरे दर्शितानि भुवनानि चतुर्दश ॥ १८३ ॥

ध्रुवगल्ले मधुवने कंबुः स्पृष्टो यदा त्वया ।
स तदेशस्तवं चक्रे वेदातीतमनल्पधीः ॥ १८४ ॥

राजन् श्रीहरिणानल्पोऽनुग्रहो विहितो यदा ।
तदार्जुनोऽपि नाज्ञासीदविद्या क्व गतेति सः ॥ १८५ ॥

दृष्ट्वाऽकस्माद्दिव्यतेजश्चमत्कारकरं तदा ।
पार्थस्य मानसं मग्नमभवद्विस्मयेन हि ॥ १८६ ॥

प्रलयेंऽबुमये यद्वन्मार्कंडेयो विलुंठति ।
तथाऽलुठत्पंडुपुत्रो विश्वरूपकुतूहले ॥ १८७ ॥

महदासीद्यद्गगनं क्व च तद्विलयं गतम् ।
चराचराणि भूतानि क्वांतर्धानं गतानि च ॥ १८८ ॥

दृश्यंते न दिशां प्रांता नाधोर्ध्वमपि दृश्यते ।
स्वप्नाज्जागरवल्लुप्ता सृष्टिरासीत्तदाऽखिला ॥ १८९ ॥

सूर्ये प्रदीप्ते लुप्ताः स्युर्यथा वा चंद्रतारकाः ।
तथा विश्वस्वरूपेणाऽलुपत्सृष्टिस्तथाऽखिला ॥ १९० ॥

मनस्त्वं मनसो यातं प्रज्ञाऽस्वाधीनतां गता ।
अभूदिंद्रियवृत्तीनां तेजसामैक्यमंतरे ॥ १९१ ॥

समाधिं याता समाधिः स्वस्मिन्नेकाग्रता गता ।
भासते विज्ञानशक्तेर्मोहिनी सर्वथाऽप्रसत् ॥ १९२ ॥

एवमाश्चर्यचकितो भूत्वाऽपश्यदितस्ततः ।
तदा चतुर्बाहुरूपाण्यनंतान्यभवन्प्रभोः ॥ १९३ ॥
वर्षासु च यथा मेघाः प्रलयोत्थोऽर्क एव वा ।
तदाऽन्यत्तत्स्वरूपेभ्यः किमप्युर्वरितं न हि ॥ १९४ ॥
कृष्णस्वरूपमालोच्य पूर्वं शांतिमगात्स्वयम् ।
दृष्टिमुन्मील्य चापश्यद्विश्वरूपं तदाऽखिलम् ॥ १९५ ॥
आस्था याऽसीद्विश्वरूपं दृग्भ्यां पश्येय शार्ङ्गिणः ।
पार्थस्य पूरिता साऽद्य साक्षाद्भगवता स्वयम् ॥ १९६ ॥

अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥ १० ॥

रमेशाभुवनानीवाऽपश्यद्वक्त्राण्यनेकशः ।
लावण्यश्रीनिधानानि पांडवोऽपश्यदेकदा ॥ १९७ ॥
प्रफुल्लमानंदवनं सौंदर्यं प्राप राजताम् ।
अपश्यदेवं वक्त्राणि श्रीहरेः पांडवस्तदा ॥ १९८ ॥
तत्र प्रत्येकवदने सैन्यानि भयदान्यपि ।
कालरात्रेश्च सैन्यानि युद्धोद्युक्तानि दृष्टवान् ॥ १९९ ॥
तानि मृत्योर्मुखानीव भयदुर्गाण्यनेकशः ।
किंवोन्मुक्तानि कुंडानि प्रलयाग्नेरितस्ततः ॥ २०० ॥
भयानकान्यद्भुतानि सौम्यान्याश्चर्यवन्ति च ।
कियंति भूषायुक्तानि पार्थेनालोचितानि हि ॥ २०१ ॥
ज्ञानदृष्ट्याऽऽलोकनेऽपि मुखानां नांतमभ्यगात् ।
ततः कौतुकया दृष्ट्वा नेत्रे चालोकयत्तदा ॥ २०२ ॥
नैकवर्णानि फुल्लानि नेत्राब्जानि तदाऽर्जुनः ।
तानि प्रखरसूर्यादिनिभानीव व्यलोकयत् ॥ २०३ ॥
श्याममेघघटामध्येऽस्फुरद्विद्युन्निभानि च ।
अग्निवत्पीतनेत्राणि पार्थोऽपश्यद्भ्रुवोरधः ॥ २०४ ॥
तस्यैकस्मिन्नवयवे दृष्ट्वा पार्थो ह्यपूर्वताम् ।
उवाच विश्वरूपेऽस्मिन्दर्शयेयुः कुतुकान्यलम् ॥ २०५ ॥

अकल्पयन्मनस्येवं तद्धस्तौ मुकुटः क च।
सर्वांगदर्शनाकांक्षा पांडवस्याप्यवीवृधत् ॥ २०६ ॥
भाग्यवानस्ति पार्थोऽयं नास्य व्यर्था मनोरथाः।
किं शंकरस्य तूणीरे संति मोघाः शिलीमुखाः ॥ २०७ ॥
ब्रह्मणो वाचि मिथ्या किमक्षराणि वसंति हि।
यदेवं विश्वरूपस्य दर्शनं लब्धवानसौ ॥ २०८ ॥
वेदा विदुर्न यस्यांतं तत्सर्वेऽवयवाः कथम्।
एकदैव स्वनेत्राभ्यां पार्थोऽपश्यन्नु भाग्यतः ॥ २०९ ॥
चरणादिकिरीटांतं रत्नभूषणमंडितम्।
विश्वरूपं सुशोभाढ्यमपश्यत्पांडवस्तदा ॥ २१० ॥
धृतानि ब्रह्मणा ब्राह्मभूषणान्येव चेत्तदा।
तस्य शोभां वर्णयितुं मादृशः शक्नुयात्कथम् ॥ २११ ॥
प्रकाशस्तेजसा येन प्राप्यते चंद्रसूर्ययोः।
तदेव विद्यते तेजोऽखिलविश्वस्य जीवनम् ॥ २१२ ॥
अलंकृतं तु यत्तेन तद्द्रष्टुं कः क्षमो भवेत्।
ब्रह्मणाऽलंकृतं ब्रह्म द्रष्टुं पार्थः क्षमोऽभवत् ॥ २१३ ॥
सशस्त्रौ सरलौ हस्तावपश्यज्ज्ञानचक्षुषा।
शस्त्राणि प्रलयज्वालाछेदकानि ज्वलंत्यपि ॥ २१४ ॥
स्वयमंगमलंकारा हस्तौ शस्त्राण्यपि स्वयम्।
स्वयं जीवः शरीरं च सृष्टिर्ब्रह्मापि च स्वयम् ॥ २१५ ॥
प्रखरैः किरणैर्यस्य भानां लाजा भवन्ति हि।
तत्तापेनार्दितो वह्निः सागरं यातुमिच्छति ॥ २१६ ॥
महाविषं समुद्भूतं विजयस्योदितं वनम्।
उत्थापिताः सशस्त्राश्च दृष्टा हस्ताः सहस्रशः ॥ २१७ ॥

दिव्यमाल्यांबरधरं दिव्यगंधानुलेपनम्।
सर्वाश्चर्यमयं देवमनंतं विश्वतोमुखम् ॥ ११ ॥

व्यलोकयत्ततो दृष्ट्वा कंठं मुकुटमेव च।
ततश्च कल्पवृक्षाणां जातां सृष्टिं ददर्श सः ॥ २१८ ॥

महासिद्धेर्मूलपीठं लक्ष्मीः श्रांताऽभवद्यतः ।
पुष्पाण्याघ्रापयंतीव पार्थो रूपाणि दृष्टवान् ॥ २१९ ॥
पुष्पगुच्छांश्च मुकुटे प्रत्यंगं विधृतानपि ।
कंठे धृताः पुष्पमालाः सुगंधाढ्या अलौकिकाः ॥ २२० ॥
स्वर्गोऽर्कतेजसा दीप्तो मेरुर्वा स्वर्णदीपितः ।
तद्वत्पीतांबरो यस्य नितंबोपरि राजते ॥ २२१ ॥
कर्पूरलिप्तः शंभुर्वा कैलासः पारदोंभितः ।
नानाक्षीरोदकैः किंवा क्षीराब्धिरिव तर्पितः ॥ २२२ ॥
चंद्रवस्त्रं संप्रसार्य प्रावृतं गगनं यथा ।
एवं चंदनलिप्तांगमपश्यद्रूपमर्जुनः ॥ २२३ ॥
कांतिर्वृद्धिः प्रकाशस्यानंदतापोऽपि नश्यति ।
यत्सुगंधेन गंधस्य मोहकत्वं च वर्धते ॥ २२४ ॥
लिंपति ब्रह्म यस्यांगमनंगोऽगं बिभर्ति च ।
तस्य गंधस्य माहात्म्यं को वा वर्णयितुं क्षमः ॥ २२५ ॥
विलोक्य यस्य शृंगारं पार्थश्चित्ते मुमोह च ।
तिष्ठंतमुपविष्टं वा निद्रितं वेद नैव सः ॥ २२६ ॥
अपश्यदृष्टिमुन्मील्याऽखिलं विश्वस्वरूपकम् ।
अक्ष्णोर्निमीलनेऽप्येवं विश्वरूपं व्यलोकयत् ॥ २२७ ॥
दृष्ट्वा मुखान्यनेकानि पृष्टं तत्राऽकरोद्धिया ।
तत्रापि हस्तचरणमुखान्यासंस्तथैव हि ॥ २२८ ॥
आश्चर्यं पश्यतो विश्वरूपाण्यालोचयत्परम् ।
अपश्यतोऽपि दृश्यंते तदाश्चर्यमनीदृशम् ॥ २२९ ॥
दर्शनं चाऽदर्शनं च सशरीरमलूलुपत् ।
न पार्थस्य कृतिः सेयं किंतु तस्मिन्प्रभोः कृपा ॥ २३० ॥
मत्वाऽऽश्चर्यमहापूरे स यावन्नोत्थितस्ततः ।
तावत्पार्थोऽपतन्मोहान्महत्याश्चर्यसागरे ॥ २३१ ॥
दर्शनोत्कंठितायैवं दर्शयित्वा स्ववैभवम् ।

१ पारदेन उंभित =विलेपितः.

भगवान्विश्वरूपं तद्व्याप्नोच्च तदंतरे ॥ २३२ ॥
विश्वरूपं दर्शयेति प्रार्थितः सर्वतोमुखः ।
मुहुः पार्थेन तत्कालं विश्वरूप्यभवत्स्वयम् ॥ २३३ ॥
या दिव्यदृष्टिः पार्थाय दत्ता देवेन निस्तुला ।
तया सूर्यप्रकाशस्य दीपस्यापि न कारणम् ॥ २३४ ॥
निमीलितोन्मीलिता वा ध्वांतेऽप्यालोचनक्षमा ।
प्राहैवं धृतराष्ट्राय संजयो हस्तनापुरे ॥ २३५ ॥
राजन् किं वर्णयाम्यत्र नानालंकारभूषितम् ।
विश्वतश्चक्षुषं पार्थो विश्वरूपं ददर्श ह ॥ २३६ ॥

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ।
यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥ १२ ॥

विश्वरूपं कथमिति राजन्किं कथयामि ते ।
कल्पांते द्वादशादित्योदयतेजोधिकप्रभम् ॥ २३७ ॥
सहस्रावधयः सूर्या एकदैवोदिता यदि ।
तथापि न लभेयुस्ते तुलनां वैश्वतेजसः ॥ २३८ ॥
एकत्रिता विद्युतो वा जज्वाल प्रलयानलः ।
दशापि तेजसां तत्र प्रकारा मिलिता यदि ॥ २३९ ॥
तदाऽल्पांशेन तुलनां विश्वरूपस्य गच्छति ।
न याति पूर्णसादृश्यं तेजःस्तोमोऽपि सर्वथा ॥ २४० ॥
एवं यद्विश्वरूपस्य तेजः प्रकटितं तदा ।
तद्व्यासकृपया दृष्टं माहात्म्यं श्रीहरेर्मया ॥ २४१ ॥

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पांडवस्तदा ॥ १३ ॥

विश्वरूपस्यैकदेशेऽखिला सृष्टिरदृश्यत ।
सागरस्य जले यद्वद्बुद्बुदाः स्पष्टमुत्थिताः ॥ २४२ ॥

१ विश्वरूपप्रकाशस्य.

गंधर्वनगरं व्योम्नि पैपीलकमृदुच्छ्रयः ।
किंवा धूलिकणानां च मेरावावरणं यथा ॥ २४३ ॥
तथेदं विश्वमखिलं शार्ङ्गिणोऽगे व्यराजत ।
तस्मिन्नवसरेऽपश्यद्देवदेवस्य पांडवः ॥ २४४ ॥

ततः स विस्मयाविष्टो हृष्टरोमा धनंजयः ।
प्रणम्य शिरसा देवं कृतांजलिरभाषत ॥ १४ ॥

विश्वस्मादस्मि भिन्नोऽहमित्यासीद्द्वैतकल्पनम् ।
पार्थस्य लुप्तं तत्सर्वमैक्यमालोचयत्तदा ॥ २४५ ॥
आनंदितोऽभून्मनसि गात्राण्यासन्श्लथानि च ।
आपादमस्तकं तस्य रोमांचाः सहसोत्थिताः ॥ २४६ ॥
मेघवृष्टौ पर्वतस्य निरस्ते मलसंचये ।
तृणांकुराः प्ररोहंति तथा रोमोद्गमोऽभवत् ॥ २४७ ॥
चंद्रस्य किरणस्पर्शे द्रवतींदुमणिर्यथा ।
तथा पार्थस्य सर्वांगेऽप्यस्फुरन्घर्मबिंदवः ॥ २४८ ॥
भृंगो रुद्धः पद्मकोशे तेन साकं चलत्यपि ।
तद्वदंतःसुखेनापि पार्थदेहो व्यकंपत ॥ २४९ ॥
कर्पूरकदलीस्तंभादुत्पद्यंते यथा कणाः ।
तथैव पार्थनेत्राभ्यामगलन्नश्रुबिंदवः ॥ २५० ॥
सुधाकरोदये यद्वद्भृतोऽब्धिरपि वर्धते ।
तथा मुहुः पार्थचित्ते समुद्भूताः सुखोर्मयः ॥ २५१ ॥
तथाष्टौ सात्विका भावाश्चाहंपूर्विकयोत्थिताः ।
तेनोद्भूतं पार्थचित्ते ब्रह्मानंदसुखं मुदा ॥ २५२ ॥
ब्रह्मानंदेऽपि च द्वैतं दर्शनार्थं सुरक्षितम् ।
ततः श्वासं समुत्सृज्य स्वस्थः कृष्णं व्यलोकयत् ॥ २५३ ॥
यत्र कृष्णमुखं तत्र मूर्धानमवनाम्य च ।
अर्जुनोऽजलिमाबध्य प्रार्थनामकरोत्तदा ॥ २५४ ॥

---

१ पिपीलिकासंचितो मृद्राशिः. २ इंदुमणिश्चंद्रकांतः.

अर्जुन उवाच ।

पश्यामि देवांस्तव देव देहे
सर्वांस्तथा भूतविशेषसंघान् ।
ब्रह्माणमीशं कमलासनस्थ-
मृर्षींश्च सर्वानुरगांश्च दिव्यान् ॥ १५ ॥

प्रभो जय जय स्वामिन्ननुकंपा कृता मयि ।
यद्विश्वरूपं पश्येयं जीवः साधारणोऽप्यहम् ॥ २५५ ॥
महद्योपकृतं स्वामिंस्तेन तुष्टोऽस्मि सर्वथा ।
अस्याः सृष्टेस्त्वं कर्तासीत्येवं दृष्टं मयाऽधुना ॥ २५६ ॥
मंदराद्रौ यथा संति श्वापदानि ततस्ततः ।
एवं त्वदंगे दृश्यंते चंद्रेंद्रभुवनानि च ॥ २५७ ॥
देवाऽऽकाशेऽपि दृश्यंते सर्वे ग्रहगणा यथा ।
कोटराण्यंडजानां वा संति यद्वन्महाद्रुमे ॥ २५८ ॥
तथैव श्रीहरे स्वर्गो देवसंघसमावृतः ।
दृश्यते विश्वरूपेऽस्मिन्शरीरे परमाद्भुतः ॥ २५९ ॥
महाभूतानि पंचापि दृश्यंतेऽत्र समासतः ।
भूतग्रामान्भूतसृष्टेर्देहे पश्यामि ते विभो ॥ २६० ॥
सत्यलोकोऽस्ति ते देहे ब्रह्मदेवसमन्वितः ।
इतरत्रालोच्यमाने कैलासागोऽप्यदृश्यत ॥ २६१ ॥
त्वच्छरीरस्यैकदेशे पार्वत्याऽस्ति समं शिवः ।
आश्चर्यं त्वच्छरीरेऽस्मिन्स्वतस्त्वमपि दृश्यसे ॥ २६२ ॥
कुलं च कश्यपादीनां स्वरूपे दृश्यतेऽखिलम् ।
भुजंगैः सह पातालं देहेऽस्मिन्दृश्यते तव ॥ २६३ ॥
किं बहूक्त्या विश्वपते त्वदंगान्येव भित्तयः ।
कृताश्चाकृतयस्तासु भुवनानां चतुर्दश ॥ २६४ ॥

---

१ अगः पर्वतः.

भुवनस्थाश्च दृश्यंते लोकाश्चित्रेष्वनेकशः ।
एवं कृष्णास्ति त्वदीयमगाधत्वमलौकिकम् ॥ २६५ ॥

अनेकबाहूदरवक्त्रनेत्रं
पश्यामि त्वां सर्वतोऽनन्तरूपम् ।
नान्तं न मध्यं न पुनस्तवादिं
पश्यामि विश्वेश्वर विश्वरूपम् ॥ १६ ॥

दिव्यदृष्टिबलेनैव दृष्टं सर्वांगमद्य ते ।
तव बाहुद्वये दृष्टाः प्ररूढा गगनांकुराः ॥ २६६ ॥
तव देव कराः सर्वे सततं कार्यतत्पराः ।
कुर्वंतो व्यवहारांश्च जाता मदृष्टिगोचराः ॥ २६७ ॥
भांडाराणि यथा सृष्टेर्मायया्योद्घाटितानि हि ।
तथा तवोदराण्यत्र दृश्यंते देव सर्वतः ॥ २६८ ॥
सहस्रशीर्णोऽनंतानि मुखानि मम पश्यतः ।
भासंते ब्रह्मवृक्षाग्रे फलानीव मुखानि हि ॥ २६९ ॥
यथा मुखान्यनंतानि तथैव कमलापते ।
विश्वरूपे त्वदीयेऽस्मिन्दृश्यंते नेत्रपंक्तयः ॥ २७० ॥
किं बहूक्त्या स्वर्गभूमिपातालान्यखिला दिशः ।
दृश्यंते भेदरहिता विश्वरूपमया इव ॥ २७१ ॥
न दृश्यते त्वद्रहितमणुरेणुमितं स्थलम् ।
नावकाशोऽस्ति कुत्रापि सर्वं व्याप्तमिदं त्वया ॥ २७२ ॥
नानाऽपरिमितान्येवं भूतान्यासन् जगत्त्रये ।
सर्वाणि तानि व्याप्तानि श्रीहरे वर्म्मणि[1] त्वया ॥ २७३ ॥
एवं त्वं कुत आयातः कोपाविष्टोऽसि वा स्वयम् ।
का चोदरे त्वामवहत्क्रियास्थानं महच्च य ॥ २७४ ॥
कीदृग्वयः स्वरूपं वा परतश्च किमस्ति ते ।
किं वा त्वद्वाहनमिति द्रष्टुमैच्छमहं यदा ॥ २७५ ॥

---

१ वर्म शरीरम्.

तदा जातोऽसि सर्वेस्त्वं स्वाधिष्ठानं त्वमेव हि ।
तव नास्त्युद्भवस्थानं सिद्धोऽनादिरसि स्वतः ॥ २७६ ॥
न तिष्ठन्नोपविष्टस्त्वं नास्युच्चो वामनोऽपि न ।
अधश्चोर्ध्वं त्वमेवासि सदा वैकुंठनायक ॥ २७७ ॥
तव त्वत्सदृशं रूपं हरे त्वं त्वद्वृतं वयः ।
सर्वतः पृष्ठमुदरं भवतश्च भवानसि ॥ २७८ ॥
किंवाऽधिकं प्रवक्तव्यं तवानंत त्वमेव हि ।
निरंतरं पश्यतश्चाऽनुभवो ह्येवमेव मे ॥ २७९ ॥
सर्वपूर्णेऽपि रूपेऽस्मिन्यन्न्यूनं दृश्यते मम ।
आदिमध्यांतकालास्तु न च श्रीकृष्ण संति ते ॥ २८० ॥
सर्वत्र मार्गितेऽप्येषां नैव शुद्धिरुपागता ।
अतस्त्वां वच्म्यसंदेहमादिमध्यांतवर्जितम् ॥ २८१ ॥
आदिमध्यांतरहित जगदीशाऽसित प्रभो ।
एवंप्रकारं ते विश्वरूपं दृष्टं मयाऽधुना ॥ २८२ ॥
भवतोऽस्मिन्विश्वरूपे पृथग्विविधमूर्तयः ।
किंतु तान्येव वासांसि वेष्टितानि ह्यनेकशः ॥ २८३ ॥
किंवोत्था विश्वरूपाऽगे[२] वृक्षा वल्ल्योऽपि मूर्तयः ।
पुष्पैः फलैश्चालंकारान्विदधत्योऽपि नैकशः ॥ २८४ ॥
श्रीकृष्ण त्वं सागरोऽसि तरंगास्तव मूर्तयः ।
किंवा त्वमेको वृक्षोऽसि मूर्तयस्तत्फलानि ते ॥ २८५ ॥
वस्तुमात्रे भृता भूमिर्व्योम्नि नक्षत्रविस्तरः ।
तद्वन्मूर्तिमयं तेऽद्य रूपं पश्यामि सर्वतः ॥ २८६ ॥
तत्र च प्रतिमूर्त्यंगे त्रिलोक्युत्पद्य नश्यति ।
त्वद्देहे मूर्तयश्चैवं दृश्यंते रोमरोमसु ॥ २८७ ॥
एवं विश्वप्रसारस्य कर्ता त्वं कोऽसि कस्य वा ।
परं विचारे त्वं भासि पांडवानां तु सारथिः ॥ २८८ ॥

त्वद्वृतं=त्वत्संबंधि. २ अंगे पर्वते.

मुकुंद भाति मामेवं व्यापकस्त्वं निरंतरम् ।
सगुणं रूपमास्थाय भक्तांस्त्रससि संकटात् ॥ २८९ ॥
दृष्ट्वा चतुर्भुजां मूर्ति तुष्यंत्यस्मिन्मनांसि च ।
सौभाग्यामपि हस्ताभ्यां भवत्यालिंगितुं क्षमा ॥ २९० ॥
स्वभक्तेषु कृपां कर्तुं धत्से सगुणरूपकम् ।
तदाऽस्माकं व्यापकोऽपि सामान्य इव दृश्यसे ॥ २९१ ॥
अद्य दृष्टिभ्रमो यातो दिव्यदृष्टिः कृतोऽस्म्यहम् ।
अतोऽभवत्त्वन्महिमा सहजं दृष्टिगोचरः ॥ २९२ ॥
मकरास्यधुरः पश्चादासीस्त्वं यो रथे मम ।
स एव ब्रह्मांडरूपोऽसीति ज्ञातं मयाऽधुना ॥ २९३ ॥

किरीटिनं गदिनं चक्रिणं च
तेजोराशिं सर्वतो दीप्तिमंतम् ।
पश्यामि त्वां दुर्निरीक्ष्यं समंता-
द्दीप्तानलार्कद्युतिमप्रमेयम् ॥ १७ ॥

यो धृतो मुकुटः पूर्वं स क्वास्ति हरेऽधुना ।
परं तेजोविशेषोऽस्य जातश्चित्रं विभाति मे ॥ २९४ ॥
चक्रमासीदूर्ध्वहस्ते तदेवेदं रमापते ।
तदेव विश्वरूपेऽस्मिन्भ्रामयन्त्यतिवेगतः ॥ २९५ ॥
गदापि सैवान्यकरे निःशस्त्रौ चाप्यधःकरौ ।
अश्वरश्मिप्रतोदाढ्यौ भातः पूर्ववदेव माम् ॥ २९६ ॥
विश्वरूपालोचनोत्थं ज्ञात्वा मम मनोरथम् ।
धृतं पूरयितुं विश्वरूपं वेद्मि त्वयाऽधुना ॥ २९७ ॥
तस्यापि कौतुकं ज्ञातुमस्ति मां नैव योग्यता ।
अतोऽनंत ममात्यर्थमाश्चर्यं भासते मुहुः ॥ २९८ ॥
विश्वरूपं चास्ति नास्तीत्यपि वक्तुं न शक्यते ।
व्याप्तास्ति सर्वतोऽप्यंगकांतिर्जगति सोज्ज्वला ॥ २९९ ॥

---

१ हां=चतुर्भुजा मूर्तिः.

यत्राऽग्नितेजोऽपि ध्वस्तमिंद्रगोपायितो रविः ।
एवं विलक्षणं तेजो विश्वरूपे धृतं त्वया ॥ ३०० ॥
महातेजःसागरेऽस्मिन्सृष्टिराभाति मज्जिता ।
कल्पांतविद्युद्भिरिवाच्छादितं गगनं यथा ॥ ३०१ ॥
छित्वा ज्वालास्तु कल्पाग्नेर्गगने मंडपः कृतः ।
भवदीयं तथा तेजो दृग्भ्यां द्रष्टुं न शक्यते ॥ ३०२ ॥
तव दृष्ट्वोज्ज्वलं तेजः शरीरं दहतीव मे ।
पश्यतो विश्वरूपं च दिव्या दृष्टिस्त्रसत्यपि ॥ ३०३ ॥
कालाग्निरुद्रे यो गूढो महाप्रलयहव्यवाट् ।
तस्य तृतीयनेत्रस्य कलिकाऽद्य विकासिता ॥ ३०४ ॥
विश्वरूपप्रकाशेन पंचाग्न्यर्चिर्भिरेव च ।
अद्य ब्रह्मकटाहस्य शकलानि भवंति हि ॥ ३०५ ॥
एवमत्यद्भुतं रूपं दृष्टं नैवेह जन्मनि ।
व्याप्तेरंतो न कांतेश्च भगवन्विद्यते तव ॥ ३०६ ॥

त्वमक्षरं परमं वेदितव्यं
त्वमस्य विश्वस्य परं निधानम् ।
त्वमव्ययः शाश्वतधर्मगोप्ता
सनातनस्त्वं पुरुषो मतो मे ॥ १८ ॥

त्वमक्षरोऽसि श्रीकृष्ण तथैव प्रणवात्परः ।
श्रुतयो मृगयंति त्वां त्वत्स्थानं नानुवंति ताः ॥ ३०७ ॥
आकारमूलस्थानं त्वं निधानं संग्रहस्य च ।
अव्ययश्चाऽविनाशी च गहनोऽसि च सर्वतः ॥ ३०८ ॥
धर्मस्य जीवनमसि सिद्धोऽनादिश्च नूतनः ।
षट्त्रिंशत्तत्त्वभिन्नश्च सप्तत्रिंशोऽसि पूरुषः ॥ ३०९ ॥

अनादिमध्यांतमनंतवीर्य-
मनंतबाहुं शशिसूर्यनेत्रम् । ..

पश्यामि त्वां दीप्तहुताशवक्त्रं
स्वतेजसा विश्वमिदं तपंतम् ॥ १९ ॥

आदिमध्यांतरहितोऽनंतोऽसि स्वीयशक्तितः ।
विश्वस्याऽगणिता हस्तास्त्वमेव चरणा अपि ॥ ३१० ॥
भवन्नेत्रे चंद्रसूर्यौ रुद्ररूपे दर्शयिष्यतः ।
शासनं कोपदृष्ट्या ते कृपादृष्ट्या च पालनम् ॥ ३११ ॥
एवंविधोऽत्र देवेश सत्यं मां दृश्यसे प्रभो ।
आननं दृश्यते तद्वत्प्रज्वलत्प्रलयाग्निवत् ॥ ३१२ ॥
दावानलप्रदीप्तेऽद्रौ ज्वालाः स्युस्तत्र नैकशः ।
दंष्ट्रा लिहति जिह्वापि त्वदीया दृश्यते मम ॥ ३१३ ॥
भगवंस्त्वन्मुखस्थौष्ण्यं तेजः सर्वांगसंभवम् ।
यत्तापयति तेनाद्य विश्वस्य प्रलयो भवेत् ॥ ३१४ ॥

द्यावापृथिव्योरिदमंतरं हि
व्याप्तं त्वयैकेन दिशश्च सर्वाः ।
दृष्ट्वाऽद्भुतं रूपमुग्रं तवेदं
लोकत्रयं प्रव्यथितं महात्मन् ॥ २० ॥

तथा स्वर्गश्च पातालं पृथिवी चांतरालकम् ।
किंवा दशदिशः सर्वा दिक्चक्रं च समाकुलम् ॥ ३१५ ॥
व्याप्तमेकेन रूपेण दृष्ट्वाऽऽसं चकितो भयात् ।
बिभाति वोम्ररूपेऽस्मिन्साकाशं ब्रुडतीव च ॥ ३१६ ॥
रूपप्रवाहे मज्जंति भुवनानि चतुर्दश ।
एवं तवाद्भुतं रूपं द्रष्टुं शक्नोम्यहं कथम् ॥ ३१७ ॥
न ज्ञायते तव व्याप्तिरुग्रं तेजो न सह्यते ।
सुखं दूरेऽस्ति जगतः कृच्छ्रात्प्राणंति देहिनः ॥ ३१८ ॥
दृष्ट्वाद्भुतमिदं रूपं भीतेरद्य भरोऽजनि ।
अद्य देव त्रिभुवनं दुःखसिंधौ निमज्जति ॥ ३१९ ॥

महतां दर्शने किंवा भयदुःखोद्भवो भवेत् ।
परं न मे समाधानं विश्वरूपेण जायते ॥ ३२० ॥
यावद्दृष्टं न ते रूपं तावत्सा संसृतिः शुभा ।
त्वद्दर्शनेऽशुभा भाति त्रस्तं च विषयेषु हृत् ॥ ३२१ ॥
देव त्वद्दर्शनं जातं दयामालिंगनं कथम् ।
न दत्तं चेच्छोकमग्नः कथं तिष्ठाम्यनुक्षणम् ॥ ३२२ ॥
पश्चाद्गतौ तु संसारोऽनिवारः पीडयिष्यति ।
पुरो गतौ विश्वरूपं द्रष्टुं शक्नोमि नैव ते ॥ ३२३ ॥
द्विधाऽत्र संकटे प्राप्ते त्रिलोकी क्षुभ्यति स्वयम् ।
प्रसंगो भगवन्नेवं दृश्यते मत्पुरः स्थितः ॥ ३२४ ॥
यथाऽग्निलुपितो मर्त्यः शांत्यै सिंधुं प्रधावति ।
बिभेति चाधिकं तत्र प्रचंडलहरीक्षणात् ॥ ३२५ ॥
दशैवं जगतः प्राप्ता त्वां दृष्ट्वाऽतिभयंकरम् ।
इतः परं ज्ञानिनां च संघाः सर्वे वसंति हि ॥ ३२६ ॥

अमी हि त्वां सुरसंघा विशंति
केचिद्भीताः प्रांजलयो गृणंति ।
स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः
स्तुवंति त्वां स्तुतिभिः पुष्कलाभिः ॥ २१ ॥

त्वदंगतेजसा कर्मबीजानि प्रज्वलंति हि ।
ये सद्भावेन सहजं त्वद्रूपे संति मीलिताः ॥ ३२७ ॥
दर्शनात्सांप्रतं केचिदत्यंतं ये भयार्दिताः ।
ते नमंत्यंजलिं बध्वा प्रार्थयंति, स्तुवंति च ॥ ३२८ ॥
अज्ञानाब्धौ वयं मग्ना गुंफिता विषयोदके ।
स्वर्गे संसारसौख्ये च द्विधा मोहेन गुंठिताः ॥ ३२९ ॥
देवाऽस्मान्मोचयेत्को वा त्वां विना भवसागरात् ।
अतस्त्वां जीवभावेन दयालो शरणागताः ॥ ३३० ॥

तथा महर्षयः सिद्धा विद्याध्रा देवगायनाः ।
स्वस्तिवादेन भवतः कुर्वंति स्तवनं मुदा ॥ ३३१ ॥

रुद्रादित्या वसवो ये च साध्या
विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ।
गंधर्वयक्षासुरसिद्धसंघा
वीक्षंते त्वां विस्मिताश्चैव सर्वे ॥ २२ ॥

इमे रुद्रा[1] द्वादशार्काः साध्याश्च वसवः सुराः ।
अश्विनौ[2] वायवश्चैव विभवाद्या मरुद्गणाः ॥ ३३२ ॥
पितरश्चैव गंधर्वा यक्षा रक्षोगणा अपि ।
इंद्राद्याः प्रमुखा देवास्तथा सिद्धादयोऽपि च ॥ ३३३ ॥
स्वस्वलोकादिमे सर्वे विश्वरूपदिदृक्षवः ।
आगताः संति तान्सर्वान्भगवन्नवलोकय ॥ ३३४ ॥
प्रतिक्षणं च पश्यंतो मनस्यत्यंतविस्मिताः ।
भावेन त्वच्चरणयोर्मूर्धानं नमयंति भोः ॥ ३३५ ॥
उच्चैर्जयजयारावात्स्वर्गमुद्घोषयंति च ।
ललाटेऽञ्जलिमावध्य नमनार्थं स्थितास्तव ॥ ३३६ ॥
त्वद्विनीतवृक्षवने वसंतः प्रेमभक्तितः ।
वद्धहस्तैः पल्लवितान्फलरूपेण लभ्यसे ॥ ३३७ ॥

रूपं महत्ते बहुवक्त्रनेत्रं
महाबाहो बहुबाहूरुपादम् ।
बहूदरं बहुदंष्ट्राकरालं
दृष्ट्वा लोकाः प्रव्यथितास्तथाहम् ॥ २३ ॥

भगवन्विश्वरूपं ते जनानां पश्यतां तव ।
भाग्योदयो दृशोर्जातश्चित्ते सौख्योदयोऽभवत् ॥ ३३८ ॥

---

१ एकादश रुद्राः. २ अश्वनौऽश्वौ.

त्रैलोक्यव्यापकं रूपं दृष्ट्वा विभ्यति निर्जराः ।
मुखेऽपवर्तिते क्वापि दृश्यते संमुखं हि तत् ॥ ३३९ ॥
विकराले स्वरूपेऽस्मिन्मुखनेत्राण्यनेकशः ।
सशस्त्राश्चानंतहस्ताः संति, रूपे तथैकले ॥ ३४० ॥
अनंता बाहवः पादा वर्णाश्चाप्युदराणि च ।
दृश्यते मुखमेकैकं सावेशं च भयंकरम् ॥ ३४१ ॥
यथा कल्पांतसमये क्षुब्धो भूत्वा यमः स्वयम् ।
ज्वालाभिर्दीपयत्यग्निर्दीप्ताभिर्दिशो दश ॥ ३४२ ॥
शंभोः संहारयंत्राणि क्षेत्राणि भैरवस्य वा ।
संहारदेवीपात्राणि प्रलयार्थोद्यतानि हि ॥ ३४३ ॥
तथैवेतस्ततो विष्वक्संदृश्यंते मुखानि ते ।
दर्याममांतः सिंहस्य दंष्ट्रा भांति विनिःसृताः ॥ ३४४ ॥
कालरात्रेरंधकारे भूतानीव भ्रमंति हि ।
तथा प्रलयरक्ताभा दंष्ट्राः संति भयंकराः ॥ ३४५ ॥
कालेन युद्धमाहूतं प्रलये मरणं यथा ।
भयंकरं च भवतो वदने दृश्यतेऽखिलम् ॥ ३४६ ॥
दीनेवेयं लोकसृष्टिः क्षणमालोचिता यदि ।
भासते दुःखकालिंद्यास्तटे द्रुरिव निश्चला ॥ ३४७ ॥
नौस्त्रिलोकीजीवितस्य पतिता मृत्युसागरे ।
शोकवातेरिता देव भ्रमत्यावर्तगा यथा ॥ ३४८ ॥
यदि क्रोधेन मां ब्रूपे 'लोकदुःखेन किं तव ।
दृष्टस्य विश्वरूपस्य त्वं सुखं ध्यानमाचर' ॥ ३४९ ॥

एवं ब्रवीषि यदि देव तथापि सत्यं
संप्रार्थयामि नहि केवललोकभीत्या ।
भीतोऽहमेव तव रूपविलोकनेन
प्राणा व्रजंति भयकंपयुता मदीयाः ॥ ३५० ॥
मां कंपते प्रलयरुद्रसमोऽपि देवो
मृत्युर्निलीन इव तिष्ठति मद्भयेन ।

भीतोऽहमद्य भवदीयकरालरूपं
दृष्ट्वा, दशैवमधुना विहिता त्वया मे ॥ ३५१ ॥
अस्यैव नाम वपुषो यदि विश्वरूपं
भीतेर्भयप्रदमिदं नु कथं विभाति ।
लोकक्षयार्थमुदितेव विषूचिकेयं
मां दृश्यतेऽतिभयदा भवतो विभूतिः ॥ ३५२ ॥

नभःस्पृशं दीप्तमनेकवर्णं
व्यात्ताननं दीप्तविशालनेत्रम् ।
दृष्ट्वा हि त्वां प्रव्यथितांतरात्मा
धृतिं न विंदामि शमं च विष्णो ॥ २४ ॥

कति क्रुद्धान्याननानि महाकालं जयंति हि ।
यैः स्ववैपुल्यतो व्योम्नः प्रापितं चास्ति लाघवम् ॥ ३५३ ॥
नैवाघूर्णंति नियता मिलोन्यस्याऽऽकलयंति च ।
येषां प्रज्वलिता ज्वालाः सुष्ठुंत्यग्निमपि द्रुतम् ॥ ३५४ ॥
नहोकसदृशं चान्यद्भिन्नवर्णानि नैकशः ।
प्रलये साह्यमेतेषां गृह्णात्यग्निर्जगत्क्षये ॥ ३५५ ॥
त्रैलोक्यभसङ्गेषामंगतेजो विदीप्यते ।
तेषां मुखेषु दृश्यंते दंता दंष्ट्रा यथायथम् ॥ ३५६ ॥
जातो वायोर्धनुर्वातः पूरेऽब्धिर्बुडितः स्वयम् ।
वडवाग्निं मारयितुं विषाग्निर्वाऽयमुत्थितः ॥ ३५७ ॥
अश्नात्यग्निः कालकूटं मरणं याति वा मृतिम् ।
संहारतेजोवदनं दृश्यते भीतिदं तथा ॥ ३५८ ॥
महांति पश्याननानि ह्यंतरालं त्रुटत्यपि ।
यथाऽऽकाशं निमिषैव गच्छेद्दूर्ध्वं क्वचिन्महत् ॥ ३५९ ॥
किंवा कसीरूत्य मुखं हिरण्याक्षोऽतलं गतः ।
पातालस्थभैरवेण द्वारमुद्घाटितं तदा ॥ ३६० ॥

विकासितेष्वाननेषु जीहा लोलंत्यभीक्ष्णशः ।
विश्वमेकग्रासमितं न स्यादिति ग्रसंति न ॥ ३६१ ॥
पातालव्यालफूत्कारैर्ज्वालाभिर्ग्रसतेंऽबरम् ।
प्रसृतास्वाननगुहास्वपि जिह्वा विभांति हि ॥ ३६२ ॥
प्रलये विद्युदैक्येन यथा शृंगारितं वियत् ।
तद्वदोष्ठाद्बहिर्यांति दंष्ट्राणां कीलकास्तव ॥ ३६३ ॥
ललाटे गूढनेत्राणि जनयंति मिथो भयम् ।
मृत्युप्रवाहे ध्वांताढ्ये संति गुप्तस्थलेषु च ॥ ३६४ ॥
एवं भयं वर्धयित्वा त्वं कमर्दितुमिच्छसि ।
तथापि मां समुत्पन्नं तेन मृत्युकरं भयम् ॥ ३६५ ॥
विश्वरूपदिदृक्षायाः प्राप्तं प्रतिफलं मया ।
दृष्ट्वा विश्वस्वरूपं त्वां साफल्यं चक्षुषोरभूत् ॥ ३६६ ॥
नश्वरः पार्थिवो देहः प्राप्ते काले स गच्छति ।
आस्तां तत्रापि चैतन्यमित्येवं भावयेऽधुना ॥ ३६७ ॥
शरीरं कंपते भीत्या मनः संतप्यति क्षणम् ।
अभिमानः स्वयं लुप्तो बुद्धिरासीद्भयार्दिता ॥ ३६८ ॥
यः सर्वेभ्यः पृथग्भूतः केवलानंदमूर्तिमान् ।
एतादृशस्यात्मनोऽपि कंपः प्रादुर्बभूवह ॥ ३६९ ॥
कथं न्विदं दर्शनं ते बोधो देशांतरे गतः ।
इतःपरं कथं तिष्ठेत्संबंधो गुरुशिष्ययोः ॥ ३७० ॥
देव त्वद्दर्शने जाते मानसं जातमाकुलम् ।
तदावरीतुं धैर्येण प्रयत्नं करवाण्यहम् ॥ ३७१ ॥
पूर्वं मे गलितं धैर्यं ततोऽभूद्रूपदर्शनम् ।
उपदेशमिषेणात्र संभ्रमे पातितोऽस्म्यहम् ॥ ३७२ ॥
मम जीवो विश्रमार्थं धावतीतस्ततः प्रभो ।
नाश्रयं लभते क्वापि स्वात्मनोऽनुभवात्मकम् ॥ ३७३ ॥
सृष्टिजीवहरी जाता विश्वरूपविषूचिका ।
यदीदानीं नार्थयेयं जीवनं स्यात्तदा कथम् ॥ ३७४ ॥

दंष्ट्राकरालानि च ते मुखानि
दृष्ट्वैव कालानलसंनिभानि ।
दिशो न जाने न लभे च शर्म
प्रसीद देवेश जगन्निवास ॥ २५ ॥

स्फुटितं मद्दृशोरग्रे यद्ब्रह्माण्डं भयात्मकम् ।
तद्वत्क्रूराण्याननानि दृश्यंते ग्रसृतानि माम् ॥ ३७५ ॥
दंतानां दंष्ट्रयोरोष्ठौ प्रावरीतुं नहि क्षमौ ।
तथा प्रलयशस्त्राणां दृश्यते कंटकावृतिः ॥ ३७६ ॥
तक्षकाय भृतं क्ष्वेडं भूतार्ता कालरात्र्यपि ।
आग्नेयास्त्रं तेजितं वा संहारप्रलयाग्निना ॥ ३७७ ॥
तथा मुखानि ते संति येभ्यश्चावेशसंभवः ।
आयाताश्चासदुपरि पूरा मृत्युजलस्य च ॥ ३७८ ॥
कल्पांतचंडानलायाऽमिलज्झंझानिलः पुनः ।
एवं चोभयसंयोगे कस्य भस्म न जायते ॥ ३७९ ॥
ते भीतिदान्याननानि दृष्ट्वा धैर्यं गतं मम ।
दिशोऽपि विस्मृताः सर्वा जाता स्वस्यापि विस्मृतिः ॥३८०॥
क्षणं दृष्टं विश्वरूपं तेन सौख्यं लयं गतम् ।
विकरालमिदं रूपं श्रीहरे कृपयाऽऽवृणु ॥ ३८१ ॥
करोष्येवमिति ज्ञाने प्रश्नं नाऽकरवं तदा ।
येनकेनाप्युपायेन रक्ष मां प्रलयानलात् ॥ ३८२ ॥
हरेऽस्माकं भवान्स्वामी रूपमावृणु दुःखदम् ।
महामारीप्रसारं त्वमपसारय दूरतः ॥ ३८३ ॥
देवानामपि देवोऽसि सर्वविश्वाश्रयोऽपि च ।
विस्मृत्य रक्षणं किंतु संहारयसि सर्वतः ॥ ३८४ ॥
प्रसन्नो भव देवेश स्वीयां मायां निवारय ।
साध्वसं दूरतः कृत्वा तत्रासान्मोचयस्व माम् ॥ ३८५ ॥
मुहुरेतावदेतं त्वां नम्रः सन्प्रार्थयामि च ।

दर्शनाद्विश्वरूपस्य भयग्रस्तोऽसि सर्वथा ॥ ३८६ ॥
संकटं त्वमरावत्या मयैकेनापहारितम् ।
यद्वा कालमुखे गंतुं न भीतोऽसि कदाचन ॥ ३८७ ॥
तथा नैतद्विश्वरूपं मृत्योरपि भयंकरम् ।
ग्रस्तुं विश्वं सहासाभिर्धृतं रूपं प्रभो त्वया ॥ ३८८ ॥
नाद्य प्रलयवेलास्ति त्राता जातोऽसि कालवत् ।
तेन त्रैलोक्यगोलोऽयमल्पायुरभवत्प्रभो ॥ ३८९ ॥
पश्येदं दैवदौर्भाग्यं शांतीच्छो विघ्नमागतम् ।
त्रुटितं वा स्वयं विश्वं त्वया वा ग्रस्यतेऽखिलम् ॥ ३९० ॥
विवृत्यानंताननानि सर्वा सेनामितस्ततः ।
त्वमेवात्सीति वेगेन प्रत्यक्षं दृश्यते हरे ॥ ३९१ ॥

अमी हि त्वां धृतराष्ट्रस्य पुत्राः
सर्वे सहैवावनिपालसंघैः ।
भीष्मो द्रोणः सूतपुत्रस्तथाऽसौ
सहाऽस्मदीयैरपि योधमुख्यैः ॥ २६ ॥

कुरुवंशोद्भवा वीरा धृतराष्ट्रकुमारकाः ।
सर्वे सपरिवाराश्च पतंति भवतो मुखे ॥ ३९२ ॥
तथा ये देशदेशेभ्यो नृपा योद्धुमुपस्थिताः ।
तेषां वृत्तं कथयितुं नावशिष्टोऽस्ति कश्चन ॥ ३९३ ॥
युद्धसाहित्यसहितान्मदोन्मत्तगजानपि ।
विस्तीर्णेन मुखेनाद्य खादस्यविरतं हरे ॥ ३९४ ॥
वर्षतोऽपि च नाराचानावेशेन पदातयः ।
प्रविश्य त्वन्मुखे सर्वे विनश्यंति महाजवात् ॥ ३९५ ॥
यदेकमपि संहर्तुं समर्थं जगदायुधम् ।
ग्रसस्येवं कोटिशस्त्वमायुधानि मुखेन च ॥ ३९६ ॥
सेनां समुदितामत्र युद्धार्थं चतुरंगिणीम् ।
विना दंतैर्भक्षयित्वा देव किं परितुष्यसि ॥ ३९७ ॥

सत्यशौर्यनिधिर्भीष्मः श्रीहरे भक्षितस्त्वया ।
तथा वीराग्रणीर्द्रोणो भक्षितो ब्राह्मणः कथम् ॥ ३९८ ॥
देवायं सूर्यतनयः कर्णवीरोऽपि भक्षितः ।
तेन चिंता गताऽस्माकं सर्वेषामपि दूरतः ॥ ३९९ ॥
देव ह्याऽनुग्रहस्येयं दुर्दशोपनता कथम् ।
प्रार्थ्याऽऽनीतं मयैवेदं जनानां मरणं ध्रुवम् ॥ ४०० ॥
यत्स्वल्पाधिकभुक्ताभिस्तृप्तिर्नासीद्विभूतिभिः ।
असमाहितभावेन पृष्टो देवः पुनर्मया ॥ ४०१ ॥
भवितव्यं भवत्येव बुद्धिस्तदनुसारिणी ।
जगत्याशाऽयशो भालगतं नश्येत्कथं नु मे ॥ ४०२ ॥
क्षीराब्धेरमृतं लब्धं तेनाऽऽतृप्तैः सुरासुरैः ।
पुनर्यत्ने कृते कालकूटं लब्धं मृतिप्रदम् ॥ ४०३ ॥
अपकारोऽपि स लघुरासीदिति विभाव्यते ।
संकटं यत्तदा प्राप्तं तच्छिवेन निवारितम् ॥ ४०४ ॥
शमयेत्को ज्वलद्वातं कः पिबेत्सविषं वियत् ।
महाकालेन वा साकं क्रीडितुं कः क्षमो भवेत् ॥ ४०५ ॥
एवं पार्थो दुःखमग्नो हृदि शोकं चकार ह ।
परं प्रसंगे देवस्य स नोद्देशमबूबुधत् ॥ ४०६ ॥
हंताऽहं कौरवा घात्या इत्येवं यो भ्रमोऽजनि ।
तन्नाशार्थमनंतेन विश्वरूपं प्रदर्शितम् ॥ ४०७ ॥
न मारयति कं कोऽपि सर्वसंहारकोऽस्म्यहम् ।
व्यक्तीकर्तुमिदं तत्त्वं रूपं प्राचीकटद्धरिः ॥ ४०८ ॥
तदज्ञात्वैव पार्थाय व्यग्रतात्यंतमाविशत् ।
असंतमपि यः कंपमर्जुनोऽतरवर्धयत् ॥ ४०९ ॥

वक्त्राणि ते त्वरमाणा विशंति
दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनांतरेषु
संदृश्यंते चूर्णितैरुत्तमांगैः ॥ २७ ॥

पार्थोऽब्रवीदेकदैव सासिवर्मोभयोर्दलम् ।
तवानने लयं याति यथाऽभ्राणि विशंति खे ॥ ४१० ॥
किं वा कल्पांतसमये सृष्टिमत्ति यथा यमः ।
स चैकविंशतिस्वर्गान्सपातालान्समग्रसत् ॥ ४११ ॥
प्रतिकूले यथा दैवे सकलं श्रीमतां घनम् ।
अकस्माद्विलयं याति यत्र कुत्रापि संस्थितम् ॥ ४१२ ॥
एवं कर्मगतिं पश्य सैन्यान्येकत्रितान्यथ ।
प्रविशंति मुखे तानि नह्येकमपि मुच्यते ॥ ४१३ ॥
लघ्व्यः शाखा ह्यशोकस्य नाशं यांत्युष्ट्रचर्विताः ।
तथा जनानां मरणं संप्राप्तं भवदानने ॥ ४१४ ॥
शिरांसि सकिरीटानि दंष्ट्रासंधिगलान्यलम् ।
सहसा पिष्टतां यांति दृश्यंते सकलान्यपि ॥ ४१५ ॥
मुकुटस्थानि रत्नानि दंतेषु विकसंति च ।
रसनाग्रे रत्नकणाः संति दंष्ट्राग्रयोजिताः ॥ ४१६ ॥
विश्वस्वरूपकालेन लोकदेहाश्च भक्षिताः ।
रक्षितो लिंगदेहो मे जगत्पालेन केवलम् ॥ ४१७ ॥
तथाऽखिलैर्ष्विद्रियैपूत्तमांगं यच्छिरोमिधम् ।
तत्त्वया रक्षितं देव महाकालमुखेऽपि हि ॥ ४१८ ॥
विस्मयेन पुनश्चोचे यत्सर्वे वदनह्रदे ।
पतंति तेषामपरा गतिः किं नास्ति सर्वथा ॥ ४१९ ॥
स्वयमेवाखिला सृष्टिर्याति मृत्युमुखेऽधुना ।
यत्र क्वापि स्थितान्स्वस्थः कालो ग्रसति सर्वतः ॥ ४२० ॥
ब्रह्माद्याश्च महांतोऽपि यांति चोर्ध्वमुखेऽखिलाः ।
सामान्यास्त्वाननेऽन्यस्मिंस्तद्धस्थे विशंति हि ॥ ४२१ ॥
इतरे प्राणिनः क्षुद्रा ग्रासिता क्षुद्भवस्थले ।
एवं विश्वमुखात्केऽपि विमुक्ताः प्राणिनो न हि ॥ ४२२ ॥

यथा नदीनां बहवोऽम्बुवेगाः
समुद्रमेवाऽभिमुखा द्रवंति ।

तथा तवामी नरलोकवीरा
विशंति वक्राण्यभिविज्वलंति ॥ २८ ॥
महानदीनां प्रवाहा यद्वद्गच्छंति सागरम् ।
सर्वतोऽस्मिन्मुखे तद्वत्प्रविशत्यखिलं जगत् ॥ ४२३ ॥
आयुष्यमार्गमाश्रित्य कृत्वाहोरात्रपद्धतिम् ।
सर्वे धावंति वेगेन तवास्मिन्पतितुं मुखे ॥ ४२४ ॥
यथा प्रदीप्तं ज्वलनं पतंगा
विशंति नाशाय समृद्धवेगाः ।
तथैव नाशाय विशंति लोका-
स्तवापि वक्राणि समृद्धवेगाः ॥ २९ ॥
यथा पतंगाः संयांति ज्वलिते गिरिकंदरे ।
तथैवात्राऽखिला लोका विशंति भवतो मुखे ॥ ४२५ ॥
तथापि ये गता वक्रे तप्तलोहे जलं यथा ।
नष्टास्ते सर्वथैवात्र प्रयाता नामशेषताम् ॥ ४२६ ॥
लेलिह्यसे ग्रसमानः समंतात्
लोकान्समग्रान्वदनैर्ज्वलद्भिः ।
तेजोभिरापूर्य जगत्समग्रं
भासस्तवोग्राः प्रतपंति विष्णो ॥ ३० ॥
अखिलान्भक्षयित्वैवं न जातं क्षुन्निवारणम् ।
कथं भवज्जाठराग्निरत्यंतं समदीदिपत् ॥ ४२७ ॥
यथा रुग्णो ज्वरान्मुक्तो दुष्काले वा दरिद्रवान् ।
तथा जिह्वा लिहंत्यत्राप्योष्ठप्रांतौ निरंतरम् ॥ ४२८ ॥
मुखेनाहारपर्याप्तमपि नोचरितं क्वचित् ।
कथं ह्यभूतपूर्वेयं क्षुधायास्तव तीव्रता ॥ ४२९ ॥
सागरश्चुलुकीकार्यो भक्ष्या वाऽखिलपर्वताः ।
दंष्ट्राभ्यां पेषणीयो वा ब्रह्मगोलोऽखिलोऽपि च ॥ ४३० ॥

भक्षणीयाः किमु दिशश्चर्वणीयाश्च तारकाः ।
सर्वथाप्यतिरेकस्ते हरे कथमुपस्थितः ॥ ४३१ ॥
विषयैर्वर्धते कामः काष्ठैरग्निर्विवर्धते ।
तथा मुखान्यप्यखिलं भक्षयंत्यपि नातृपन् ॥ ४३२ ॥
वाडवाग्नौ प्रज्वलिते कपित्थं भस्मसाद्भवेत् ।
तथाद्योद्घाटिते वक्त्रे त्रैलोक्यं याति भक्ष्यताम् ॥ ४३३ ॥
मुखानि संति यावंति त्रैलोक्यानि क्व तत्कृते ।
एवं चाहारहीनानि निर्मितानि कुतस्त्वया ॥ ४३४ ॥
अहो जगदिदं सर्वं मुखज्वालासु भर्जितम् ।
दावाग्नौ सर्वतो दीप्ते पतंति हरिणा यथा ॥ ४३५ ॥
तद्वद्विश्वस्य दुष्कर्म प्रोद्भूतं नायमीश्वरः ।
प्रसारितं कालजालं सृष्टिमत्स्यार्दनाय किम् ॥ ४३६ ॥
अस्मात्तेजोमयाज्जालाद्बहिः सृष्टिः कथं व्रजेत् ।
किंवा मुखानि नेमानि किंतु लाक्षागृहाणि हि ॥ ४३७ ॥
स्वार्चिर्भिः प्लुष्यति कथं तन्न वेत्ति हुताशनः ।
परं स्पृशति यं क्वापि मरणं तस्य निश्चितम् ॥ ४३८ ॥
शस्त्रं न वेत्ति मरणं स्वस्मादन्यस्य जायते ।
किंवा विषं न जानाति प्राणा यांति स्वसेवनात् ॥ ४३९ ॥
स्वस्यात्युग्रत्वस्य तथा स्मरणं न तवास्ति किम् ।
यदेकस्मिन्नपि मुखेऽप्यखिलं लुप्यते जगत् ॥ ४४० ॥
भवानात्मास्ति सर्वेषां विश्वव्यापक एव च ।
तथाप्यखिलविश्वस्याधुनास्यंतकवत्कथम् ॥ ४४१ ॥
त्यक्ता मया जीविताशा श्रीकृष्णातिभयेन हि ।
संकोचमखिलं त्यक्त्वा ब्रूहि यत्ते मनोगतम् ॥ ४४२ ॥
कियद्रूपं घर्षयसि स्मर देवत्वमात्मनः ।
यदि चेन्न हरे शक्यं मामुज्जीवय केवलम् ॥ ४४३ ॥

आख्याहि मे को भवानुग्ररूपो
नमोऽस्तु ते देववर प्रसीद ।

विज्ञातुमिच्छामि भवंतमाद्यं
न हि प्रजानामि तव प्रवृत्तिम् ॥ ३१ ॥

तर्हीदानीं वेदवेद्य त्रैलोक्याद्य जगद्गुरो।
विश्ववंद्यैकदा मेऽद्य शृणु विज्ञापनं प्रभो ॥ ४४४ ॥
तदाऽर्जुनेनैवमुक्त्वा कृष्णांघ्र्योः स्थापितं शिरः।
विश्वेश्वर प्रार्थना मे श्रूयतां कृपयाधुना ॥ ४४५ ॥
रूपं मे दर्शयेत्युक्तं स्वसमाधानहेतुना।
तत्त्वयेदं प्रकटितं त्रैलोक्यं ग्रसितुं क्षमम् ॥ ४४६ ॥
कथयाद्य भवान्कोसि क्रूरं रूपं कुतो धृतम्।
शस्त्रास्त्राणि च हस्तेषु धृतान्यत्र कुतस्त्वया ॥ ४४७ ॥
मुहुर्मुहुः क्रोधवशादुग्रो भवसि खादपि।
भयंकराणि नेत्राणि कृत्वा भीषयसे कुतः ॥ ४४८ ॥
दृष्ट्वा तवाद्भुतं रूपं कालादपि भयंकरम्।
ब्रूहि त्वमेकदा देव हेतुं वास्तवमात्मनः ॥ ४४९ ॥
ततः कृष्णोऽब्रवीत्पार्थ त्वं मां कोऽसीति पृच्छसि।
तथोग्ररूपस्वीकारे पृच्छस्यपि च कारणम् ॥ ४५० ॥

श्रीभगवानुवाच।

कालोऽस्मि लोकक्षयकृत्प्रवृद्धो
लोकान्समाहर्तुमिह प्रवृत्तः।
ऋतेऽपि त्वां नभविष्यंति सर्वे
येऽवस्थिताः प्रत्यनीकेषु योधाः ॥ ३२ ॥

पार्थ जानीहि कालं मां लोकसंहारकारणात्।
विवृतानि मुखान्यत्र विश्वं ग्रस्तुं मयाऽखिलम् ॥ ४५१ ॥
पुनः पार्थोऽब्रवीदेवं विनयात्प्रार्थितं मया।
लोकसंकटनाशाय तेन क्षुब्धोऽधिकं प्रभुः ॥ ४५२ ॥
अस्तु, मे क्रुद्धवचनं श्रुत्वा खिन्नोऽर्जुनो भवेत्।
इति देवोऽवदत्पार्थमपवादोऽपरोऽस्ति हि ॥ ४५३ ॥

स चायमस्मिन्संहारे जीवेयुः सर्वेपांडवाः ।
इति श्रुत्वार्जुनस्यापि प्राणाश्चैतन्यमागताः ॥ ४५४ ॥
स च मृत्युमुखं यातः सावधानोऽभवत्पुनः ।
तथा स्वास्थ्येन कृष्णोक्तौ स्वीयं चित्तमयूयुजत् ॥ ४५५ ॥
पुनश्चाकथयद्देवः सर्वस्वं मम पांडवाः ।
आयातोऽपि जगद्ग्रस्तुं ग्रसेयं न हि पांडवान् ॥ ४५६ ॥
संप्रदीप्ते यथा वह्नौ नवनीतं विलीयते ।
तद्वन्मे वदने पार्थ पश्यसि त्वं जगत्स्थितिम् ॥ ४५७ ॥
नह्यस्ति संशयः कोऽपि जगन्नाश उपस्थितः ।
यत्सेनेयं रणोद्युक्ता करोति व्यर्थवल्गनाम् ॥ ४५८ ॥
चतुरंगमिदं सैन्यं स्वसामर्थ्यमदेन हि ।
मत्वा बलिष्ठतां स्वस्य कालेन स्पर्धते वृथा ॥ ४५९ ॥
सर्वे चेमे सैन्यसंघाः शौर्यवृत्तिबलेन हि ।
ब्रुवंति चास्मत्पुरतः कृतांतोऽप्यतिदुर्बलः ॥ ४६० ॥
प्रतिसृष्टिं वयं कुर्मो हन्मो मृत्युं प्रतिज्ञया ।
विष्टपं चुलुकीकुर्मो ब्रुवंत्येवं मदांधिताः ॥ ४६१ ॥
ग्रसामः क्ष्मामेकदैव दहामोर्ध्वं तथा वियत् ।
यत्र तत्र स्थितं वायुं रुंध्मो बाणगणैर्वयम् ॥ ४६२ ॥
येषां शब्दाः शस्त्रतीव्रास्तापोऽग्नेरपि दाहकः ।
ब्रुवंति प्राणहरणे कालकूटं नहि क्षमम् ॥ ४६३ ॥
गांधर्वेऽपि यथाग्राणि खेऽवकाशोऽपि वा यथा ।
पुमांसो वा चित्रगतास्तथा वीरगणा इमे ॥ ४६४ ॥
किंवा मृगजलापूरो वस्त्रैनाजगरोऽपि वा ।
शृंगारिताः पुत्तलिका इव शूराः स्थिता इमे ॥ ४६५ ॥

तस्मात्त्वमुत्तिष्ठ यशो लभस्व
जित्वा शत्रून्भुंक्ष्व राज्यं समृद्धम् ।

---

१ गंधर्वनगरे. २ यमवकारां लोके पोक्ळीति व्यवहरंति. ३ वस्त्र-निर्मितः सर्पः.

मयैवैते निहताः पूर्वमेव
निमित्तमात्रं भव सव्यसाचिन् ॥ ३३ ॥
येषां देहस्थचैतन्यं पूर्वमेव हृतं मया ।
तेऽद्यालेख्यस्थवेताला इव जीवविवर्जिताः ॥ ४६६ ॥
यदि पुत्तलिकासूत्रं त्रुटितं चालनक्षमम् ।
तदा निरुपयुक्ता सा पतत्येव कुतोऽपि हि ॥ ४६७ ॥
तथैवायं सैन्यभारः क्षणान्नाशयितुं क्षमः ।
अतस्त्वरितमुत्तिष्ठ संप्रबुद्धो भवाऽर्जुन ॥ ४६८ ॥
पार्थ गोग्रहणे पूर्वं मोहिन्यस्त्रेण हि त्वया ।
वासांसि कुरुसैन्यानां हृतान्युत्तरहस्ततः ॥ ४६९ ॥
ततोऽपि दुर्बलमिदं सैन्यं रणसमुद्यतम् ।
हतमेकेन पार्थेनेत्येवं कीर्तिमुपार्जय ॥ ४७० ॥
न रक्षेयं यशःप्राप्ती राज्यं स्याद्धस्तगं यथा ।
सव्यसाचिन्निमित्तं त्वं भव कौरवनाशने ॥ ४७१ ॥

द्रोणं च भीष्मं च जयद्रथं च
कर्णं तथान्यानपि योधवीरान् ।
मया हतांस्त्वं जहि मा व्यथिष्ठा
युध्यस्व जेतासि रणे सपत्नान् ॥ ३४ ॥
न द्रोणमानं रक्षस्व तथा भीष्मभयं त्यज ।
कर्णे शस्त्रं कथं धार्यमिति शंकामपि त्यज ॥ ४७२ ॥
जयद्रथं कथं हन्मीत्येवं चिंतां न धारय ।
तथैव ख्यातवीराणां रणस्थानां न ते भयम् ॥ ४७३ ॥
सर्वे ते विकलाः संति केवलं शूरमानिनः ।
आर्द्रवस्त्रोन्मार्जनीयाः सिंहाश्चित्रगता यथा ॥ ४७४ ॥
अतः परं पांडव त्वां वीराणामस्ति का कथा ।
आभासमात्रं तिष्ठंति सर्वे ग्रस्ता मयाऽधुना ॥ ४७५ ॥
इमे मद्वदनं यांतो यदा दृष्टास्त्वयाऽर्जुन ।

नष्टमायुस्तदैवैषां शुष्कदेहा ह्यवस्थिताः ॥ ४७६ ॥
पार्थ त्वं शीघ्रमुत्तिष्ठ मयैव निहतान्जहि ।
अविचारेण मज्जस्व न वृथा रणसंकटे ॥ ४७७ ॥
परिकल्प्य स्वयं लक्ष्यं स्वतस्तद्विध्यते यथा ।
तेन न्यायेन पार्थ त्वं निमित्तं भव केवलम् ॥ ४७८ ॥
पार्थासंस्त्वद्वैरिणो ये व्याघ्रेणात्ताश्च जन्मतः ।
त्वं तद्यशस्तु संपाद्य भुंक्ष्व राज्यमकंटकम् ॥ ४७९ ॥
त्वद्द्रोहजा मदोन्मत्ता आसन्जगति ये खलाः ।
ते पार्थेन हताः सर्वेऽप्यनायासेन संयुगे ॥ ४८० ॥
एवंविधा विश्वपटे कथाः स्युः सर्वतोमुखाः ।
निरंतरमतः पार्थ तैर्युध्वा विजयी भव ॥ ४८१ ॥

संजय उवाच ।

एतच्छ्रुत्वा वचनं केशवस्य
कृतांजलिर्वेपमानः किरीटी ।
नमस्कृत्वा भूय एवाह कृष्णं
सगद्गदं भीतभीतः प्रणम्य ॥ ३५ ॥

ज्ञानदेवोऽब्रवीदेवं कथां प्रोवाच संजयः ।
धृतराष्ट्राय सार्थंतमपूर्णाय मनोरथैः ॥ ४८२ ॥
ततः स्वर्गादुत्तरंत्या भागीरथ्या ध्वनिर्यथा ।
तथा गंभीरया वाण्या श्रीकृष्णोऽप्यवदत्तदा ॥ ४८३ ॥
वेगात्पतत्येकदैव मेघधारा यथा दिवः ।
किंवा क्षुब्धः क्षीरसिंधुर्यथा मंदरमंथनात् ॥ ४८४ ॥
तथैव विश्वकंदेन कृत्वा गंभीरगर्जनाम् ।
पार्थायाऽगाधवचनं पुनः प्रोक्तं यथा पुरा ॥ ४८५ ॥
तत्स्वल्पमर्जुनः श्रुत्वा सुखदुःखाद्यवेदनात् ।
द्विगुणेन भयेनास्य सर्वांगं समकंपत ॥ ४८६ ॥
नम्रीभूय ततः पार्थो बध्वांजलिपुटं तदा ।
श्रीकृष्णपादयोस्तूर्णं स्वमूर्धानमधारयत् ॥ ४८७ ॥

यावद्वक्तुं प्रवृत्ते तावत्कंठो रुरोध ह ।
देव सौख्यं भयं वेद त्वमेव कुरु निर्णयम् ॥ ४८८ ॥
कृष्णसंभाषणेनैवं पार्थस्यासीत्स्थितिस्तदा ।
इति गीताश्लोकपदैर्विनिर्णीतं मयाऽधुना ॥ ४८९ ॥
पार्थः पुनर्भीत इव कृष्णपादौ प्रणम्य च ।
अवदद्वचता स्वामिन्नेवमुक्तं न किं मम ॥ ४९० ॥

अर्जुन उवाच ।

स्थाने हृषीकेश तव प्रकीर्त्या
जगत्प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवंति
सर्वे नमस्यंति च सिद्धसंघाः ॥ ३६ ॥

देव त्वयोक्तं कालोऽसि ग्रस्तं सर्वं मयेत्यपि ।
तदिदं सत्यमेवेति यदि मान्यं भवद्वचः ॥ ४९१ ॥
तथापि कालरूपेण कल्पांतसमयं विना ।
रक्षाकाले ग्रस्तमिति न विचारसहं खलु ॥ ४९२ ॥
तारुण्यं किं परित्यज्य वार्धक्यस्वीकृतिर्भवेत् ।
अतस्त्वदुक्तवत्सर्वं भवेदिति न भाति मे ॥ ४९३ ॥
किं दिवापि च मध्याह्ने सवितास्तं व्रजेत्कदा ।
असंभाव्यमनंतेदं न घटेतेति भाति माम् ॥ ४९४ ॥
सत्यं भवान्कालरूपोऽथाप्यवस्थात्रयानुगः ।
सबलास्ताः[1] स्वसमयं नोल्लंघेयुः कदाचन ॥ ४९५ ॥
यदोत्पत्तिर्भवत्यस्य न स्तः स्थितिलयौ तदा ।
स्थितिकाले न दृश्येते तथोत्पत्तिलयौ क्वचित् ॥ ४९६ ॥
तथा प्रलयकालेऽपि स्तो नोत्पत्तिस्थिती अपि ।
अवस्थात्रितयं हीदं नैवोल्लंघ्यं कदापि हि ॥ ४९७ ॥
तस्मादद्य स्थितेः काले सांप्यभोगस्थिते जने ।

---

१ ताः=नियता अवस्थाः.

असाम्यहमिति ब्रूपे तन्नर्तं भात्यनंत मे ॥ ४९८ ॥
संकेतेन तदा देवोऽब्रवीदुभयसैन्ययोः ।
क्षीणायुर्दर्शितं तेऽद्य म्रियेरन्समये जनाः ॥ ४९९ ॥
एवं सांकेतिकं कृष्णे पार्थाय ब्रुवति क्षणात् ।
अपश्यदर्जुनस्तावत्सैन्ययोः पूर्ववत्स्थितिम् ॥ ५०० ॥
तस्मिन्कालेऽवदत्पार्थो देव त्वमसि सूत्रधृक् ।
तेनास्य जगतोऽद्यैव संप्राप्ता पूर्ववत्स्थितिः ॥ ५०१ ॥
भवाब्धौ मज्जतां देव यस्त्वमेवासि तारकः ।
एवंविधायास्त्वत्कीर्तेः स्यादस्माकं स्मृतिः सदा ॥ ५०२ ॥
तां मुहुः स्मरतश्चित्ते भासते मे सुखोत्सवः ।
तेनैवाद्यानंदसिंधोस्तरंगेषु लुठाम्यहम् ॥ ५०३ ॥
देव त्वदनुरागेण जीवत्यानंदतो जगत् ।
तथैव क्लेशदान्दुष्टान्नाशयस्यधिकाधिकम् ॥ ५०४ ॥
त्रिलोकीराक्षसानां तु हृषीकेश भयं तव ।
अतो भयार्दिता दैत्याः पलायंते दिशो दश ॥ ५०५ ॥
सुराः सिद्धाः किन्नराश्च किं वा सर्वे चराचराः ।
दृष्ट्वा भवंतं हर्षेण प्रणमंति दिवानिशम् ॥ ५०६ ॥

कस्माच्च ते न नमेरन्महात्मन्
गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ।
अनंत देवेश जगन्निवास
त्वमक्षरं सदसत्तत्परं यत् ॥ ३७ ॥

केनापि कारणेनास्तां ये नारायण राक्षसाः ।
त्वत्पादाग्रप्रणम्यैव धावंतीतस्ततः सदा ॥ ५०७ ॥
त्वामेव नेदं प्रष्टव्यं वयं विद्मः स्वभावतः ।
मार्तंडस्योदये जातेऽधकारो न हि तिष्ठति ॥ ५०८ ॥
आकरस्त्वं प्रकाशस्य जातोऽस्मदृष्टिगोचरः ।
यत्पलाय्य भयेनाथ याताः सर्वे निशाचराः ॥ ५०९ ॥

इयतो दिवसान् राम नेदं ज्ञातं मया क्वचित् ।
भवतो महिमाऽगाधोऽखिलोऽस्माभिर्विलोकितः ॥ ५१० ॥
यतः सृष्टिरियं जाता जीववल्ल्याश्च विस्तरः ।
सा माया भवदिच्छातः समुत्पन्ना हरेऽखिला ॥ ५११ ॥
निःसीम भवतः सत्त्वमसंख्याश्च गुणा अपि ।
त्वत्सामर्थ्यं तथाऽसीम त्वं देवानामपीश्वरः ॥ ५१२ ॥
आदिस्थानं त्रिलोक्यास्त्वमविनाशी त्वमेकलः ।
सदसच्च त्वमेवासि त्वमेवाऽतीत्य तत्स्थितः ॥ ५१३ ॥

त्वमादिदेवः पुरुषः पुराण-
स्त्वमस्य विश्वस्य परं निधानम् ।
वेत्तासि वेद्यं च परं च धाम
त्वया ततं विश्वमनंतरूप ॥ ३८ ॥

बीजं प्रकृतिपुंसोस्त्वं मायाया अंतिमास्पदम् ।
पुराणोऽनादिसिद्धोऽसि जगदीश त्वमात्मना ॥ ५१४ ॥
जगतो जीवनं त्वं च जीवमात्राश्रयोऽस्यपि ।
भविष्यतश्च भूतस्य ज्ञानमस्ति भवद्वशे ॥ ५१५ ॥
श्रुतीक्षणे सुखं भुंक्त एवं रूपं तवास्ति च ।
त्रिलोकी मायया व्याप्ता त्वमेवासि तदाश्रयः ॥ ५१६ ॥
त्वमेव परमः श्रेष्ठस्त्वं धामासि सुखस्य च ।
कल्पांते मायिकं ब्रह्म लुप्तं भवति च त्वयि ॥ ५१७ ॥
किं बहुनया त्वयैवायं निर्मितो विश्वविस्तरः ।
तं त्वा वर्णयितुं शक्तो भगवन् कोऽस्ति सृष्टिगः ॥ ५१८ ॥

वायुर्यमोऽग्निर्वरुणः शशांकः
प्रजापतिस्त्वं प्रपितामहश्च ।
नमो नमस्तेऽस्तु सहस्रकृत्वः
पुनश्च भूयोऽपि नमो नमस्ते ॥ ३९ ॥

नमः पुरस्तादथ पृष्ठतस्ते
नमोऽस्तु ते सर्वत एव सर्व ।
अनंतवीर्याऽमितविक्रमस्त्वं
सर्वं समाप्नोपि ततोऽसि सर्वः ॥ ४० ॥

का वस्तुरस्ति त्वद्दते कस्मिन्स्थाने न तिष्ठसि ।
अतस्त्वं यत्रयत्रासि नमस्तत्रास्तु मेऽनिशम् ॥ ५१९ ॥
अनंत वायुस्त्वमसि यमः शास्ता त्वमेव च ।
प्राणिमात्रमभिव्याप्य तिष्ठत्यग्निस्त्वमेव सः ॥ ५२० ॥
वरुणस्त्वं चंद्रमापि ब्रह्मा त्वं विश्वसर्जकः ।
ब्रह्मदेवस्यापि पिता परमोऽसि त्वमेव च ॥ ५२१ ॥
यद्यदस्तीतरत्सर्वं साकारं चाकृतेर्विना ।
तस्मै नतिस्तु सर्वस्मै जगन्नाथास्तु मे सदा ॥ ५२२ ॥
सानुरागेण पार्थेन सर्वतोऽपि नमस्कृतम् ।
पुनःपुनरुवाचैवं जगदीश नमोऽस्तु ते ॥ ५२३ ॥
पुनः साग्रां कृष्णमूर्तिं विलोक्य पांडुनंदनः ।
पुनश्चोच्चारयामास भगवन्नतिरस्तु ते ॥ ५२४ ॥
प्रत्यंगमवलोक्याथ समाधानमभूद्धृदि ।
अर्जुनः पुनरप्यूचे प्रभो तेऽस्तु नमोनमः ॥ ५२५ ॥
विश्वस्वरूपे दृष्टानि यानि भूतानि सर्वतः ।
तेभ्योऽर्जुनः समस्तेभ्यश्चकाराथ नमोनमः ॥ ५२६ ॥
कृष्णरूपेऽप्यद्भुतानि दृष्ट्वा रूपाणि पांडवः ।
साश्चर्यचित्तो ह्यवदन्नमस्तेऽस्तु जगत्प्रभो ॥ ५२७ ॥
असमर्थोधिकं स्तोतुं स्वस्थः स्थातुं च नाशकत् ।
अधिकं प्रेमभावेन जगर्जोच्चैस्तदार्जुनः ॥ ५२८ ॥
किं बहूच्चैर्यमेवाथ नमस्कृत्वा सहस्रशः ।
पुनरूचे श्रीहरेऽद्य सन्मुखाय नमोऽस्तु ते ॥ ५२९ ॥
पृष्ठभागोऽस्ति नास्तीति विचारावसरो न मे ।
पृष्ठतोऽपि नमस्तेऽस्तु पृष्ठं यद्यस्ति ते प्रभो ॥ ५३० ॥

मत्पृष्ठतस्तिष्ठसीति भावनं पृष्ठवर्तिनः ।
विमुखत्वं सन्मुखत्वं न च संभवति त्वयि ॥ ५३१ ॥
तव प्रत्यंगसंख्यानमहं कर्तुं न च क्षमः ।
तस्मात्ते सकलांगेभ्यः सर्वात्मक नमोऽस्तु मे ॥ ५३२ ॥
त्वमस्यनंत शक्त्यब्धिरपारस्त्वत्पराक्रमः ।
यतः समोऽसि सर्वेषां सर्वात्मक नमोऽस्तु ते ॥ ५३३ ॥
सर्वस्मिंश्च यथाकाशेऽप्यकाशोऽस्ति भृतोऽखिले ।
सर्वांतर्यामिरूपेण व्यापकत्वं प्रभोऽस्ति ते ॥ ५३४ ॥
किं बहूक्त्या श्रीहरे त्वं सर्वांतर्व्याप्य तिष्ठसि ।
क्षीरसिंधोस्तरंगाश्च संति क्षीरमया यथा ॥ ५३५ ॥
तस्मादेव न सर्वेभ्यः पृथगास्से कदाचन ।
अतस्त्वमेक एवासीत्यभूदनुभवो मम ॥ ५३६ ॥

सखेति मत्वा प्रसभं यदुक्तं
हे कृष्ण हे यादव हे सखेति ।
अजानता महिमानं तवेदं
मया प्रमादात्प्रणयेन वापि ॥ ४१ ॥

तवैवं वैभवं देव नास्माभिर्विदितं क्वचित् ।
अतः सुहृद्भावनेन देव व्यवहृतं मया ॥ ५३७ ॥
कथं वाऽनुचितं जातं मार्जितं सुधया गृहम् ।
किंवा कामगवीं दत्वा स्वीकृतो मेषतर्णकः ॥ ५३८ ॥
लब्ध्वा स्पर्शमयं शैलं तत्खंडैर्दुर्गमाहितम्[1] ।
किंवा कल्पद्रुमं छित्वा स्वक्षेत्रस्यावृतिः कृता ॥ ५३९ ॥
चिंतामणिखनिं लब्ध्वा न ज्ञातेति विवर्जिता ।
एवं त्वत्संगतिः सर्वा व्यर्थाऽभूत्स्नेहभावतः ॥ ५४० ॥
उपस्थितो रणो योऽद्य का वार्ता तस्य ते पुरः ।
परं प्रत्यक्षदेवोऽपि त्वं मया सारथिः कृतः ॥ ५४१ ॥

---

१ स्पर्श. परिसमगिरमम्.

सामार्थं कौरवगृहे प्रेषितोऽस्माभिरीश्वर ।
वाणिज्यार्थं स विश्वेश विक्रीतोऽसि मया वत ॥ ५४२ ॥
योग्यंसायामसौख्यं त्वामज्ञात्वा मूढवन्मया ।
भवदग्रेऽपि यत्स्वासिन्नुपरोधो मुहुः कृतः ॥ ५४३ ॥

यच्चावहासार्थमसत्कृतोऽसि
विहारशय्यासनभोजनेषु ।
एकोऽथवाऽप्यच्युत तत्समक्षं
तत्क्षामये त्वामहमप्रमेयम् ॥ ४२ ॥

श्रीहरे मूलभूतस्त्वं सभ्येष्वप्यग्रणीरसि ।
संबंधित्वं पुरस्कृत्य विनोदेनासि कल्पितः ॥ ५४४ ॥
गतोऽभवं भवद्गेहे सत्कृतोऽसि तदा त्वया ।
सन्मानं तमनादृत्य क्रोधेनाहं गतस्तदा ॥ ५४५ ॥
पादस्पर्शेनानुनीतः शार्ङ्गपाणे तदा त्वया ।
स्वैरं कृता दुष्कृतिश्च बहुवारं मया त्वयि ॥ ५४६ ॥
स्वज्ञातृत्वाभिमानेन तवाग्रे विमुखोऽभवम् ।
कास्ति मे योग्यता देव यत्स्वल्पापि तवाग्रतः ॥ ५४७ ॥
दंडादंडि त्वया साकं कृतं द्वैरथमेव च ।
अक्षक्रीडासमायोगे तिरस्कारः कृतस्तव ॥ ५४८ ॥
याचितं चोत्तमं वस्तु ज्ञानमुक्तं भवत्पुरः ।
पांडवाः स्मो वयं कृष्ण का ते प्रौढिरितीरितम् ॥ ५४९ ॥
त्वयि सामान्यतो जाता ह्यपराधाः सहस्रशः ।
सर्वे तेऽज्ञानतश्चेति पादग्राहं ब्रवीमि ते ॥ ५५० ॥
भोजनावसरे लोभाच्छ्रीहरे मां स्मरस्यपि ।
तदोपविष्टः स्वस्थाने गर्वेणासि न चोदितः ॥ ५५१ ॥
भवतोऽन्तःपुरे गंतुं नैव शंका धृता मया ।
भयतः सविधे तल्पे निद्रितोऽसि यथासुखम् ॥ ५५२ ॥

---

१ योगिनां अंसायामः=प्राणायामः समाधिरित्यर्थः तत्सौख्यरूपम्.

संबोधितः 'कृष्ण' इति भवान्योदववन्मतः ।
गच्छंश्च पथि दृष्टस्त्वं मया शपथपूर्वकम् ॥ ५५३ ॥
एकासने चोपविष्टः शब्दो न गणितस्तव ।
एवं परिचयाधिक्यादवमानो हरे कृतः ॥ ५५४ ॥
किं किं वा कथयाम्यद्य भो अनंत तवाग्रतः ।
तदनंतापराधानां केवलं राशिरस्म्यहम् ॥ ५५५ ॥
प्रत्यक्षं वा परोक्षं वाऽभवन्वार्ताश्च निंदिताः ।
सर्वा बालस्य मातेव क्षमस्व भगवन्मम ॥ ५५६ ॥
सरिद्भिर्मलिनं नीरं प्रवाहादाहृतं यदि ।
तत्सर्वं स्वीकरोत्यब्धिस्तासां नान्या गतिर्यतः ॥ ५५७ ॥
प्रीत्याथवा प्रमादेन यदमर्यादया कृतम् ।
भाषितं वाऽतिरेकेण तन्मुकुंद क्षमस्व माम् ॥ ५५८ ॥
भवतः शांतशीलेन जीवान्धारयति क्षितिः ।
अतः करोमि विज्ञप्तिं सा स्वल्पैव भवेत्किल ॥ ५५९ ॥
तस्मादगम्य भगवन् विनयाच्छरणागतम् ।
अनंतानपराधान्मे क्षमस्व त्वं कृपानिधे ॥ ५६० ॥

पितासि लोकस्य चराचरस्य
त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो
लोकत्रयेऽप्यप्रतिमप्रभावः ॥ ४३ ॥

ज्ञातोस्ति तेऽद्य महिमा यथावत्पुरुषोत्तम ।
यथा चराचरस्यास्य देव त्वमसि जन्मभूः ॥ ५६१ ॥
तथा हरिहरादीनां त्वमेव परदेवता ।
त्वं वेदेभ्योऽध्यापयिता सर्वस्यासि गुरुर्महान् ॥ ५६२ ॥
श्रीराम त्वं गभीरोऽसि सर्वभूतसमानदृक् ।
गुणैरप्रतिमोऽसि त्वमद्वितीयोऽसि सर्वतः ॥ ५६३ ॥
त्वत्तुल्यस्तु न कोऽप्यस्ति किमर्थं प्रतिपादनम् ।
त्वन्निर्मिते वियत्यस्मिन्जगत्संमाति चाखिलम् ॥ ५६४ ॥

कोऽप्यस्ति त्वत्सम इति कल्पनापि त्रपास्पदा ।
अतस्त्वदधिकस्त्वत्र मास्तु वार्तापि सर्वथा ॥ ५६५ ॥
तस्मात्रिलोक्यामेकस्त्वं नान्यस्त्वत्सदृशोऽस्ति भोः ।
असमर्थो वर्णयितुं त्वन्माहात्म्यमलौकिकम् ॥ ५६६ ॥

तस्मात्प्रणम्य प्रणिधाय कायं
प्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः
प्रियः प्रियायार्हसि देव सोढुम् ॥ ४४ ॥

एवमुक्त्वा तदा पार्थः कृष्णं नत्वा च दंडवत् ।
अष्टौ च सात्त्विका भावाः पार्थस्यांगेऽस्फुरन्मुहुः ॥ ५६७ ॥
ततोऽब्रवीत्प्रसीदेति वागभूद्गद्गदा मम ।
तवापराधसिंधोर्मा स्वामिन्निष्कासयाऽधुना ॥ ५६८ ॥
त्वं जगत्सुखकर्तासि न ज्ञातः सौहृदान्मया ।
जगदीशं त्वां वदतामाश्चर्यं बहु कारितम् ॥ ५६९ ॥
त्वं स्वयं वर्णनीयः सन्मयि दृष्टेऽविचारतः ।
वृथा प्रलापिनि दयां कृत्वाऽहं सांत्वितो जने ॥ ५७० ॥
एवं नानापराधानामियत्ता नैव विद्यते ।
श्रीमुकुंद प्रमादेभ्यः सर्वेभ्यो रक्ष रक्ष माम् ॥ ५७१ ॥
प्रार्थनां कर्तुमप्येवं नह्यस्ति मम योग्यता ।
तथाप्यपत्यवत्पित्रे किंचित्स्नेहाद्ब्रवीमि ते ॥ ५७२ ॥
पुत्रापराधाञ्शतशः क्षाम्यत्येव यथा पिता ।
तद्वदात्मीयभावेन कृपया त्वं क्षमां कुरु ॥ ५७३ ॥
यथा मित्रकृतौद्धत्यं क्षमते मित्रमादरात् ।
तथाऽपराधाः सोढव्यास्त्वया मे मित्रभावतः ॥ ५७४ ॥
प्रियेभ्यो भूरि सन्मानं प्रियो नापेक्षते यथा ।
अस्मद्गृहेऽपाकृतानि विप्रोच्छिष्टान्यपि त्वया ॥ ५७५ ॥
अत्यंतमित्रनिकटे सुगूढमपि संकटम् ।
वक्तुं भयेन्न संकोचो मित्रभावेन चोभयोः ॥ ५७६ ॥

यथा तनुमनोभावैर्यस्यै देहः समर्पितः ।
तस्मिन्कांते न संकोचो गूढं वर्क्य स्त्रियः कचित् ॥ ५७७ ॥
एवं भवानपि स्वामिन्ननुनीतोऽसि यन्मया ।
यन्नत्वेनानुनेतुमस्त्यन्यदपि कारणम् ॥ ५७८ ॥

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा
भयेन च प्रव्यथितं मनो मे ।
तदेव मे दर्शय देव रूपं
प्रसीद देवेश जगन्निवास ॥ ४५ ॥

संप्रार्थितोऽसि स्नेहेन विश्वरूपदिदृक्षया ।
स पित्रोः स्थानभूतेन हेतुर्मे पूरितस्त्वया ॥ ५७९ ॥
आनाय्य कल्पतरवः प्रांगणे रोपिता यथा ।
किं कामधेनुवत्सा वा क्रीडार्थमुपकल्पिताः ॥ ५८० ॥
क्रीडार्थे याचितास्तारा गेंदुकार्थं च चंद्रमाः ।
तत्सर्वं पूरितं मातरीप्सितं मे तदा तदा ॥ ५८१ ॥
बिंदुमात्रा सुधाऽप्राप्या कृत्वा तस्यास्तु वर्षणम् ।
क्षेत्रेषु चिंतामणय उप्ता मास्तु चतुर्ष्वपि ॥ ५८२ ॥
यन्ममेच्छानुसारेण दर्शितं कृपया त्वया ।
ब्रह्मणा वा शंकरेण तन्न श्रुतमपि कचित् ॥ ५८३ ॥
कुतस्तद्दर्शनं तेषां न यच्छ्रुतिशिरोऽलभत् ।
अंतःस्वरूपगो ग्रंथिर्मर्दयं मोचितस्त्वया ॥ ५८४ ॥
कल्पादारभ्याद्यतनप्रचलद्घटिकावधि ।
कियंति मम जन्मानि जातानि धरणीतले ॥ ५८५ ॥
विचारिते सूक्ष्मदृशा स्वामिन्सर्वेषु जन्मसु ।
न दृष्टा न श्रुता वापि वार्तेयं सहसा मया ॥ ५८६ ॥
विश्वरूपांगणप्रांते प्रवेशो न धियो भवेत् ।
तस्यांतः कल्पनमपि स्यात्कथं प्राकृतस्य हि ॥ ५८७ ॥
तस्य दृष्ट्यालोकनस्य विचारोऽपि मनोतिगः ।
किं बहूक्त्या, स्वरूपं तद्दृष्टं केनापि न कचित् ॥ ५८८ ॥

भवतो विश्वरूपं तद्देव मां दर्शितं त्वया ।
तेनापि हर्षभरितमत्यंतमभवन्मनः ॥ ५८९ ॥
श्रीहरेऽथैवमिच्छामि संत्वालापास्त्वया सह ।
तथैवालिंगनार्थाय संगतिः स्तान्निरंतरम् ॥ ५९० ॥
अद्येच्छां चेत्पूरयेयं वच्मि केन मुखेन ते ।
आलिंगनं वा कं दद्यामपारो दृश्यते भवान् ॥ ५९१ ॥
धावनं वायुना स्याद्वाऽऽलिंगनं वियतः क्वचित् ।
सागरे च जलक्रीडा तदिदं घटते कथम् ॥ ५९२ ॥
अतोऽस्य विश्वरूपस्य दृश्यते मां महद्भयम् ।
तदावृणु वृहद्रूपमित्येवं प्रार्थनास्ति मे ॥ ५९३ ॥
ततश्चराचरं शांत्या संतिष्ठेद्य सुखं गृहे ।
तथा चतुर्भुजं रूपं श्रीहरे दर्शयाऽधुना ॥ ५९४ ॥
अभ्यस्ते सुचिरं योगे प्राप्तव्यमिदमेव हि ।
आलोचितेषु शास्त्रेषु सिद्धांतोऽप्ययमेव च ॥ ५९५ ॥
यदि सर्वे कृता यज्ञाः फलं तेषामिदं महत् ।
इदमेव परं लक्ष्यं कृते तीर्थावगाहने ॥ ५९६ ॥
कृतं यद्यत्तपं दानं पुण्यं संपादितं च यत् ।
तस्माच्चतुर्भुजस्यास्य प्राप्तिरेव महत्फलम् ॥ ५९७ ॥
देव त्वत्सौम्यरूपस्याधिकं प्रेम विवर्धते ।
तदेव दर्शयित्वाद्य मम चिंतां निवारय ॥ ५९८ ॥
त्वं सर्वस्यांतरं वेत्सि विश्वस्य जनको भवान् ।
देवाधिदेव पूज्योऽसि प्रसन्नो भव सर्वथा ॥ ५९९ ॥

किरीटिनं गदिनं चक्रहस्त-
मिच्छामि त्वां द्रष्टुमहं तथैव ।
तेनैव रूपेण चतुर्भुजेन
सहस्रबाहो भव विश्वमूर्ते ॥ ४६ ॥

देवाऽसि नीलवर्णस्त्वं वियन्नीलोत्पलं तथा ।
रंजितं तेन वर्णेनेंद्रनीलोऽप्यधिकं यमी ॥ ६०० ॥

यथा पीचे सुगंधः स्यादानंदस्य करावपि ।
जानुभ्यां मदनेनापि प्राप्तं सौंदर्यमुत्तमम् ॥ ६०१ ॥
मुकुटश्चापि भावत्को भवन्मूर्ध्नैव राजते ।
भूषणैर्भूषणत्वं च भवदंगैः समर्जितम् ॥ ६०२ ॥
वियतींद्रधनुर्मध्ये विराजंते यथा घनाः ।
वैजयंती तथा माला भवत्कंठे विराजते ॥ ६०३ ॥
उदारा ते गदा देव मोक्षं दत्तेऽसुरानपि ।
तथैव चक्रं गोविंद हस्ते देदीप्यते परम् ॥ ६०४ ॥
किं भूयामधिकं स्वामिन्सौम्यं रूपं निरीक्षितुम् ।
उत्कंठितोऽस्मि भगवन्सौम्यमूर्तिर्भवाऽधुना ॥ ६०५ ॥
वैभवं विश्वरूपस्य दृष्ट्वा तृप्ते दृशौ मम ।
श्रीकृष्णदर्शनार्थाय क्षुधिते स्तोऽधुनाधिकम् ॥ ६०६ ॥
नह्यन्यद्द्रष्टुमिच्छामि साकारात्कृष्णदर्शनात् ।
विश्वरूपमपूर्णं तद्यावत्कृष्णो न दृश्यते ॥ ६०७ ॥
न कृष्णदर्शनादन्यद्विद्यते भुक्तिमुक्तिदम् ।
आवृत्येदं घोररूपं चतुर्बाहुर्भवाऽधुना ॥ ६०८ ॥

श्रीभगवानुवाच ।

मया प्रसन्नेन तवाऽर्जुनेदं
रूपं परं दर्शितमात्मयोगात् ।
तेजोमयं विश्वमनंतमाद्यं
यन्मे त्वदन्येन न दृष्टपूर्वम् ॥ ४७ ॥

श्रुत्वैवमर्जुनेनोक्तं श्रीकृष्णो विस्मितोऽभवत् ।
उवाच नान्योऽविचारी त्वदन्यः कोऽपि दृश्यते ॥ ६०९ ॥
पार्थाऽलभ्यं प्राप्य वस्तु तत्तोपमविगण्य च ।
भीत्या ब्रवीपि यच्चैवं कथं त्वमसि भीरुकः ॥ ६१० ॥

---

१ भावसंज्ञकरत्नस.

अहं प्रसन्नः कस्मैचित्तत्प्रेमोपरि नांततः ।
नैतावदपि कस्मैचित्प्रियाः प्राणाः समर्पिताः ॥ ६११ ॥
तथापीच्छां पूरयितुं तवांऽतर्ध्यानमाचरम् ।
भवदर्थमिदं कृच्छ्राद्विश्वरूपं धृतं मया ॥ ६१२ ॥
प्रसन्नता त्वत्प्रियार्थं ममाद्याभूतिपशाचवत् ।
अतोऽयमुच्छ्रितः पार्थ विश्वरूपध्वजो मया ॥ ६१३ ॥
ममेदमपरंपारं विश्वरूपं परात्परम् ।
अवतारा भवंत्यस्माद्रामकृष्णाद्योऽपि हि ॥ ६१४ ॥
तेजोमयमिदं ज्ञानं विश्वव्यापकमेव मे ।
यन्मूलबीजं सर्वेषामस्त्यनंतं तथाऽचलम् ॥ ६१५ ॥
अर्जुनान्येन केनापि पूर्वं दृष्टं न वा श्रुतम् ।
नैवेदं साधनैः साध्यमित्येवं विद्धि सर्वथा ॥ ६१६ ॥

न वेदयज्ञाध्ययनैर्न दानै-
न च क्रियाभिर्न तपोभिरुग्रैः ।
एवंरूपः शक्य अहं नृलोके
द्रष्टुं त्वदन्येन कुरुप्रवीर ॥ ४८ ॥

एतत्स्वरूपं संप्राप्य वेदा मूकत्वमागताः ।
परावृत्ता याज्ञिकाश्च स्वर्गांतपुण्यक्षये स्वयम् ॥ ६१७ ॥
योगिनोऽपि यदप्राप्य स्वं योगाभ्यासमत्यजन् ।
न चाध्ययनसौरस्यं यदीयप्रापणेऽस्ति हि ॥ ६१८ ॥
सत्कर्माणि प्रसिद्धानि स्वमहत्त्वभ्रमेण च ।
यदर्थं धावमानानि स्वर्गावधि गतानि हि ॥ ६१९ ॥
दृष्ट्वैश्वर्यमिदं स्यक्त्वोग्रत्वमासंस्तपोधनाः ।
तपसां साधनमपि यस्माद्दूरेऽवतिष्ठते ॥ ६२० ॥
मनुष्यलोके नैतावद्दृष्टं केनापि यत्नतः ।
दुर्दर्शं विश्वरूपं तत्पार्थ साक्षात्कृतं त्वया ॥ ६२१ ॥
अस्य ध्याने समर्थस्त्वमेकोऽसि धरणीतले ।
कदापीदं महद्भाग्यं साक्षाद्ब्रह्मापि नाऽलभत् ॥ ६२२ ॥

मा ते व्यथा मा च विमूढभावो
दृष्ट्वा रूपं घोरमीदृङ्ममेदम् ।
व्यपेतभीः प्रीतमनाः पुनस्त्वं
तदेव मे रूपमिदं प्रपश्य ॥ ४९ ॥

धन्यं मन्यस्व स्वं पार्थ विश्वरूपविलोकनात् ।
न भीस्तत्र नवा किंचिदस्माच्छ्रेष्ठतरं खलु ॥ ६२३ ॥
पार्थ दैवाद्यदि प्राप्तः समुद्रोऽमृतपूरितः ।
तस्मिन्बुडेयेति भीत्या कस्त्यजेत्सुविवेकवान् ॥ ६२४ ॥
सुवर्णपर्वतं दृष्ट्वा नायं चालयितुं क्षमः ।
इति मत्वा तिरस्कारं कः कुर्यात्तस्य बुद्धिमान् ॥ ६२५ ॥
दैवाच्चिंतामणिं लब्ध्वं जडं मत्वैव कस्त्यजेत् ।
कश्च प्राप्तां कामधेनुं तत्पोषणभयात्त्यजेत् ॥ ६२६ ॥
हिमांशुं गृहमायातमुष्णभीत्या त्यजेन्नु कः ।
प्रतिच्छायां करोतीति सूर्यं गच्छेति को वदेत् ॥ ६२७ ॥
तद्वत्पार्थाधुना विश्वरूपैश्वर्यं भवत्करे ।
प्राप्तं तथापि व्यामोहस्तव चित्तेऽभवत्कथम् ॥ ६२८ ॥
पार्थ मूढ इवाभासि किं वच्मि पुरतस्तव ।
देहं त्यक्त्वाऽलिंगनाय छायां धावस्यबुद्धवत् ॥ ६२९ ॥
मनोवैकल्ययोगेन द्रष्टुं रूपं चतुर्भुजम् ।
यत्प्रार्थ्यते त्वया पार्थ त्रिकालाबाधितं च तत् ॥ ६३० ॥
तस्माच्चतुर्भुजस्यास्थां संत्यज्येतः परं पुनः ।
अनास्थां विश्वरूपेऽस्मिन्पार्थ मा कुरु दुर्दरो ॥ ६३१ ॥
विश्वरूपमिदं घोरं विकरालं च यद्यपि ।
तथापि पूर्णं विश्वासमेतस्मिन्धारयाऽर्जुन ॥ ६३२ ॥
यद्वद्वत्संतरूपणो धत्ते गुप्तधने मनः ।
करोति यच्च कर्तव्यं तच्छरीरेण केवलम् ॥ ६३३ ॥

अजातपक्षबालेषु चित्तं संस्थाप्य पक्षिणी ।
कणलोभेन विश्वस्मिन्यथा भ्रमति खेऽनिशम् ॥ ६३४ ॥
धेनुश्चरत्यरण्येऽपि चित्तं रक्षति तर्णके ।
तथा स्थिरीकुरु प्रेम विश्वरूपे दिवानिशम् ॥ ६३५ ॥
सामान्यतश्चित्तशांत्यै बाह्यात्कारेण सर्वदा ।
भजेच्चतुर्भुजां मूर्तिं गुणनामादिकं स्मरन् ॥ ६३६ ॥
मुहुर्मुहुरिदं वच्मि मदुक्तं त्वं न विस्मर ।
शश्वन्निधेहि सद्भावं विश्वरूपे ममार्जुन ॥ ६३७ ॥
अदृष्टपूर्वमालोच्य यत्त्वां भयमुपस्थितम् ।
तदुज्झित्य प्रेमभावं विश्वरूपेऽद्य धारय ॥ ६३८ ॥
त्वदीप्सितं दर्शयामीत्यब्रवीद्विश्वतोमुखः ।
स्वेष्टां चतुर्भुजां मूर्तिं सुखेनालोचयार्जुन ॥ ६३९ ॥

इत्यर्जुनं वासुदेवस्तथोक्त्वा
स्वकं रूपं दर्शयामास भूयः ।
आश्वासयामास च भीतमेनं
भूत्वा पुनः सौम्यवपुर्महात्मा ॥ ५० ॥

एवमुक्त्वा क्षणादेव देवोऽभूत्पूर्वरूपधृक् ।
नाश्चर्यं ह्येवमेवास्ति प्रेम्णो माहात्म्यमद्भुतम् ॥ ६४० ॥
कृष्णः साक्षात्परं ब्रह्म यद्विराड्रूपमांतरम् ।
अर्जुनायार्पयामास तत्तस्मै नह्यरूरुचत् ॥ ६४१ ॥
गृहीत्वा किं त्यजेद्वस्तु सद्रत्नमपि दूषयेत् ।
किंवा कन्यां निरीक्ष्यापि नेष्टेति कथयेत्पुनः ॥ ६४२ ॥
तद्वन्महत्प्रयासेनोपदेशोऽकारि वैश्वकः ।
पार्थाय सोऽचधिः प्रेम्णः श्रीकृष्णेन प्रदर्शितः ॥ ६४३ ॥
स्वर्णेष्टकां विलाप्याथालंकारः स्वेप्सितः कृतः ।
परं स रोचते नेति कुर्यात्तस्येष्टकां पुनः ॥ ६४४ ॥

वैश्वरूपनिष्ठाविषयकः. २ विप्यष्टं यथावस्थं स्वर्णम्.

कृत्वा तिरः स्ववपुरर्जुनहेतुपूर्वं
प्राचीकटत्सुविपुलं निजविश्वरूपम् ।
तत्रापि भीतमथ पूर्ववपुर्दिदृक्षुं
पार्थं विलोक्य च बभूव चतुर्भुजोऽसौ ॥ ६४५ ॥
शिष्यतापं सोढुमर्हाः क संति गुरवो भुवि ।
न जाने प्रेममाहात्म्यमेवं प्रोवाच संजयः ॥ ६४६ ॥
विश्वं व्याप्याखिलमपि विश्वरूपं धृतं च यत् ।
तच्च सांगं कृष्णरूपेक्षणमात्रादधारयत् ॥ ६४७ ॥
परात्मरूपे जीवानां समावेशो भवेद्यथा ।
किंवा बीजे समाविष्टस्तिष्ठति द्रुः सविस्तरः ॥ ६४८ ॥
स्वप्ने दृष्टोऽपि विस्तारो नैव तिष्ठति जागरे ।
तथा चतुर्भुजो भूत्वा हृता विश्वस्मृतिस्तदा ॥ ६४९ ॥
सूर्ये लुप्ता यथा कान्तिर्मेघा लुप्यंति खे यथा ।
अकूपारो वर्धितोऽपि स स्वस्मिन्नेव लीयते ॥ ६५० ॥
विलोक्यार्जुनहार्दं च यासीद्विश्वपटावृतिः ।
समुद्घाट्य च सैवात्र संप्रसृत्यैव दर्शिता ॥ ६५१ ॥
तद्दीर्घत्वं रंगरूपे विलोक्य ग्राहकस्तदा ।
यतः पार्थो न जग्राह पटः पूर्ववदावृतः ॥ ६५२ ॥
यद्विश्वरूपाकारेण व्याप्तमासीज्जगत्त्रयम् ।
तदेव सौम्यमभवत्साकारं च चतुर्भुजम् ॥ ६५३ ॥
अस्त्वेवं यदनंतेन सौम्यं कृत्वा निजं वपुः ।
आश्वासितस्तदा पार्थः श्रीकृष्णेन क्षणात्पुनः ॥ ६५४ ॥
कश्चित्स्वर्गं गतः स्वप्नेऽप्यकस्माज्जागृतस्ततः ।
यथाश्चर्यं भाति तस्य पार्थाय समभूत्तथा ॥ ६५५ ॥
यदा भवेद्गुरुकृपा तत्त्वज्ञानं तदा भवेत् ।
तथा दृष्ट्वा कृष्णरूपं पार्थोऽप्यंतरतुतुपत् ॥ ६५६ ॥
मनस्यकल्पयच्चैवं यद्विश्वपटलांततः ।
चतुर्भुजं तिरोभूतं तत्साक्षादधुनाऽभवत् ॥ ६५७ ॥

---

१ विश्वरूपवस्त्रस्याकृतिः=घडीति भाषायाम्

किंतु कालो जितो वाद्य महावायुश्च हारितः ।
किं वा स्वबाहुबलतो लंघिताः सप्त सागराः ॥ ६५८ ॥
यथा तोषो भवेत्तेन दुःशक्येन कृतेन हि ।
तथाऽभूदुग्रलोपेन चतुर्भुजनिदर्शनात् ॥ ६५९ ॥
ततः सूर्यास्तसमये भांति भानि नभस्तले ।
तथा दृष्टा लोकसंघाः पृथिव्यां पूर्ववत्तदा ॥ ६६० ॥
पुनर्दृष्टाः कुरुक्षेत्रे गोत्रजाश्चोभयोर्दले ।
शस्त्राणि वीरा वर्षंतो नैके पार्थेन सर्वतः ॥ ६६१ ॥
स्वकीयोऽपि रथो दृष्टस्तत्रत्ये बाणमंडपे ।
लक्ष्मीकांतश्च धूःसंस्थो रथाधश्च स्वयं स्थितः ॥ ६६२ ॥

दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ।
इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥ ५१ ॥

यथाऽर्थितं तथा दत्तं सर्वं देवेन तत्क्षणे ।
तद्दृष्ट्वैवाब्रवीत्पार्थो जीवितोऽस्मीति भाति माम् ॥ ६६३ ॥
बुद्धिमुज्झित्य यज्ज्ञानं वने बभ्राम भीतितः ।
तथाऽहंकारेण साकं मनोऽभ्रमदितस्ततः ॥ ६६४ ॥
स्वं विस्मृतानींद्रियाणि शब्दहीना च वागभूत् ।
एवं शरीरग्रामेऽस्मिन्दुरवस्थाऽभवन्मम ॥ ६६५ ॥
मुहुस्तस्याखिलस्यापि संप्राप्ता पूर्ववत्स्थितिः ।
यद्दृष्ट्या स्वेप्सिता शश्वत्कृष्णमूर्तिश्चतुर्भुजा ॥ ६६६ ॥
अंतरेवं सुखाविष्टोऽब्रवीत्कृष्णं तदार्जुनः ।
देव ते मानुषं रूपं दृष्टमद्येप्सितं मया ॥ ६६७ ॥
स्वापत्याय यथा माता प्रेम्णा पाययति स्तनम् ।
सांत्वयत्युद्धतं चापि कृतं देव तथा मम ॥ ६६८ ॥
विश्वरूपसमुद्रेऽहमासं व्यामाचवीचिकः ।
त्वया चतुर्भुजद्रोण्या प्राप्तोऽस्म्यद्य ततस्तटे ॥ ६६९ ॥

१ उभं निश्वरूपं तस्य तिरोधानेन. २ व्यामेन बाह्वोरंतरेण आत्ताः आक्रा वीचयो येन.

दर्शितं द्वारकाधीश नहीदं विश्वदर्शनम् ।
किंतु मरुसदृशे शुष्कतरौ वृष्टो घनस्त्वया ॥ ६७० ॥
किंवाऽऽर्त तृषितो देव संप्राप्तश्चामृतोदधिः ।
प्राप्तश्च तेन विश्वासो जीवितोऽसीति निश्चितम् ॥ ६७१ ॥
हृदंगणे ममाप्यद्य रूढा हर्षलताः स्वयम् ।
अद्यानंदेन संजातः संगमः कृपया तव ॥ ६७२ ॥

श्रीभगवानुवाच ।

सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ।
देवा अप्यस्य रूपस्य नित्यं दर्शनकांक्षिणः ॥ ५२ ॥

अर्जुनेनैवमुक्ते तु कृष्णः प्रोवाच तं प्रति ।
ब्रूहि मैवं, विश्वरूपे विश्वासं कुरु सर्वदा ॥ ६७३ ॥
भज भक्त्या चतुर्बाहुं याह्यदृष्टैव केवलम् ।
एवं यत्पूर्वमेवोक्तमद्य किं विस्मृतं त्वया ॥ ६७४ ॥
पार्थांधस्य करे प्राप्तो मेरुः स्वर्णमयोऽपि हि ।
स मच्चित्ते लघुर्भाति मनोवृत्तिरनीदृशी[1] ॥ ६७५ ॥
मया महद्विश्वरूपं दर्शितं पुरतस्तव ।
यच्छंकरोऽपि तपसा न कदाचिदवाप्तवान् ॥ ६७६ ॥
अष्टांगयोगा यैः कष्टात्साधिता अपि योगिभिः ।
सुदुर्दर्शमिदं तेषां विश्वरूपं ममेदृशम् ॥ ६७७ ॥
तदेकदालोकयामः किंचिद्रूपमितीच्छताम् ।
सर्वेषामपि देवानां वृथायुर्गतमर्जुन ॥ ६७८ ॥
मस्तकेऽञ्जलिमाधाय पिपासाकुलिताः सदा ।
विलोकयन्तश्चाकाशं मेघार्थं चातका यथा ॥ ६७९ ॥
तथा सुरगणाः सर्वे यद्दिदृक्षार्थमाकुलाः ।
प्रत्यहं प्रहरानष्टौ यच्च ध्यायंत्यनारतम् ॥ ६८० ॥
न तेषु केन स्वप्नेऽपि विश्वरूपं विलोकितम् ।
अनायासेन तद्दिव्यं साक्षाद्दृष्टं त्वयाऽर्जुन ॥ ६८१ ॥

1 अनीदृशी अनवस्थां प्राप्ता.

नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥ ५३ ॥

अवगंतुं विश्वरूपं साधनानि न संति हि ।
अतो निगम-शास्त्राणि मूकीभूय स्थितान्यलम् ॥ ६८२ ॥
विश्वरूपस्य पंथानं गंतुं तत्प्राप्तये स्वतः ।
कस्यापि तपसः शक्तिः सर्वथा नैव विद्यते ॥ ६८३ ॥
यथा त्वया विश्वरूपमनायासेन लक्षितम् ।
सुलभं न तथान्यस्य यज्ञैर्दानैर्व्रतैरपि ॥ ६८४ ॥
तथैकेनैव योगेन लब्धुं शक्योऽहमर्जुन ।
अनन्या दृढता भक्तिर्विद्येत यदि मां स्वतः ॥ ६८५ ॥

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥ ५४ ॥

तत्रैवमीप्सिता भक्तिरनन्यगतिका दृढा ।
यथा पर्जन्यधाराणां गतिर्नास्ति महीं विना ॥ ६८६ ॥
किंवा भागीरथी यद्वद्गृहीत्वा जलसंचयम् ।
अनन्यगतिकीभूय यथा गच्छति सागरम् ॥ ६८७ ॥
तथा करोति यः प्रेमात्यंतं भावपुरःसरम् ।
स्यान्मद्रूपे स्थितिस्तस्य सोऽन्ते मद्रूपतां व्रजेत् ॥ ६८८ ॥
आदौ मध्येऽन्तेऽपि यथा मधुरः क्षीरसागरः ।
तथैव कालत्रयेऽपि व्यापकत्वात्समोऽस्म्यहम् ॥ ६८९ ॥
तथा प्रारभ्य मां यावद्यत्सर्वत्रापिपीलिकाम् ।
क्वापि मद्भजने यस्य द्वैतमल्पं न विद्यते ॥ ६९० ॥
यदैवं वृत्तिरंतः स्यात्तदा विश्वावबोधनम्[1] ।
बोधे स्वाभाविकी दृष्टिस्तद्वद्भवति तत्क्षणम् ॥ ६९१ ॥
यथा प्रज्वालिते काष्ठे काष्ठशब्दो विलुप्यते ।
सदेव स्याद्वह्निरूपं प्रज्वलन्मूर्तिमद्यथा ॥ ६९२ ॥

---

[1] विश्वं विराट्‌रूपम्.

न यावदुदितः सूर्यस्तावद्ध्वांतमयं नभः ।
सूर्योदये तु सर्वत्र प्रकाशः स्याद्यथोज्वलः ॥ ६९३ ॥
तथा मद्रूपानुभवेऽहंकारोऽपि विलुप्यते ।
तस्य लोपे द्वैतभावः सहजं नश्यति क्षणात् ॥ ६९४ ॥
ततोऽहं त्वं च सकलमहमेवास्मि केवलम् ।
बहुना किं निश्चलः सन्सामरस्यं स विंदति ॥ ६९५ ॥

मत्कर्मकृन्मत्परमो मद्भक्तः संगवर्जितः ।
निर्वैरः सर्वभूतेषु यः स मामेति पांडव ॥ ५५ ॥

योऽखिलान्यपि कर्माणि मत्प्रीत्यर्थं करोति हि ।
तथाच मामृते यस्य नान्यदस्ति प्रियं क्वचित् ॥ ६९६ ॥
यस्येहामुत्र सकलमहमेवास्मि केवलम् ।
तथैव जीवितफलं मदर्थं येन रक्षितम् ॥ ६९७ ॥
यो भूतशब्दं विस्मृत्य तत्र मामेव पश्यति ।
अतो भूतेषु निर्वैरः सर्वत्र भजते स माम् ॥ ६९८ ॥
एवंभूतस्य भक्तस्य यदा देहः प्रणश्यति ।
स तदा निर्ममो भूत्वा मत्स्वरूपोऽवतिष्ठते ॥ ६९९ ॥
एवं ब्रह्मांडोदरेण करुणारसवार्धिना ।
श्रीकृष्णेनार्जुनायोक्तमित्येवं प्राह संजयः ॥ ७०० ॥
ततः पांडुकुमारोऽपि महानंदप्लुतोऽभवत् ।
चतुरः कृष्णसेवायामेकोऽसौ जगतीतले ॥ ७०१ ॥
कृष्णमूर्तिद्वयं तेन सम्यगालोचितं हृदि ।
तस्य लाभोऽभवद्विश्वरूपादधि चतुर्भुजे ॥ ७०२ ॥
परं पार्थविचारोऽयं श्रीकृष्णायारुचन्नहि ।
न श्रेष्ठं व्यापकादसादेकदेश्यवलंबनम् ॥ ७०३ ॥

१ द्वयं विश्वरूपं चतुर्भुजं च. २ अधि=अधिकम्.

तदिदं विशदीकर्तुं शार्ङ्गी सदुपपत्तिभिः ।
समर्पकैश्च दृष्टांतैर्युक्त्या पार्थमबोधयत् ॥ ७०४ ॥
श्रुत्वा सुभद्राजानिस्तद्विचारमकरोद्धृदि ।
उभयोः कतरच्छ्रेष्ठं पृच्छाम्यग्रे मुहुः प्रभुम् ॥ ७०५ ॥
एवं विचार्य मनसि स्वेच्छापूरणहेतवे ।
स प्रक्ष्यति कथं पार्थः शृणुताग्रेऽथ तत्कथाम् ॥ ७०६ ॥
ओवीछंदेन सुलभां विनोदेन कथां ब्रुवे ।
निवृत्तिपादप्रसादाज्ज्ञानराजोऽब्रवीत्पुनः ॥ ७०७ ॥
आदाय स्वांजलौ भक्त्या पुष्पाण्योवीमयान्यलम् ।
चित्तस्थविश्वरूपांघ्र्योरर्पितानि तदाप्तये ॥ ७०८ ॥

इति श्रीज्ञानेश्वरविरचितायां भावार्थदीपिकायां अनंतनिरूपणे
एकादशोऽध्यायः ॥ ११ ॥

श्लोकाः ५५ नवश्लोकाः ७०८

श्रीकर्णज्ञानेश्वरी

द्वादशोऽध्यायः

शुद्धे कृपे जयजय प्रसिद्धौदार्यरूपिणि ।
मातर्निरंतरानंदवर्षणं त्वं करोपि च ॥ १ ॥
विषयव्यालसंदष्टो मनुजो याति मूर्च्छनाम् ।
परं भवत्कृपादृष्ट्या निर्विषो भवति क्षणात् ॥ २ ॥
प्रसादरसकल्लोलैराप्लासि करुणे यदि ।
कस्तप्येद्भवतापेन दहेच्छोकानलेन कः ॥ ३ ॥
लभंते भवतो भक्ता मंगलं योगजं सुखम् ।
अहं ब्रह्मेति ब्रुवतां त्वं पूरयसि कांक्षितम् ॥ ४ ॥
भक्तानाधारशक्त्यंके वर्धयस्यतिकौतुकात् ।
हृदयाकाशपर्यंकेऽप्यांदोलयसि बालवत् ॥ ५ ॥
ज्योतिषाऽऽरार्तिकं कृत्वा मनःपवनखेलनम् ।
तथात्मसौख्यालंकारान्धारयस्यनिशं स्वयम् ॥ ६ ॥
दत्से जीवकलास्तन्यं हंस-सोऽहं प्रगायसि ।
समाधिसुखबोधेन स्वापयस्यनिशं च तान् ॥ ७ ॥
जननी साधकानां त्वं त्वत्तः सौरस्वतोद्गमः ।
भवदीयामतश्छायां न त्यजामि गुरोः कृपे ॥ ८ ॥
हे सद्गुरुकृपादृष्टे त्वत्कारुण्यं य आश्रयेत् ।
विद्यासृष्टेः सोऽखिलाया धाता भवति केवलम् ॥ ९ ॥
तस्माच्छ्रीमति मातस्त्वं भक्तकल्पलते शिवे ।
आज्ञापय स्वदासं मां गीताग्रंथनिरूपणे ॥ १० ॥

---

१ आधारशक्तिर्योगसाधनप्रसिद्धा. २ प्रत्यग्ज्योतिःप्रकाशेन. ३ बालक्रीडा-साधनानि. ४ अखिलविद्याप्राप्ति.

पूरयाब्धिं नवरसैर्भर रत्नाकरान्बहून् ।
भावार्थपर्वतानेव वर्धयस्व समंततः ॥ ११ ॥
देशभाषामहीं खात्वा साहित्यस्वर्णयुक्खनिम् ।
उद्घास्य रोपयानेका विवेकलतिकास्ततः ॥ १२ ॥
वादफलनिधानानि प्रमेयोद्यानवंति च ।
संवर्धयाशु सर्वत्र गहनानि निरंतरम् ॥ १३ ॥
पाखंडकुहराण्यद्य वितंडान्मूलतः खन ।
कुतर्कप्राणिनो दुष्टान्सर्वथैव विनाशय ॥ १४ ॥
मां योजयावधानेन श्रीकृष्णगुणकीर्तने ।
श्रोतॄन्छ्रवणसाम्राज्ये सावधानान्विधेह्यतः ॥ १५ ॥
मन्महाराष्ट्रनगरे ब्रह्मविद्यां समर्पय ।
दानादाने सुखस्यैव विश्वस्मिन्वर्धयाधुना ॥ १६ ॥
पल्लवं स्वकृपायास्त्वं प्रावारय ममोपरि ।
येनात्रोपस्कृतं मातः करिष्यामि यथासुखम् ॥ १७ ॥
एवमुक्ते सविनयं कृपया गुरुराह तम् ।
शीघ्रमारभ गीतार्थं मास्त्विदं बाह्यभाषणम् ॥ १८ ॥
महाप्रसादं गुर्वाज्ञां मत्वाऽथानंदतोऽब्रवीत् ।
गीताप्रबंधं वक्ष्येऽद्य शृणुध्वं श्रोतृसत्तमाः ॥ १९ ॥

अर्जुन उवाच ।

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥ १ ॥

ततो विक्रांताधिराजः सोमवंशजयध्वजः ।
अब्रवीन्महदुत्साहात्पांडुपुत्रोऽर्जुनस्तदा ॥ २० ॥
कृष्णं प्राह त्वया यन्मां विश्वरूपं प्रदर्शितम् ।
तदद्भुतं समालोक्य तेन भीतोऽस्म्यहं हृदि ॥ २१ ॥

---

१ यादसारयसंवादः.

नित्यं परिचितेयं ते मूर्तिरेव प्रिया मम ।
तथापि तां मा भजेति त्वयैवाहं निवारितः ॥ २२ ॥
व्यक्तं रूपं तथाऽव्यक्तं निर्भ्रांतमुभयं भवान् ।
व्यक्तं संप्राप्यते भक्त्या योगेनाऽव्यक्तमाप्यते ॥ २३ ॥
भवत्प्राप्त्यर्थमेवेदं देव मार्गद्वयं स्मृतम् ।
सगुणं निर्गुणं चेति यद्द्वाराभिनिवेश्यते ॥ २४ ॥
शतभारस्वर्णकपो वल्लमात्रे स एव हि ।
अतः स्वल्पे व्यापके च साम्यं योग्यतयोभयोः ॥ २५ ॥
यत्सुधापूर्णजलधेर्याऽमृतस्यास्ति योग्यता ।
तद्वच्चुलुकमात्रस्य प्रभाव उभयोः समः ॥ २६ ॥
विचारणायां मच्चित्ते प्रतीतिर्विद्यते खलु ।
तथापि त्वां योगपते पृच्छामि दृढताकृते ॥ २७ ॥
क्षणं यत्स्वीकृतं देव विश्वरूपं त्वया प्रभो ।
तत्किं सदैव लीला वा ज्ञातुमिच्छामि तत्त्वतः ॥ २८ ॥
तथैव येषां त्वं कर्म त्वमेवासि परं तथा ।
भवदर्थं मनोधर्मा विक्रीताः सर्वथैव यैः ॥ २९ ॥
एवंविधैर्भवद्भक्तैर्यैव मूर्तिर्निरंतरम् ।
अंतर्विचिंत्य भावेन श्रीहरे पर्युपासिता ॥ ३० ॥
यदोंकारात्परतरं स्तोतुं वाग्यत्र कुंठिता ।
न लभ्यते यत्तुलायां त्रैलोक्ये वस्तु किंचन ॥ ३१ ॥
यच्चास्त्यक्षय्यमव्यक्तं स्थाननामादिवर्जितम् ।
भजंति यज्ज्ञानिनोऽपि सोहंभावेन सर्वदा ॥ ३२ ॥
एवं भक्ता ज्ञानिनश्च को यथार्थस्तयोभयोः ।
योगी वाप्यथ भक्तो वा ब्रूह्यनंत ममाग्रतः ॥ ३३ ॥
एवं पार्थवचः श्रुत्वा कृष्णोऽत्यंतमतूतुषत् ।
उवाच मार्मिकं प्रश्नं प्रष्टुं सुज्ञोऽसि पांडव ॥ ३४ ॥

---

१ स्वर्णपरीक्षणशिलायां निर्णीतं स्वरूपम्.

श्रीभगवानुवाच ।

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ २ ॥

अस्ताचलोपत्यकायां पश्चाद्याते रवौ क्षणात् ।
तमेवानुसरंतिस्म किरणास्तत्प्रभापि च ॥ ३५ ॥
किंवा वर्षासु सरितो वृद्धिमायांति सर्वतः ।
पार्थ मां भजतां तद्वच्छ्रद्धा वृद्धिं प्रयाति हि ॥ ३६ ॥
किंवा प्रविष्टा गंगाऽब्धौ पुनश्चापि विवर्धते ।
जलपूरः प्रवहति तद्वत्प्रेमास्ति यस्य हि ॥ ३७ ॥
न जानंति दिवारात्रिं कायवाङ्मानसैः सह ।
मयि चित्तं समावेश्य भजंत्यर्जुन मां प्रति ॥ ३८ ॥
एवं ये सर्वथा भक्ताः स्वात्मानं ह्यर्पयंति माम् ।
योगयुक्तांश्च तानेव श्रेष्ठान्मन्ये सदाऽर्जुन ॥ ३९ ॥

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।
सर्वत्रगमचिंत्यं च कूटस्थमचलं ध्रुवम् ॥ ३ ॥

ये ज्ञानयोगिनो ब्रह्म निराकारं स्वतश्च ते ।
सोहंभावेन संयुक्ताश्चोपासंते सदाऽक्षरम् ॥ ४० ॥
यं चिंतितुं मनोऽशक्तमगम्यं चापि यद्धियः ।
तत्कथं गोचरं भूयादिंद्रियाणां जडात्मनाम् ॥ ४१ ॥
ध्यानायात्यंतगूढं यदेकस्थाने न लभ्यते ।
कस्यापि वस्तुनो यस्मिन्नाकारो नैव विद्यते ॥ ४२ ॥
यच्च सर्वत्र संपूर्णं विद्यमानं निरंतरम् ।
यस्य प्राप्तौ चिंतनादि स्वभावादेव लुप्यते ॥ ४३ ॥
न जातं नोत्पत्स्यते यन्नास्त्यस्तीति द्विधोदितम् ।
अतस्तत्प्राप्तिविषये नोपायोऽस्ति कुतश्चन ॥ ४४ ॥
न चलं नाऽचलं यच्च समाप्तं मलिनं न च ।
स्वीयशक्तिबलेनैव स्वस्वाधीनं च यैः कृतम् ॥ ४५ ॥

संनियम्यैंद्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवंति मामेव सर्वभूतहिते रताः ॥ ४ ॥

यूथानि विषयाणां यैर्वैराग्याग्नौ हुतानि च ।
उच्छृंखलानींद्रियाणि स्वधैर्येणावृतान्यपि ॥ ४६ ॥
यमादियोगसिद्ध्यर्थं विषयाश्चेंद्रियाणि च ।
समाकृष्टानि हृदयकपाटे स्वस्य संततम् ॥ ४७ ॥
रुद्धाऽपानकवाटं यैर्बध्वा चासनमुद्रिकाम् ।
मूलबंधस्यापि दुर्गमुच्छ्रितं पार्थ सर्वशः ॥ ४८ ॥
आशाबंधाश्च यैश्छिन्ना भिन्ना धैर्यकटास्तथा ।
निद्रारूपाणि ध्वांतानि विध्वस्तानि प्रयत्नतः ॥ ४९ ॥
एवं वज्राग्निज्वालाभिः सप्तधातून्विदाह्य च ।
शतघ्नीभिः पूजितानि व्याधिशीर्षाणि यैस्तथा ॥ ५० ॥
ततः कुंडलिनीस्तंभमाधारे चोच्छ्रयंति ये ।
मस्तकांतं तत्प्रभया गच्छंत्यूर्ध्वं प्रयत्नतः ॥ ५१ ॥
नवद्वारकवाटानि रुद्धा संयमदंडतः ।
सुषुम्णायाश्च पंथानं मुक्तं कुर्वत्यहर्निशम् ॥ ५२ ॥
स्वप्राणशक्तिचामुंडां संकल्पाऽजासृजा तथा ।
मनोमहिषमुंडादिबलिभिस्तर्पयंति च ॥ ५३ ॥
इडापिंगलयोरैक्यात्कुर्वंत्यनुहतध्वनिम् ।
तत्क्षणं जीवनकलासरः प्राप्स्यंति योगिनः ॥ ५४ ॥
सुषुम्णामध्यविवरे यास्ति सोपानपद्धतिः ।
तामारुह्य ब्रह्मरंध्रं मूर्धस्थं यांति पांडव ॥ ५५ ॥
मकाररूपं सोपानमारुह्य गहनं ततः ।
हृदाकाशं समाक्रम्य ब्रह्मरंध्रं प्रयांति ते ॥ ५६ ॥
एवं च ते समधियः सोहंसिद्ध्यर्थमुत्सुकाः ।
योगमार्गं साधुवंति बहुलायासमंतरा ॥ ५७ ॥

---

१ वज्राग्निर्मूलबंधाग्नि. २ आधारे तन्नामकचक्रे.

एवं हस्तस्थितमिवाप्नुवंति ब्रह्म निर्गुणम् ।
योगेन यतमानाश्च सुखेनैवाप्नुवंति माम् ॥ ५८ ॥
प्राप्तयोगबलेनापि मत्प्राप्तेरन्यदिष्यते ।
न लभ्यते किंचिदपि क्लेशो भवति केवलम् ॥ ५९ ॥

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ ५ ॥

मूर्तं हितं प्राणिनां यद्यदव्यक्तमनाश्रितम् ।
मुक्तिं विनेदृशं ब्रह्म प्राप्तुमिच्छंति ये भुवि ॥ ६० ॥
तान्महेंद्रपदादीनि मोहयंत्यनिशं पथि ।
ऋद्धिसिद्ध्यादिद्वंद्वानि व्यामोहं जनयंति च ॥ ६१ ॥
कामक्रोधविकारांश्च प्राप्नुवंत्यनिवारिताः ।
शरीरं ब्रह्मणा साकं बोधनीयं भवत्यपि ॥ ६२ ॥
निघ्नंति तृषया तृष्णां भक्षयंति क्षुधा क्षुधम् ।
मीयन्ते हि तथा वायुं व्यामेनैव दिवानिशम् ॥ ६३ ॥
दिवाऽऽतपे च शयनमिंद्रियाणां च निग्रहः ।
मित्रभावं समाश्रित्य वृक्षैः संभाषणं तथा ॥ ६४ ॥
ये प्रावृण्वंति सूर्यौष्ण्यं शीतं संवेष्टयंति च ।
पर्जन्यधारासारेऽपि निवसंति निरंतरम् ॥ ६५ ॥
पतिं विनाऽऽग्निप्रवेशकरणं दुष्करं यथा ।
तथैवैनं विद्धि पार्थ योगाभ्यासं सुदुष्करम् ॥ ६६ ॥
पत्यर्थं न प्रवेशोऽयं न कुलाचारतस्तथा ।
किंत्विदं मृत्युना सार्धं युद्धं नव्यप्रकारतः ॥ ६७ ॥
मृत्युतोऽपि च यत्तीक्ष्णं तप्तक्ष्वेडाशनं यथा ।
किमाननं न स्फुटति ग्रावपर्वतभक्षणे ॥ ६८ ॥
अतो योगेन ये ब्रह्मप्राप्तिमिच्छंति साधितुम् ।
तेषां दैवे निश्चयेन दुःखभोगोऽस्ति केवलम् ॥ ६९ ॥

१ व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगंतरम्.

दंतभग्नेन लोहानां चणकानां हि भक्षणे ।
किं तेनोदरपूर्तिः स्यान्मरणं वा निमंत्रितम् ॥ ७० ॥
अथवा सागरस्तर्तुं बाहुभ्यां किं क्षमो भवेत् ।
किंवाऽकाशे निरालंबे पङ्गुर्गंतुं क्षमं क्वचित् ॥ ७१ ॥
युद्धांगनमसंप्राप्य प्रहारानविषह्य च ।
कथं स्यात्सूर्यलोकस्य प्राप्तिः पांडव दुर्लभा ॥ ७२ ॥
अथवा वायुना स्पर्धां खंजः कर्तुं कथं क्षमः ।
देहाभिमानिनां तद्वद्ब्रह्मप्राप्तिः सुदुर्लभा ॥ ७३ ॥
धैर्यं धृत्वातःपरं ये स्पर्धंते वियतः समम् ।
ते निश्चयेन जानीहि मनुजाः क्लेशभागिनः ॥ ७४ ॥
सगुणोपासका ये च भक्तिमार्गावलंबिनः ।
तेभ्यः कष्टा असंख्याता भवंत्यर्जुन सर्वदा ॥ ७५ ॥

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायंत उपासते ॥ ६ ॥

स्ववर्णाश्रमधर्मेण सदा कर्मेंद्रियैः स्वकैः ।
आचरंति स्वकर्माणि नित्यान्यादरपूर्वकम् ॥ ७६ ॥
कर्तव्यानि समादृत्य निषिद्धानि त्यजंति च ।
तथा फलानि मय्यर्प्य भर्जयित्वा त्यजंति च ॥ ७७ ॥
एवं कृतानि कर्माणि सदा कृत्वाऽर्पयंति माम् ।
तैः कृतान्यपि कर्माणि न कृतानि भवंति हि ॥ ७८ ॥
कायेन वाचा मनसा ये ये भावा भवंति च ।
न तेषां मद्दतेऽन्यत्र क्वापि प्रवणता भवेत् ॥ ७९ ॥
एवं विलीय मद्रूपे कुर्वते मम चिंतनम् ।
तदंतःकरणे ध्यानान्मदीयं भवनं सदा ॥ ८० ॥
व्यवहारं मया प्रेम्णा कृत्वा कृत्स्नं निरंतरम् ।
भोगमोक्षादिकाः कांक्षाः परित्यक्ताश्च यैः सदा ॥ ८१ ॥
यैः स्वदेहमनःप्राणाः सर्वथैव मदर्पिताः ।
तेषामखिलकर्तव्यं सर्वदैव करोम्यहम् ॥ ८२ ॥

तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि नचिरात्पार्थ मय्यावेशितचेतसाम् ॥ ७ ॥

किं वा वच्म्यधिकं पार्थ मात्रा यः स्वोदरे धृतः ।
किं वाच्यं तत्सुहृदयस्य वात्सल्यस्य च वैभवम् ॥ ८३ ॥
कीदृशाः संतु मद्भक्तास्तच्छत्रूणां निवारणे ।
तत्परोऽस्मि दिवारात्रं बद्धः परिकरो मया ॥ ८४ ॥
तेषां सांसारिकी चिंता न कदापि समुद्भवेत् ।
किं श्रीमतो गृहस्थस्य कांता भिक्षार्थमाव्रजेत् ॥ ८५ ॥
तथैव संति ये भक्ताः परिवारा ममैव ते ।
तेषां क्लेशाद्यहरणे लज्जा मामेव सा भवेत् ॥ ८६ ॥
जन्ममृत्यब्धिकल्लोलैः सृष्टिर्ब्रुडति सर्वदा ।
तदालोच्यैव मच्चित्ते संतापो जायतेऽर्जुन ॥ ८७ ॥
भवाब्धिवृद्धिजा भीतिर्न भीपयति कातरान् ।
भक्ता अपि च तां दृष्ट्वा प्राप्नुवंति सदा भयम् ॥ ८८ ॥
तदर्थं रामकृष्णादीनवतारान्विधृत्य च ।
व्रजामि तत्तद्ग्रामेषु सावधानो युगे युगे ॥ ८९ ॥
मन्नामनौका निर्माय सुदृढाश्च सहस्रशः ।
संसारसागरे शश्वत्तेषां संतारकोऽस्म्यहम् ॥ ९० ॥
उपाधिरहिता भक्ता ध्यानमार्गे नियोजिताः ।
परिवारा नामरूपनौकायां स्थापिताः परम् ॥ ९१ ॥
तथा केषांचिदुदरे संबध्य प्रेमपेटिकाम् ।
मुक्तिरूपतटाके तानानीय स्थापयाम्यहम् ॥ ९२ ॥
तथा केचन ये भक्ताः पशुजातिसमुद्भवाः ।
तेऽपि गंतुं विष्णुलोकं पात्रीभूताः कृता मया ॥ ९३ ॥
तथैव मम भक्तानां चिंतालेशो न विद्यते ।
तेषां संरक्षणायास्ति बद्धः परिकरो मया ॥ ९४ ॥
ये स्वात्मनश्चित्तवृत्तिं मयि भक्त्यार्पयंति हि ।
त एव मां गुंठयंति स्वीयप्रेम्णि निरंतरम् ॥ ९५ ॥

अतो ब्रवीमि त्वां पार्थ भक्तिमार्गं त्वमिच्छसि ।
अयमेव तदा मंत्रो मनो मयि निधापयेत् ॥ ९६ ॥

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥ ८ ॥

पार्थ पूर्वं मनोऽस्वंतं बुद्धिनिश्चयसंयुतम् ।
स्थिरं कृत्वा मत्स्वरूपे स्थापय त्वमनारतम् ॥ ९७ ॥
मानसं चैव बुद्धिश्च प्रेम्णा मय्यर्पयिष्यसि ।
विनायासं तदा मह्यं प्राप्स्यसे त्वं धनुर्धर ॥ ९८ ॥
चेन्मनोबुद्धिरुभयं स्वभावेनार्पितं मयि ।
तदाऽहंत्वंभावनापि क्वचिन्नोवैरिता भवेत् ॥ ९९ ॥
यथा निर्वातिते दीपे प्रकाशो लुप्यति क्षणात् ।
सूर्ये याति यथा चास्तं तेजो गच्छति तत्समम् ॥ १०० ॥
प्राणप्रयाणसमये प्रस्थास्यंतींद्रियाण्यपि ।
गतिर्यत्र मनोबुद्ध्योरहंकारोऽनुगच्छति ॥ १०१ ॥
तस्मात्स्वयं मनोबुद्धी मत्स्वरूपे निवेशय ।
तेनाऽहं व्यापको यावांस्तावान्भवसि पांडव ॥ १०२ ॥
उक्ते मद्वचने पार्थ नाऽसत्यं विद्यते क्वचित् ।
एतच्छपथपूर्वं त्वां कथयामि पुनः पुनः ॥ १०३ ॥

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय ॥ ९ ॥

मनोबुद्ध्योः समं चित्तं मयि चेत्पूर्णमर्जुन ।
यत्नेनापि स्थापयितुमसमर्थो भवान्यदि ॥ १०४ ॥
तदाऽष्टप्रहरेष्वेकक्षणं स्वस्थतया मयि ।
सर्वतोऽपि मनो युंक्ष्व पार्थ सर्वाश्रयाश्रये ॥ १०५ ॥
यावत्कालं त्वन्मनसोऽर्जुन संगो भवेन्मम ।
तावत्स्वयं विलुप्ताः स्युः सकला विषयैषणाः ॥ १०६ ॥
यथा शरदि संप्राप्ते नद्यः स्युर्न्यूनजीवनाः ।
तथा मत्संगमाच्चित्तं संसाराद्विरमिष्यति ॥ १०७ ॥

किंवा शशी पूर्णिमातोऽहर्दिवं क्षीणतां व्रजेत् ।
स चामायां सर्वथैव नामशेषो भवत्यपि ॥ १०८ ॥
विषयेभ्यस्तथा चित्तं परावृत्तं क्रमाद्भवेत् ।
निश्चयेन तदा पार्थ मत्स्वरूपं भवेत्क्षणात् ॥ १०९ ॥
यं शंसंत्यभ्यासयोगं सोऽयमेव सुनिश्चितः ।
अनेनाप्यनवाप्यं च वस्तु लोके न विद्यते ॥ ११० ॥
केषांचिदभ्यासबलादंतरिक्षे गतिर्भवेत् ।
व्याघ्रसिंहादिभिः केऽपि स्नेहमापादयंति च ॥ १११ ॥
ते विषं पाचयंति स्म कुर्वंत्यब्धौ च पद्धतिम्[1] ।
वेदानपि जयंत्येके केवलाभ्यासयोगतः ॥ ११२ ॥
तस्मान्निरंतराभ्यासे किंचिन्नास्ति सुदुष्करम् ।
अतोऽभ्यासबलेनैव मामागच्छ त्वमर्जुन ॥ ११३ ॥

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि ॥ १० ॥

यद्यभ्यासेऽपि सामर्थ्यं पर्याप्तं नास्ति चेत्तव ।
तदा त्वं वर्तसे यद्वत्तद्वद्देवाऽऽचरन्वस ॥ ११४ ॥
नैवेंद्रियाणि रुध्यस्व विषयानपि न त्यज ।
ज्ञातीनामभिमानं च न त्यजार्जुन सर्वथा ॥ ११५ ॥
पालयस्व कुलाचारान्निषिद्धांस्त्यज यत्नतः ।
मुक्तत्वेन निजानिष्टान्व्यवहारान्कुरुष्व भोः ॥ ११६ ॥
कायेन वाचा मनसा स्वेष्टान्संपादय स्वतः ।
परं कर्तृत्वाभिमानं पार्थ मा कुरु सर्वथा ॥ ११७ ॥
सर्वं स एव संवेत्ति कार्यं चाकार्यमेव च ।
जगत्सर्वं चालयति यः परात्मा स्वयंजनिः ॥ ११८ ॥
न्यूनाधिकं भवेद्यच्च न विचारय तद्वृथा ।
एवं जीवितसाफल्यमात्मनः कुरु पांडव ॥ ११९ ॥

---

१ पद्धतिं=मार्गम्.

मालाकारो नयेद्यत्र पानीयं तत्र गच्छति ।
एवं सरलया वृत्त्या त्वया स्थेयं दिवानिशम् ॥ १२० ॥
ततः कृतस्याऽकृतस्य भारमात्मनि नोद्वह ।
तेन नित्यं चित्तवृत्तिर्मत्स्वरूपे रता भवेत् ॥ १२१ ॥
पंथा ऋजुर्वा वक्रो वा विचारयति नो रथः ।
यंता यत्र नयेत्तत्र याति वीरशिरोमणे ॥ १२२ ॥
तथा यद्यद्भवेत्कर्म तत्स्वल्पं वाऽधिकं स्वयम् ।
नोक्त्वा समर्पयेत्सर्वं मयि भावेन सर्वदा ॥ १२३ ॥
सर्वत्र भावनामेवं यद्यर्जुन करिष्यसि ।
तर्हि त्वं यासि मृत्यूर्ध्वं मोक्षधाम ममालयम् ॥ १२४ ॥

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥ ११ ॥

यद्येतदप्यशक्यं ते मयि कर्मार्पणं स्वतः ।
तर्हि यत्कथयिष्येऽहं तत्त्वं मनसि धारय ॥ १२५ ॥
मत्स्मृतिस्तेऽस्तु सततमाद्यंते च कर्मणाम् ।
तदशक्यं यदि भवेद्बुद्धेस्तव तदाऽर्जुन ॥ १२६ ॥
तर्हि तन्मास्तु किं तेन मद्ध्यासोऽपि च मास्तु ते ।
परं रक्ष सदा पार्थ बुद्धिमिंद्रियनिग्रहे ॥ १२७ ॥
यस्मिन्यस्मिन्पार्थ काले कर्माणि प्रभवंति च ।
तेषामपि तिलमात्रां न कुर्याः फलवासनाम् ॥ १२८ ॥
यथा वृक्षा लता वापि स्वफलानि न भुंजते ।
तथा स्वकर्मजन्यानि त्याज्यान्येव फलानि हि ॥ १२९ ॥
तथैव मां स्मरेच्चित्ते कुर्याद्वा तानि मत्कृते ।
फलार्थे स्यादुदासीनः क्रमेष्वपि च कर्मसु ॥ १३० ॥
यद्वदश्मनि पर्जन्यो वर्षा वा बीजवापनम् ।
स्वप्नलब्धद्रविणवत्कर्म मन्दस्य निष्फलम् ॥ १३१ ॥
यथा पितास्ति कन्यायामभिलाषविवर्जितः ।
तथा निरभिलाषः सन्कुर्यात्कर्माणि सर्वदा ॥ १३२ ॥

वह्निज्वाला यथा पार्थ यात्यूर्ध्वं गगने वृथा ।
तथा कर्मफलानां ते व्यर्था भवतु वासना ॥ १३३ ॥
पार्थ निष्कामकर्मेदं भायात्साधारणं तव ।
तथाप्यखिलयोगेभ्यः प्रधानोऽयं प्रकीर्तितः ॥ १३४ ॥
एवं कर्मफलत्यागो ह्यपुनर्जन्मकारणम् ।
प्रवृद्धा वेणवो यद्वद्वंध्यास्तिष्ठंति चोच्छ्रिताः ॥ १३५ ॥
तथाऽनेन शरीरेण मुक्तः स्यान्न पुनर्जनिः ।
सर्वथैव विनष्टा स्याज्जन्ममृत्य्वादियातना ॥ १३६ ॥
अतः कुर्याद्दृढाभ्यासं तेन ज्ञानार्जनं भवेत् ।
ज्ञानप्राप्त्या दर्शनं स्याद्ध्यानस्यार्जुन तत्त्वतः ॥ १३७ ॥
त्वन्मनोवृत्तयो ध्यानमालिंगंति तदा पुनः ।
कर्मप्रवृत्तिरखिला सहजं नाशमृच्छति ॥ १३८ ॥
कर्मणां दूरगमने फलत्यागः करे स्थितः ।
फलत्यागोत्तरं शांतिः परिपूर्णा भवेत्सुखम् ॥ १३९ ॥
मार्गः सुभद्राकांताऽयं शांतिलाभाय निश्चितः ।
अतस्त्वां कथयाम्यस्याभ्यासं कुरु निरंतरम् ॥ १४० ॥

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ।
ध्यानात्कर्मफलत्यागस्त्यागाच्छंतिरनंतरम् ॥ १२ ॥

अभ्यासाद्दुष्करं पार्थ ज्ञानं सदसदात्मकम् ।
तज्ज्ञानापेक्षया ध्यानं दुःसाध्यमधिकं तथा ॥ १४१ ॥
ततः कर्मफलत्यागः स ध्यानाच्छ्रेष्ठ उच्यते ।
त्यागादप्यधिकं ज्ञेयं शांतिसौख्यं तु योगिनाम् ॥ १४२ ॥
एवं मार्गमतिक्रम्य किरीटिंस्तदनंतरम् ।
ततः शनैः शांतिसौख्यं प्राप्नोषि ब्रह्म शाश्वतम् ॥ १४३ ॥

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहंकारः समदुःखसुखः क्षमी ॥ १३ ॥

ततो न स्याद्भूतमात्रे द्वेषो यद्वदयांतरे ।
आत्मनो विद्यते नैवाऽर्जुन स्वपरभावना ॥ १४४ ॥

उत्तमस्यादरः कार्य उपेक्षेताऽधमं तथा ।
इत्यादिकं न जानाति साम्येन वसुधा यथा ॥ १४५ ॥
राजदेहे निवस्तव्यं रंकात्स्थेयं च दूरतः ।
इत्येवं भेदभावश्च नात्मनोऽस्ति कृपावतः ॥ १४६ ॥
किंवा रूपं हरेयं गोर्व्याघ्रं हन्यां विषात्मना ।
इत्येवमुदकं नैव जानात्यर्जुन सर्वथा ॥ १४७ ॥
एवं च सर्वभूतेषु प्रेमैक्यं ह्यस्ति यद्धृदि ।
कृपाया आश्रयीभूतो यो भवेत्स्वयमेव हि ॥ १४८ ॥
कल्पना चाहंममेति यन्मनो न स्पृशत्यपि ।
तथाऽर्जुन सुखं दुःखं यं न स्पृशति कर्हिचित् ॥ १४९ ॥
पार्थ यस्य क्षमायां च धरण्यास्तुल्ययोग्यता ।
तेन स्वांके कृतं शश्वत्संतोषस्थानमात्मनः ॥ १५० ॥

संतुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥ १४ ॥

विना वर्षतुमुदधिः संततं जलपूरितः ।
उपचारैर्विना यश्च संतोषभरितः सदा ॥ १५१ ॥
स्वप्राणशपथं कृत्वाऽऽशृणोति स्वं मनश्च यः ।
निश्चयः सत्यतां याति यन्निश्चयबलेन हि ॥ १५२ ॥
यद्धृदंतर्जीवशिवौ प्रेमभावेन सर्वदा ।
एकासनसमारूढौ शोभेतेऽद्वयं मुदा ॥ १५३ ॥
योगवैभवसंपूर्णो यो बुद्धिमनसी सदा ।
मयि निःसीमभावेन समर्पयति भक्तितः ॥ १५४ ॥
अंतर्बहिर्यथासांगं स योगो येन साधितः ।
तथापि यस्य च प्रेमाऽनुरागो विद्यते मयि ॥ १५५ ॥
स एव पार्थ सद्भक्तः स योगी मुक्त एव च ।
स वल्लभाऽहं तत्कांत इत्येवं प्रेम तस्य मे ॥ १५६ ॥
नैतावत्केवलं प्रेम प्राणादप्यधिकोऽस्ति सः ।
तथापि रूपकमिदमपूर्णं विद्धि सर्वथा ॥ १५७ ॥

मोहपूर्णा प्रेमवार्ता मनोव्यामोहकारिणी ।
अवाच्येयं परं प्रेम वाचालयति मां ततः ॥ १५८ ॥
तदेतदर्थमस्माभिरुक्तं ह्युपमया सह ।
वास्तवे तु प्रेमकथा नैव वर्णयितुं क्षमाः ॥ १५९ ॥
पार्थास्तां खल्विदं सर्वं, वार्ताः कथयतो मम ।
प्रियाणामंतरे प्रेमाऽवृधद्द्वैगुण्यतोऽधिकम् ॥ १६० ॥
तत्र दैवात्प्रेमभक्तलाभाह्लादश्च यस्तयोः ।
किं वाच्यं तस्य माधुर्यं नोपमास्ति जगत्त्रये ॥ १६१ ॥
तस्माद्धे पांडुतनय प्रियः श्रोता त्वमेव च ।
अतः प्रिया भक्तवार्ताः कथितास्त्वत्पुरो मया ॥ १६२ ॥
पार्थातो वर्णयाम्यद्य योगोऽयं तु सुखास्पदः ।
एवमुक्त्वा तदाऽनंतः सुखेनांदोलितोऽभवत् ॥ १६३ ॥
स आहार्जुन रक्षामि यानहं चित्तमंदिरे ।
तल्लक्षणानि वच्मि त्वां भक्तानामवधारय ॥ १६४ ॥

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥ १५ ॥

पार्थ सिंधोर्जले क्षुब्धे नहि विभ्यंति तद्गताः ।
प्राणिनः, सिंधुरपि तान्प्राणिनो नह्युपेक्षते ॥ १६५ ॥
दृष्ट्वापि जगदुन्मत्तं न क्षुभ्नाति च यन्मनः ।
लोका अपि च न त्रस्ताः सहवासेन वारिधेः ॥ १६६ ॥
बहुना किं यच्छरीरं त्रस्यत्यवयवैर्न च ।
जीवान्सर्वानेकरूपान्ज्ञात्वा नोपेक्षते च तान् ॥ १६७ ॥
आत्मरूपं जगज्जातं प्रियाप्रियमतो गतम् ।
लुप्ता हर्षविषादाश्च द्वैतभावविनाशतः ॥ १६८ ॥
मुक्तः स सुखदुःखेभ्यो भयोद्वेगादिवर्जितः ।
ततो रतश्च मद्भक्तौ क्रमेणानंदसंप्लुतः ॥ १६९ ॥
मदं मोहो भवेत्तस्य तत्प्रेम किमु वर्ण्यते ।
बहुना किं, स मे जीवः सर्वस्वं नास्त्यतः परम् ॥ १७० ॥

य आत्मानंदसंतृप्तो मोक्षार्थं यस्य जन्म च ।
स पूर्णताश्रियः साक्षाद्वर्ततीति श्रेयमन्वहम् ॥ १७१ ॥

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः ॥ १६ ॥

न विद्यते पार्थ यस्मिन्कचित्सूक्ष्मापि वासना ।
यदस्तित्वं चात्मसुखं वर्धयत्यनिशं क्रमात् ॥ १७२ ॥
काशीक्षेत्रं मोक्षदानक्षमं यद्यपि विद्यते ।
तथापि तत्र मरणे मोक्षो भवति नान्यथा ॥ १७३ ॥
हिमाद्रिर्दोषहंतापि तत्र शीतभयं महत् ।
सज्जनानां शुचित्वस्य नास्त्यपायः कुतश्चन ॥ १७४ ॥
अस्ति गंगांभः पवित्रं पापतापनिवारकम् ।
तत्र भीर्विद्यतेऽन्यैव तस्यां जीवा ब्रुडंत्यपि ॥ १७५ ॥
भक्तिनद्यस्ति गंभीरा परं तन्मार्गगामिनः ।
न म्रियंते किंतु मोक्षं निश्चयेन व्रजंति ते ॥ १७६ ॥
साधूनां संगमाद्गंगा जगत्पापाद्विमोचयेत् ।
तत्संगमस्य पावित्र्यं वर्णनीयं किमर्जुन ॥ १७७ ॥
एवंभूतस्तु यो भक्तः शौचाचीर्थाश्रयो भवेत् ।
मनोमलान्समस्तान्यो ह्यापयेच्च दिशो दश ॥ १७८ ॥
सोऽवर्लोऽतर्वहिर्यश्च सूर्यवन्निर्मलः सदा ।
निधिं पश्येद्यथा पञ्जस्तथा ब्रह्म स पश्यति ॥ १७९ ॥
व्यापकः सच्चुदासी यो नित्यमाकाशवत्स्थितः ।
यन्मनो व्यापकमपि निर्लेपमवतिष्ठते ॥ १८० ॥
तस्य सांसारिकं नष्टमागता निरपेक्षता ।
व्याधहस्ताच्च्युतः पक्षी यथा गच्छति निर्भयः ॥ १८१ ॥
तथा सुखी स सततं कंचित्तुच्छं न पश्यति ।
यथा मृतो न जानाति लज्जा देहस्य कुत्रचित् ॥ १८२ ॥

१ पञ्ज =जन्मकाले मातुरुदरात्सद्यो नि सृतः.

कृतानां कर्मणां यस्य नाभिमानः कुतश्चन ।
यथा काष्ठं विना वह्निः सहजं नश्यति क्षणात् ॥ १८३ ॥
तथैव प्राप्यते शांतिरंते मोक्षं लभेदपि ।
दैवादिमानि प्राप्यंते विरक्तस्यापि जन्मिनः ॥ १८४ ॥
अस्तु, पार्थाऽतरे यस्य जागर्ति ब्रह्मभावना ।
स द्वैतस्यापरे तीरे प्राप्तोऽनायासतः क्षणात् ॥ १८५ ॥
सेव्यश्च सेवकश्चैव स्वयमेवेति वेत्ति यः ।
परं भक्तिसुखस्यार्थे सेवकत्वं समाश्रितः ॥ १८६ ॥
स्वस्मादन्यां च यो व्यक्तिं दृष्ट्वा भजति देववत् ।
रीतिं भक्तान्दर्शयति भजनस्य स योगवान् ॥ १८७ ॥
तस्यैव व्यसनं मह्यमखंडं तस्य चिंतनम् ।
किं बहूक्त्या समाधानं भासते तस्य दर्शनात् ॥ १८८ ॥
तदर्थमवतारो मे भूम्यां वासश्च तत्कृते ।
नीराजयामि तं शश्वत्पंचप्राणैः प्रियोत्तमम् ॥ १८९ ॥

यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति ।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥ १७

यो ब्रह्मप्राप्तिसदृशीं लब्धिमन्यां न मन्यते ।
अतोऽन्यभोगयोगेन महतापि न तुष्यति ॥ १९० ॥
यः स्वयं विश्वरूपोऽभूदतो द्वैतमनीनशत् ।
ततश्च सहजं द्वेषो गतस्तस्य नरस्य च ॥ १९१ ॥
यद्यत्स्वकीयं वस्त्वस्ति तत्कल्पेऽपि न नश्यति ।
हृदि पूर्णमिदं ज्ञात्वा न शोचति कदाचन ॥ १९२ ॥
यत्परं न ध्येयमस्ति स्वस्मिंस्तद्ब्रह्म तिष्ठति ।
इति मत्वा जगत्यन्यत्किंचिन्नेच्छति चेतसा ॥ १९३ ॥
इदं स्वेष्टमिदं दुष्टमिति भावो न यद्धृदि ।
यथा न सूर्यसंनिधे दिनरात्र्यादिकल्पना ॥ १९४ ॥

१ कल्पे=जगत्प्रलयावसरे ।

एवं यः केवलं ज्ञानी सततं भजने रतः ।
रममाणः सर्वकालं मत्स्वरूपे सनातने ॥ १९५ ॥
अतो मां भक्तिसदृशं नान्यदस्ति प्रियं क्वचित् ।
इदं सशपथं प्रेम्णा कथयामि तवार्जुन ॥ १९६ ॥

समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः संगविवर्जितः ॥ १८ ॥

पार्थैवं यस्य हृदये वैषम्यं नैव विद्यते ।
समः शत्रौ च मित्रे यो वर्तते प्रेमभावतः ॥ १९७ ॥
स्वगृहस्यान्यकाशेय ध्वांते संस्थापये परान् ।
एवं भेदं न जानाति यथा दीपो धनंजय ॥ १९८ ॥
य आत्मानं रोपयति यः शस्त्रेण च्छिनत्ति च ।
उभयोः सदृशीं छायां यथा वृक्षः प्रयच्छति ॥ १९९ ॥
अथवेक्षुः सुमधुरः पालयंतं भवेत्सदा ।
यंत्रेण पीडयंतं तु तिक्तो भवति वा कटुः ॥ २०० ॥
शत्रुं मित्रं वा समानं मत्वा तमनुवर्तते ।
तथा मानापमानादि द्वंद्वं पश्यति यः समम् ॥ २०१ ॥
शीतोष्णवर्षाकालेषु न विपर्येति खं यथा ।
प्राप्ते शीतोष्णभावेऽपि समं तिष्ठति यस्तथा ॥ २०२ ॥
दक्षिणो वोत्तरो वापि वायुर्मेरोर्यथा समः ।
तथा सुखे वा दुःखे वा यः समत्वेन वर्तते ॥ २०३ ॥
राजानं वा दरिद्रं वा चंद्रिका तुल्यसौख्यदा ।
यथा तथा जीवमात्रे यस्तुल्यं प्रेम रक्षति ॥ २०४ ॥
यद्वज्जलं जीवनीयं विद्यते जगतः समम् ।
त्रयो लोका अपि च यत्साम्येनोपासतेऽन्वहम् ॥ २०५ ॥
त्यक्त्वांऽतर्वाह्यसंबंधं मुक्त्वा विषयवासनाम् ।
एकांतवासमाश्रित्य यस्तिष्ठति सदाऽचलः ॥ २०६ ॥

तुल्यनिंदास्तुतिर्मौनी संतुष्टो येनकेनचित् ।
अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥ १९ ॥

कृतानां कर्मणां यस्य नाभिमानः कुतश्चन ।
यथा काष्ठं विना वह्निः सहजं नश्यति क्षणात् ॥ १८३ ॥
तथैव प्राप्यते शांतिरंते मोक्षं लभेदपि ।
दैवादिमानि प्राप्यंते विरक्तस्यापि जन्मिनः ॥ १८४ ॥
अस्तु, पार्थाऽतरे यस्य जागर्ति ब्रह्मभावना ।
स द्वैतस्यापरे तीरे प्राप्तोऽनायासतः क्षणात् ॥ १८५ ॥
सेव्यश्च सेवकश्चैव स्वयमेवेति वेत्ति यः ।
परं भक्तिसुखस्यार्थे सेवकत्वं समाश्रितः ॥ १८६ ॥
स्वस्मादन्यां च यो व्यक्तिं दृष्ट्वा भजति देववत् ।
रीतिं भक्तान्दर्शयति भजनस्य स योगवान् ॥ १८७ ॥
तस्यैव व्यसनं मह्यमखंडं तस्य चिंतनम् ।
किं बहुत्तया समाधानं भासते तस्य दर्शनात् ॥ १८८ ॥
तदर्थमवतारो मे भूम्यां वासश्च तत्कृते ।
नीराजयामि तं शश्वत्पंचप्राणैः प्रियोत्तमम् ॥ १८९ ॥

यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति ।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥ १७ ।

यो ब्रह्मप्राप्तिसदृशीं लब्धिमन्यां न मन्यते ।
अतोऽन्यभोगयोगेन महतापि न हृष्यति ॥ १९० ॥
यः स्वयं विश्वरूपोऽभूद्‌तो द्वैतमनीनशत् ।
ततश्च सहजं द्वेषो गतस्तस्य नरस्य च ॥ १९१ ॥
यद्यत्स्वकीयं वस्त्वस्ति तत्कल्पे[1]ऽपि न नश्यति ।
हृदि पूर्णमिदं ज्ञात्वा न शोचति कदाचन ॥ १९२ ॥
यत्परं न ध्येयमस्ति स्वस्मिंस्तद्ब्रह्म तिष्ठति ।
इति मत्वा जगत्यन्यत्किंचिन्नेच्छति चेतसा ॥ १९३ ॥
इदं स्वेष्टमिदं दुष्टमिति भावो न यद्धृदि ।
यथा न सूर्यसविधे दिनरात्र्यादिकल्पना ॥ १९४ ॥

---

१ कल्पे=जगत्प्रलयावसरे ।

एवं यः केवलं ज्ञानी सततं भजने रतः ।
रममाणः सर्वकालं मत्स्वरूपे सनातने ॥ १९५ ॥
अतो मां भक्तिसदृशं नान्यदस्ति प्रियं क्वचित् ।
इदं सशपथं प्रेम्णा कथयामि तवार्जुन ॥ १९६ ॥

समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः संगविवर्जितः ॥ १८ ॥

पार्थैवं यस्य हृदये वैषम्यं नैव विद्यते ।
समः शत्रौ च मित्रे यो वर्तते प्रेमभावतः ॥ १९७ ॥
स्वगृहस्थान्प्रकाशेय ध्वांते संस्थापये परान् ।
एवं भेदं न जानाति यथा दीपो धनंजय ॥ १९८ ॥
य आत्मानं रोपयति यः शस्त्रेण च्छिनत्ति च ।
उभयोः सदृशीं छायां यथा वृक्षः प्रयच्छति ॥ १९९ ॥
अथवेक्षुः सुमधुरः पालयंतं भवेत्सदा ।
यंत्रेण पीडयंतं तु तिक्तो भवति वा कटुः ॥ २०० ॥
शत्रुं मित्रं वा समानं मत्वा तमनुवर्तते ।
तथा मानापमानादि द्वंद्वं पश्यति यः समम् ॥ २०१ ॥
शीतोष्णवर्षाकालेषु न विपर्येति खं यथा ।
प्राप्ते शीतोष्णभावेऽपि समं तिष्ठति यस्तथा ॥ २०२ ॥
दक्षिणो वोत्तरो वापि वायुर्मेरोर्यथा समः ।
तथा सुखे वा दुःखे वा यः समत्वेन वर्तते ॥ २०३ ॥
राजानं वा दरिद्रं वा चंद्रिका तुल्यसौख्यदा ।
यथा तथा जीवमात्रे यस्तुल्यं प्रेम रक्षति ॥ २०४ ॥
यद्वज्जलं जीवनीयं विद्यते जगतः समम् ।
त्रयो लोका अपि च यत्साम्येनोपासतेऽन्वहम् ॥ २०५ ॥
त्यक्त्वांऽतर्वाह्यसंबंधं मुक्त्वा विषयवासनाम् ।
एकांतवासमाश्रित्य यस्तिष्ठति सदाऽचलः ॥ २०६ ॥

तुल्यनिंदास्तुतिर्मौनी संतुष्टो येनकेनचित् ।
अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥ १९ ॥

निंदां श्रुत्वापि यः शांतः स्तुत्या हर्षं न मन्यते ।
यथा खं सर्वतो व्याप्तमप्यलिप्तं हि सर्वथा ॥ २०७ ॥
यो निंदां वा स्तुतिं वापि समानामेव मन्यते ।
वृत्तिं रक्षति तुल्यां यो जने यद्वत्तथा वने ॥ २०८ ॥
सत्यानृते समे यस्य मौनी सन्नपि वक्ति यः ।
ब्रह्मस्थितिं चानुभवन्न त्रस्यति कदापि हि ॥ २०९ ॥
यो न तुष्यति लाभेऽपि नचाऽलाभेऽपि रुष्यति ।
अवर्षणेऽप्यकूपारो न शुष्यति यथा सदा ॥ २१० ॥
वायोर्यथा न चैकत्र वास्तव्यं भवति क्वचित् ।
तद्वद्यस्याश्रयस्थानं विशिष्टं न कुतश्चन ॥ २११ ॥
वायुर्निरंतरं यद्वदाकाशं व्याप्य तिष्ठति ।
तथा जगति सर्वत्र वसतिर्यस्य संततम् ॥ २१२ ॥
मद्देहमखिलं विश्वमिति यस्य स्थिरा मतिः ।
बहुना किं ह्यात्मरूपं मन्यते यश्चराचरम् ॥ २१३ ॥
पूर्णत्वमेवं यस्यांतस्तथास्था भजने मम ।
सभाग्यं तं मुकुटवच्छिरसा धारयाम्यहम् ॥ २१४ ॥
नमयंति जनाः साधौ मूर्धानं तन्न कौतुकम् ।
यत्पादतीर्थं वंदंति त्रैलोक्यस्था अहर्निशम् ॥ २१५ ॥
श्रद्धावतामादरस्य भवेद्विविदिषा यदि ।
तदा समभ्यर्थनीयः सर्वेशः शंकरो गुरुः ॥ २१६ ॥
अस्त्वेतदखिलं ह्यत्र वर्णिते सति शंकरे ।
आत्मस्तुतिर्भवेत्तेन कृतं स्याद्विपर्यांतरम् ॥ २१७ ॥
अतो मास्तूपमात्रेयमित्यवोचद्रमापतिः ।
विद्धि पार्थास्य तात्पर्यं शिरसा तं वहाम्यहम् ॥ २१८ ॥
मोक्षाख्यं पुरुषार्थं यो मुष्टौ संगृह्य पांडव ।
स्वयं धृत्वा भ[illegible]पोत्यन्यांश्च तत्परान् ॥ २१९ ॥
[illegible] स मुंचति ।
[illegible] तिष्ठति स्वयम् ॥ २२० ॥

तस्मात्प्रणम्य तं प्रेम्णा मुकुटे धारयाम्यहम् ।
तत्पादचिह्नं हृदये स्थापयामि निरंतरम् ॥ २२१ ॥
गुणगानं तस्य पार्थ वाचस्तन्मम भूषणम् ।
तत्कीर्तिश्रवणं तद्वद्भूषणं श्रोत्रयोश्च मे ॥ २२२ ॥
अचक्षोरपि तं द्रष्टुमुत्पन्ने चक्षुषी मम ।
करस्थकमलेनापि मद्भक्तं पूजयाम्यहम् ॥ २२३ ॥
तं क्षेमालिंगनं दातुं भुजोपरि भुजद्वयम् ।
धृत्वान्यदवतीर्णोऽहं चतुर्दोर्ष्टं ततो मम ॥ २२४ ॥
विदेहस्यापि मे देहधृतिस्तत्संगमाय हि ।
किं ब्रवीम्यधिकं तस्याऽनिवार्या प्रीतिरस्ति मे ॥ २२५ ॥
एवं स परमो मित्रं विचित्रं तत्र किं वद ।
नित्यं शृण्वंति मच्छ्रोत्रे तदीयं चरितं मुहुः ॥ २२६ ॥
प्राणेभ्योऽप्यधिकं भक्ताः संति प्रेमास्पदा मम ।
तेषां चरित्रं गायंतो नरा अप्यधिकं प्रियाः ॥ २२७ ॥
अयं भक्तिप्रकारो मे कथितस्तेऽधुनाऽर्जुन ।
प्रधानः सर्वयोगेभ्यो भक्तियोगोऽयमेव हि ॥ २२८ ॥
एवं प्रेमास्ति मे तस्य मूर्ध्ना तं धारयाम्यहम् ।
महत्त्वं भक्तियोगस्य ममास्त्येवं धनंजय ॥ २२९ ॥

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥ २० ॥

एवं धर्म्यां भक्तकथामृतधारां मनोहराम् ।
श्रुत्वा तदनुकूलं ये वर्तंते प्रेमतोऽर्जुन ॥ २३० ॥
तथा श्रद्धाबलेनापि येषु सा विस्तृता भवेत् ।
चित्ते धृत्वा दृढं तां येऽनुसरंति दिवानिशम् ॥ २३१ ॥
तेषां पूर्वं कथितवत्सहजं स्यान्मनःस्थितिः ।
ततः सुक्षेत्रोप्तबीजवत्स्यात्सफलता सदा ॥ २३२ ॥
मां मत्वा परमं श्रेष्ठं मयि प्रेम विधाय च ।
सर्वस्वमिदमेवेति भावयंति च येऽर्जुन ॥ २३३ ॥
य एवं सुस्थिताः पार्थ ते भक्ता योगिनश्च ते ।
तेषां निरंतरं मह्यमुत्कंठास्ति निरंतरम् ॥ २३४ ॥

Date of Issue	Borrower's No	Date of issue	Borrower's No